यस्य च सकलजलधिजलवलयसमुल्लङ्घनाभिलाषुकेण सलिलतरणाभ्यासहेतोरभिषेकपयसि बहल[2]....षि स्फुटितमिवासक्तत्प्रतापानलेन । यस्य च क्रोधदहनदह्यमानकथदरातिजीवितक[3]बलग्रहसंभृ[4]तसन्तापयेव प्रकामपी[5]ततोयया....[6] मौक्तिकोपलतलेषु मुहुरलुलयत घनकठोरया खड्गलतया । येन च प्रथममेवाभिनवयौवनापू[र्यमाणभु]जशिखर....[7]वदेव शरणमितरस्य रणपयितस्य(?) । यस्मिंश्च भूभुजि भुञ्जति भुजस्तम्भेन भुवं भोगभङ्गो भुजङ्गमानां न(च भुजङ्गमाः) । ....[8] कुण्डकानां न च कुण्डकाः । परस्परपातो गोलकानां न च गोलकाः । सूक्तातिक्रमो नक्तञ्चराणां न च नक्तञ्चराः । तमःप्रसरः प्र[दोषाणां न च प्रदोषाः] । ....[9] नां, न च निस्त्रिंशाः । पादापीडा कण्टकानां न च कण्टकाः । द्विजिह्वाभ्यवहार्यता प्रभञ्जनानां न च प्रभञ्जनाः । रूपध्वंसो लुब्धानां न च लुब्धाः [चित्रमासी]....[10]प्रजानाम् ।

1. A reads दिष्ट. page 5.
2. L. about 16 letters.
3. A reads कबलसम्भृत.
4. A reads सन्त्रपयेव. page 6.
5. ,, वितते....कठोरया. page 6.
6. L. about 20 letters.
7. ,, 26 letters.
8. ,, 26 letters.
9. ,, 16 letters.
10. ,, 8 letters.

अथ स राजा सर्वदेवताराधनपरः परं धिषणोपपन्नोऽपि दिव्यानन्दजननेषु कविगुणेषु प्रीतिमानभूत् । अविबुधोऽपि क(या?था)मृतरसं कल्पावृतमे[1]षावण (?) ।

एकदैनं सभागतमभिनवो गन्धर्वस्तुम्बुरुरिव जम्भशत्रुमित्युपावीणयत् —

दनुजपतिहृदयभूधरविभेदविज्ञातशक्तिनखकुलिशम् ।
जगदुदयहेतु विष्णोरवतु वपुर्नारसिंहं वः ॥

स इमामार्यामाकर्ण्य गुणकुतूहली तमप्राक्षीत् — 'भद्र ! कस्यैतान्यक्षराणि विकटबद्धान्योजस्वीनि च लक्ष्यन्ते, कस्य चेयं वर्णरचना माधुर्यवती प्रसन्ना चेन्दुकरकलिकेव श्रवणानन्दमुत्पादयति ' इति ।

स तु सम्प्रणिपत्य व्यज्ञापयत् — देव ! परमनुगृहीतोऽस्मि, क्षणमवधानदानादनुगृहीततमः क्रियतामयं जनः । "अस्ति दिशि पश्चिमोत्तरस्यामार्यदेशशिखामणिरानन्दपुरं नाम ब्राह्मणानां महानावासः । ततो हि निस्सृता सरस्वतीव ब्रह्मलोकादगस्त्यमूर्तिरिव पीतोद्गीर्णगम्भीरशब्दसमुद्रा दक्षिणां दिशमनुगृह्णन्ती सकलकितवसिद्धान्तप्रपञ्चमूलेन मूलदेवेन सख्युरचलस्य कृते निवेशितमचलपुरं नाम गवप्रोदकपुष्पवासितकलमकाननायासिकभूमौ (?) नगरमपरमिव धरणिगोचरममरलोकम्, आस्पदं पुण्यकर्मणामलघु विविक्तमन्त्रविस्तारसम्भृतधृतिरधिवसति कुशिकवंशवर्धनी सर्वातिथिरप्रतिग्रहीत्री महत्युदाररूपा ब्रह्मराशिर्ब्रह्मसन्ततिः ।

तत्रोदपादि भगवतो विधिवदाहृतसर्वसप्ततन्तुरूपिणो नारायणस्वामिनो नाभिपद्म इव ब्रह्मैकधाम दामोदरस्वामिनामा तेजो(यमः? मयः) कुमारः । स यौवनारम्भ एवातिसुभगाकृतिरकृतकवाक्यदर्शितपुण्यसद्भावया सर्वाङ्गमनो-

1. A reads मेणापन्न. page 6.

हृरया सर्वकलाविदग्धया सर्वभाषाप्रवीणया प्रमाणयुक्तया ललितपदविन्यासया चतुरहृद्यालङ्कारया विशुद्धजातिवृत्तया सरस्वत्या स्वयंवर (ए ? इव) कन्यकया स्वयमुपेत्य सस्नेहमस्वज्यत । को हि नाम भगवतीं भवितव्यतामतिक्रम्य यथा-समीहितेन साधयति पथा, यतः कौशिककुमारो महाशैवं महाप्रभावं गवां प्रभव प्रदीप्तभासं भारविं रविमिवेन्दुरनुरू[1]ध्यदर्शं इव पुण्यकर्मणि विष्णुवर्धनाख्ये राजसूनौ प्रणयमन्वबध्नात् ।

एकदा च मृगयां गच्छतामुना नीतस्तन्निर्बन्धादस्वकुलसमुचितमहुतशेषं मांसमा ....[2] नयैव लज्जया पित्रोरन्तिकमनु(प)सृत्य तीर्थयात्राप्रसङ्गेन दिगन्तराण्यभ्रमत् । भ्रमणशीलकीर्तेर्गाङ्गेयकुलध्वजस्य दुर्विनीत इति वि[परीतनाम्नः]....[3]गुणनिधिरमृतधाम्न इव कुमुदाकरो गोचरमगमत् । अमुना च साधुलङ्घनमूलमात्रमात्मनिवेदनादिसौजन्यं दर्शयता वशीकृत[स्तदभ्याशे वसति । आर्येयमियं च व]....[4](त)स्य द्विजकुमारस्य मतिविलसितम् । विदितं नाम तस्य सहसद्विद्यमानकं भुवनेषु । वयसा चासौ विंशतिवर्षदेशीयः'' [इति क्षितितलनिहितमौलिः प्रणम्याचार]....[5]भृति भूपतिर्जातकौतूहलो हलधर इव सरस्वतीतीर्थानि सम्भावयन् अनेकश्रीमुखपरम्परानुकृष्टमेनमात्मसादकरोत् । [माहात्म्याद[6]तिशयदर्शिताराधितपुरु]....[7]चतुराननस्यादिकवेर्द्विजोत्तमस्य प्राकृतानां च वस्तुभेदानां तत्पूर्वं[8] प्रकटयितुस्तस्य पुत्रीकरणेन दर्शितातिप्रसादस्तदनुरूपमन-[लपत्रपरि]....[9]प्रादाच्च ब्रह्मदेयपरिमितम् । एकदा च प्राकृतगानानि कानिचित्तेन प्रेषितानि श्रुत्वा परं प्रीतः स्त्रीसहस्रकुलं च काञ्चनाभमत्रे[10] सुरभि....[11]

1. Shall we read अनुरुध्य. See Avantisundarī kathāsāra —अनुरुध्या-करोन्मैत्रीं. I. 23.
2. L. about 8 letters.
3. ,, 6 letters.
4. ,, 8 letters.
5. ,, 12 letters.
6. May be read माहात्म्यातिशय....
7. L. about 10 letters.
8. A reads पूर्वकं. page 7.
9. L. about 10 letters.
10. May be read काञ्चनाभमति
11. L. about 12 letters.

मापूर्य त्वद्गुणप्रेमप्रस्नुतानां त्वन्मातॄणां स्तन्यमिदम् । अतिबहुत्वादासां प्रत्येकं स्तनपानश्लथगौरवं तव स्याद्, अतोऽस्माभिरेकत्रैव संभृतमिति प्रजिघाय । एवंविधाश्च सम्मानभाजः[1] प्रतिमासं प्रतिपक्षं प्रतिदिनमित्यवर्तयत् पृथिवीपतिः ।

स च तथानुगृह्यमाणो[2] गन्धमादनप्रभृतिभिश्च[3] वरकृतैः संस्कृतप्राकृतानां च काव्यानां लक्षणैर्दक्षिणापथं सनाथमकरोत् । नृपतिनिर्बन्धपरिणीतश्च ब्रह्ममयान् समग्रवाङ्मयाधारभूताननन्तमूलानचलकुलस्थितिविहितसन्निवेशानम्बु-राशिगम्भीरानुज्ज्वलराजहंसोपग्रहप्रकाशतेजसो लोकानिव त्रीन् सिंहविष्णु-मनोरथातिलोभनाम्नस्तनूजानजीजनत् । येषां गृहेषु प्राधीतपटुब्रह्मघोषःस्थान-व्याख्यायमानसर्वशास्त्रध्वनिः, अङ्गनाजनचरणपद्मजल्पाकनूपुराहूतभवनदीर्घि-काकलहंसकोलाहलः, सकलातिथिसार्थसन्तर्पणकलकलो, गन्धपरिमलभ्रान्त-भृङ्गमण्डलीझङ्कारालङ्कृतिरभिमतगृहदेवाराधनपरपुरन्ध्रिमण्डलारब्धबहुविधोत्सव–स्वनश्च पल्लवदानशक्तिघोषणापटह इव दिवानिशमिश्रितपद[4]चतुरसञ्चर-स्सरस्वतीभूषणरवमन्थरो दध्वान ।

मध्यमस्तु तेषां[5] मनोरथ इव चिरेणोपपन्नः कलिजिगीषोर्धर्मस्य माहात्म्यवतो महितमहाशब्दौघपूरितान् महीभृन्मानितान् मर्यादारक्षणोचितान् महागुणरत्नराशिभाजो महासत्त्वान् महोदधीनिव मध्यमो लोकश्चतुरो दामोदरभवदाससिंहविष्णु(वीर)दत्तनाम्नो ब्रह्माधिष्ठितान् सुतानलभत ।

तेषां तु कनीयसो निसर्गशुद्धवृत्तस्य वीरदत्तशर्मणो ब्रह्मर्षेर्वसिष्ठस्ये-वारुन्धती सतीनाम[6][अ]गामिनी गौरी नाम माठरसगोत्रा ब्राह्मणी गृहिणीपदमध्यतिष्ठत् । स तस्यामनेकदुहितृजन्मजातोद्वेगशान्तये तन्तुमेकं

1. May be read सम्मानना:.
2. A reads तथागृह्यमाणगन्ध.
3. ,, प्रभृतिभिः श्रीवर. page 7.
4. Read अञ्चितपद.
5. A reads तेषां मनोरथो मनोरथ. page 7.
6. ,, नाम कामिनी.

दण्डिनामानमविन्दत । पितुरस्य प्रेयसी सपत्नीपुत्र इत्यकृत्वा मत्सरं महानुभावा सप्तमाद्वर्षादारभ्य सरस्वत्येव सुप्रसन्ना दण्डिनमवर्द्धयत् ।

तस्मिंश्चोपनीते पठति तद्गुरुर्गुरुदिदृक्षयेव स्वरगात् । तस्मिंश्चान्तरे परचक्रपीडया पर्याकुलेषु द्रमिळचोळपाण्ड्येषु, परामृष्टासु कुलवधूषु, विरतेष्वग्निहोत्रेषु, विलुप्तेषु धान्यकूटेषु, विद्रुतेषु कुटुम्बिषु, जृम्भितेष्व[1]....भिन्नासु मर्यादासु-च्छिन्नास्वारामपङ्क्तिषु, भग्नासु[2] सभाप्रपासु, पर्यस्तासु सत्रशालासु, निहतेषु धनिषु, प्रहतेषु कापथेषु, द्रमिलेष्ववलीढेषु, [3]....दिव कलौ कारयत्येकराज्यमुपरतप्रनष्टबन्धुवर्गः प्रद्रु(म?)तप्रायपरिजनः प्रवृत्तवृत्तिक्षयो दुर्भिक्षक्षीणकोशः कौशिकदारको दण्डी[4]...या देशान्तराण्यभ्रमत् । अवसच्च चिरमभिलक्षितेषु गुरुकुलेषु, अलभत चानवद्यां विद्याम् । गरीयसीषु च ब्रह्मक्षत्रसंसत्स्वितरदु[5]....खातमाव....[6]कस्य कल्पवृक्षक्रियाविस्मापितदुर्जयस्य मान्धातृनाम्नः स्थपतेः प्रशस्तवास्तु, शास्त्रार्थसारसामस्त्यसंहारोन्मीलितप्रयोगतन्त्र[7]....[8]विस्तारकुशलः षण्णवतिप्रासादविधिविशारदो यानासनशयनादिनानाविकल्पनापटुः स्थितचरधार[9]द्वीपज्वरव्यामिश्रसंज्ञानां षड्विधानां यन्त्रा[णाम]...[10][तीयप्रयोक्ता षट्त्रिंशदाचार्य]गुणैरलङ्कृतो ललितालयनामा समस्तसूत्रगृही[11] वर्द्धकी तक्षकपक्षप्रती[क्ष्यं? क्ष्यः]क्षात्रियैश्च संस्कृतः स्थपतिरभ्येत्य विरचिताञ्जलिरार्द्रदृष्टिर्निर्दिष्टायां भूमावुपाविशत् ।

1. L. about 6 letters.
2. A reads सभादिप्रपासु. page 7.
3. L. about 10 letters.
4. ,, 18 ,,
5. ,, 16 ,,
6. ,, 4 ,,
7. L. about 18 letters.
8. A reads विस्तारषण्णवति. page 7.
9. May be read धारा...
10. L. about 4 letters.
11. Read ग्रही.

दृष्टेऽपि तस्मिन् विस्मयस्पृशो जनस्य, 'अयं किल यन्त्रपुरुषैर्द्वारयुद्धमहीनमादर्शितवान्, अनेन किल अलीकजलधरधाराजलजालदन्तुरमन्तरिक्षं कृतम्, एष किल यन्त्रमयमिन्द्रजालिकं कृतवान्, एष किल संख्येष्वसंख्यानां युगपदेव भिनत्ति शत्रुहस्तिनां मस्तकस्थलानि मुसलमात्राभिरिषुभिः, अमुना किल द्रमिडभाषया शूद्रकरचितमुपनिब[न्ध? द्धम्], अस्य किल पित्रा यवनानप्यतिशयानेन क्षुधितोऽयमिति यन्त्रेणाभिधापितम्, अयं ततोऽप्यधिकः किल' इत्येवमासन् विकसितकुतूहलाः प्रलापाः ।

प्रशान्ते च कलकले सकले स दण्डिनमवादीत्—“अस्ति किञ्चिद् विज्ञाप्य(म्। अ)वसिता एव सर्वे नित्यप्रमादशैथिल्याभ्यां शिल्पातिशयाः । यतोऽद्य त्वेवं प्रयोगलेशोऽपि विस्मयाय लोकस्य । युष्मादृशां तु ब्रह्मेन्द्रपराशरप्रभृतिप्रणीतशास्त्रहृदयवेदिनां कियदिवैतस्मिन् नैपुणमपि । तदनुग्रहार्थमेव केवलम् अनुमहामल्लपुरम् उरुतरङ्गहस्तसंवाह्यमानपादपङ्कजस्योर्मिमालिनो भगवतो भुजगवरशयनमनुगृह्णतः शैलस्य शार्ङ्गधन्वनः केनापि कारणेन मणिबन्ध एव भग्नो दक्षिणः करः । स तु मया प्रतिघटितः । किमसावतिमहद्भिः पूर्वाचार्यैस्तस्या दिव्याकृतेर्घटिताया अनुरूपं घटते न वेति द्रष्टुमर्हथ । न हि वः शक्यमस्मादृशामसाधारणेनाभ्यर्थितमकृत्वा स्थातुम्” इति ।

अथ सन्निधावेवोपविष्टाऽधिष्ठानमिव सर्वसद्गुणानां, सर्वस्वदानदीक्षयाप्यसन्तु(ष्टा? ष्ट)त्यागशक्तिः स नित्य[1]कलासमागमसभागृहं, सर्व(त्रा? ना)गरिकानुकरणीयलीलासौष्ठवः सर्ववीराग्रेसरो वीरवतामपरनामा रणमल्ल[2]सेनापतिकुमारः सहपांसुक्रीडासम्भृतस्नेहराशिरब्रवीत्—“आर्य, सम्भाव्य एवास्य शिल्पिवरस्य प्रणयः । बह्वाश्चर्याणि गिरिसमुद्रकाननानि । मित्रं च तवैष विश्वब्रह्मराशेः कल्पसूत्रटीकाकारस्य सकलविद्यानदीपूरवारिधेस्त्रिशत्क्रतुविभूतिभावितत्रयस्त्रिंशस्य

1. A reads नीत्या. page 8.
2. Should we read रणमल्लः सेना....

शापानुग्रहसमर्थस्य ब्रह्मर्षेर्भवरातनाम्नः पुत्रः, तत्पुत्राणां तत्समानमेधादिसर्वसम्पदां द्वितीयस्त्रय्यामङ्गेष्वै[तिह्यकलासु]-कवितायां चाद्वितीयः सुहृन्मतनिर्विकारदत्तहृदयो गुरुपरिचर्यापरः परममाहेश्वरो लब्धवर्णकर्णधारः कर्णमपि नापरा....[1] कस्त्यागशस्यातिक्रान्तो मन्त्रार्थतत्त्वव्याख्यानचतुरश्चतुर्वेदवित् सर्वजनमातृभूतकरुणावृत्तिर्मातृदत्तः तदा चैषा....[2] [करस्वामिनो देहभज (?)सहजकीर्त्तिराम्नायनिधिर . . . . भूमिदेवनिवहचूडामणिर्देवशर्मा त्वद्दर्शनाय केरलेभ्यः का: . . . . तदेषामपि सङ्कल्पानुकूलोऽयमारम्भो निर्विचारम . . . . . परेद्युः सह मित्रजनैः श्रीजयन्तनारायणभजनानन्दप्रभृतिभिः सह . . . . . . लीनक्ष्माभृत्पक्षच्छेदाक्षमसहस्राक्षदे . . . . . वैरिणममरगणमसुरसैन्यसङ्घहो . . . . . . मदनेकपपोतकाकुलितवनं वनषण्डमिवोद् . . . . . . श्चर्योद्भवकूटसाक्षिणमिव कालकूटादेरिण . . . . . . नभसो भासुरभुजङ्गराजस्फुटफणारत्नचक्रवालकरालितं . . . . .] सरिदङ्गनाभिसरणप्रकाशसौभाग्यराशिमम्बुराशिम्, आशीविषभोगभीषणैश्च रावणभुजदण्डैरिव राजताचलं कैलासमुल्लासिभिरुदन्वदूर्मिभिः स्पृश्यमानमूलं राजमन्दिरमुदीक्षमाणः, तरलतरङ्गभङ्गभग्नगर्भशुक्तिगर्भोन्मुक्तमुक्ताफलदलशबलवालुकेन शीतलगन्धोद्गन्धिमालिनापि मुकुलबकुलचक्रपवरलाञ्छितेन प्रचुरचूतपरिमलेन स्फीतसुरभिचम्पकाशोकवृक्षोत्पलपुन्नागतिलकसालसिन्दुवारवारितामोदेन क्रमुकनालिकेरमालिना जलधिवेलापथेन किञ्चिदन्तरमतिक्रम्य व्याकोशकुवलयदामश्यामलाभिर्लक्ष्मीकटाक्षमालाभिरिव लवणसागरतरङ्गराजिभिर्लङ्घ्यमानशरीरं दूरोत्थितफणासहस्रस्फुरितताम्रदृष्टिमालेन[3] पुनरपि मधुकैटभदानवाभिपतनशङ्कानिरूप्यमादिशेव[4] शेषेणोह्यमानं योगनिद्रामन्थरमुकुलितेक्षणप्रभावप्रवाहेण नाभिरन्ध्रमुक्तेनाश्चर्यसहस्रपत्त्रेणानुगृह्यमाणकमलासनं भगवन्तमुत्फुल्लेन चक्षुषैक्षत ।

1. L. about two letters.
2. Space for about ten lines is left blank in the manuscript.
3. May be read जालेन.
4. Read आदिशतैव.

स्वं च हस्तयुगलमयत्नेनैव कु(ड्)मलितमधापतिं(?) गुरुभक्तिभारनम्रमूर्धा निर्धौतात्मक(र्व ? ल्म)ष इव तदङ्गस्पर्शपावनैः पारावारशीकरसलिलबिन्दुभिरवहितेन चक्षुषान्ततस्तदर्चाशरीरमभिनिरूप्य क्वचिदप्यनधिगतघटनाप्रस्थानभेदस्तमेव स्थपतिमालोक्य 'अपचयितस्य पुस्तकर्मणः काष्ठयम्, अत्र तु कस्त्वया प्रतिसंहितःकर' इत्यभाषत ।

स तु विनीतश्रमः शिल्पिवर्यः कृतार्थोऽहमेतावतेति रचिताञ्जलिरनंसीत् ।

अस्मिन्नेव चान्तरे झटितिकारिभिरदभ्रसंभ्रमभ्रामितपक्षपालिभिर्वेलोद्यानभ्रमरमण्डलैर्युगपदेव प्रत्युद्गतो, भगवन्नाभितामरसवासोद्भवभ्रान्ति[1]हेतुरपरपारिजातोद्भेदसन्देहदायी, योगनिद्राचिरनिरुद्धरत्युत्सवोत्कण्ठमानलक्ष्मीनिःश्वासप्रसरसौरभ्यसंशयावहः शतमखपरिभुज्यमानदिग्वधूपरिमलायमानः प्रत्यङ्मुखो घ्राणलेपी कोऽपि दिव्यः सौरभातिशयोऽभ्यागमत् । किमिदमिति प्रबलविस्मयप्रहितदृष्टयः सर्व एव ते किमप्युल्लसत्प्रवालवल्लरीवलयपाटलमिवोन्मिषदुरगफणारत्नलावण्यलेप ....[2] दौर्व[3]पावकज्वालोपरक्तमिवोत्पतत्सपक्षपर्वतशिखराग्रलक्ष्यकल्पवृक्षस्तबकताम्रमिव च सन्ध्यायमानं समुद्रोद्देशमद्राक्षुः । क्षणादिव....[4] [च पश्यतां तेषां][5] लोलकल्लोलमालोल्लासितोपस्रस्तं स्यन्दनचक्राधिकप्रमाणमुत्केसरपङ्क्ति किञ्चित् पङ्केरुहं तदासीत् । आसीच्च पुनरच्युतचरणारविन्दस्पर्शो....[6] [र ? न्त्रेणैव दिव्यस्रगनुलेपनाभरणः] कृपाणधारामरीचिमञ्जरीभासुरैकबाहुरितरकरकलितरत्नोच्चित्रचर्ममण्डलः प्रतिघ्नन्निव स्वतेजसार्कभासं कोऽपि विद्या...[7] [स च भगवन्तं

1. A reads कान्ति. page 7.
2. L. about 6 letters.
3. A reads दौर्मिपावक. page 9.
4. L. about 4 letters.
5. A reads लोक. page 9.
6. L. about 4 letters.
7. ,, 8 letters.

प्रदक्षिणीकृत्य हेतिगर्भमञ्जलिमुपा]रचयत् । उत्पतनरंहःप्रेङ्खोलितप्रालम्बहार-जालचलबालाकमालाबहलखड्गप्रभाम्बुवाहवाही सहसैव दिवस....[1][तैस्तु लोकोऽतिमात्रविस्मयविस्मृता]न्तरात्मा निरन्तरोदञ्चदुच्चरो(त ? मा)ञ्चपुञ्जकञ्चुकितश्चिन्ताम् ।

अथ चित्रीयद्बलात्कृतचित्तसङ्गतः कथेतिहासरसास्वादरसिकः स्मितपूर्वाभिभाषी विशे...[2][ल्यवन्ध्यवागलभ्यरन्ध्रस्थूललक्षो]वि(ल ?)क्षणः[3] कलासु, विनीतो विद्यासु, विस्रब्धः सुहृत्सु, विमुखः पापेषु, सुभगः सुकुमारश्चतुरः संविभागी कृपालुः शीलवानुदारसत्त्वः सत्यरतिश्चोलाभिज[नो विश्वामित्र]गोत्रः कृती रामशर्मा नाम बालमित्रं चित्तानुवर्तनेषु[4] दा(धो ? सो)[5] दुर्नयनिवारणेषु गुरुर्विस्रम्भेषु हृदयमसुभिरपि स्पृहणीयायां प्रियभूमौ किल दण्डिनमवादीत् । ननु गौरीपुत्रस्यापि प्रत्यक्ष एवायम्। अध्यक्षयद्भिरप्यश्रद्धेयो गरीयानद्भुतोदयो यथेदमग्रेसरःकुसुमितलुज्जिहानेन(?) मिहिरमण्डलानुकारिणा रक्तपुण्डरीकेण पुनरमुष्य पुष्करस्य परिणतिः पुष्करेक्षणचरणपद्मसम्पातानन्तरं केयूरिणी किरीटिनी मण्डलिनी मण्डलाग्रणी(चे ? चो)दगान्मरुत्पथम् । अद्यत्वेवं पुनरीदृशानामसुलभदर्शनत्वादलघुविस्मयप्रसरभारपीडितं नो हृदयमलमसि खल्वनुमानगत्या विदूरमुन्नेतुम् । अत इह कथमवकल्पयत्यत्रभवतो मतिरिति ।

स तं प्रत्यवोचत् — सखे ! न(तु ? नु) सर्वेषामेव नः समानं दर्शनम् । इयदिह शक्यमुन्नीयावगन्तुम् —'एष कोऽपि नभश्चरेश्वरः कस्यापि रोषणस्य महर्षेः पुष्पसम्बन्धापराधापकारितादनुव्याहारादम्बुरुहत्वमवाप्याम्बरादम्भसां निधौ पतितः

1. L. about 4 letters.
2. ,, 2 letters.
3. May we read विचक्षणः.
4. A reads चित्तावर्जनेषु. page 9.
5. ,, दाने. ,,

स्रोतोभिर्वा स्थलादुपहृतः कालकल्पमनल्पं वारिधेः क्षारवारिणि परिभ्रम्य[1]स्यापि हि मेऽस्मिन् विस्मयवस्तुनि जिज्ञासया समाक्रान्तमेव हृदयम् । तदेहि गच्छाम इति सह सहायैः काञ्चीमेव न्यवर्त्तत ।

तदाश्चर्यश्रवणरागावर्जितमनोभिस्तु मातृदत्तरामशर्मप्रभृतिभिः प्रियसखैर्मुहुर्मुहुः प्रेर्यमाणो गणरात्रकृतात्मशोभनो[2] द्वादश्यामश्रान्तभक्तियोगः कल्पोक्तेन विधिना विधाय विष्णुपूजां दर्भशयनमध्यशेत । तथा शयानं चाशरीरा सरस्वती स्वप्ने एनमन्वग्रहीत् । "वत्स ! समृद्धं ते समीहितम्, सुप्रसन्नस्ते सुरासुरगुरुस्त्रयीशरीरस्त्रिभुवनपतिस्त्रिधामा । प्रतिभातु तवैतदाश्चर्यभूतं सर्वपुरुषार्थोपदेशगुरु सर्वद्वीपवृत्तान्तबहुरसं सर्वकलाकलापगर्भगम्भीरं सर्वसमयरससम्भेदसम्मतं सर्वादिराजवंशवर्णनमनोहरकथं सर्वदेवासुरवृत्तकीर्त्तनाद्भुतं सर्वमनुजगन्धर्वसिद्धविद्याधरेश्वरस्य राजवाहननाम्नो [3][. . . पारमत्। उपारमत यामिनी । विस्मयप्रतिबुद्धस्य चास्य लोत् . . .] देवजलाप्लुतः सुचिरोपस्थितपूर्वसन्ध्यः स्वनुष्ठितभगवदाराधनः स्वादुचतुःसमान(?)सन्तर्पितद्विज(प ? व)रः स्वयं च प्राशितहविष्याशनः प्रशस्तमङ्गल्यवेषः शुश्रूषवे सुहृद्गणाय कथामवन्तिसुन्दरीमाचिरव्यासुरित्यभाषत । युष्मत्प्रार्थितानुष्ठितप्रयत्नेन मया मधुनरकारिष्टकेशिकंसध्वंसनस्य त्रिभुवनैकमङ्गलस्य भगवतो भक्तभयहरणविधिविचक्षणस्या[म्बुजेक्षण]स्य प्रसादादम्बुनिधावम्बुजस्याम्बरेचरत्वप्राप्त्यवसानमद्भुतमतिमहत् कथाशरीरं दृष्टम् । अस्ति चेत् कुतूहलमयमहं कथयामि । श्रूयताम् :—

[आसन्नसङ्कीर्णविविक्तवर्णाश्रमा . . . . . र्यपश्या असूर्यपश्याः सुन्दरपुरन्ध्रयो निरवगहन्नि]स्वारम्भगुरुकुटुम्बिवर्गा (?) रङ्गोद्रङ्गसङ्ग-

1. The text is defective. We may read परिभ्रम्यति । अस्यापि.
2. शोभनः is more probable.
3. There is no lacuna in our Ms. But obviously some portion is missing.

वाध्यक्षतुङ्गागास्त्रशीकराः सस्तलकाकुसैरिकजनाः सर्वजनीनसर्वजनास्त्वार्ये[1].... वग्रहं
निर्भयाः निराधिव्याधिसम्भवाः स्तम्बकरिहरितसरिमलः(?) तामरसत्रिसरसुरभयो
नाव्यनदीप्रवाहा यव्ययवक्रयषष्टिक्योद्देशपेशलाः शा[2]....केदारभागा गोधूमीन-
क्षेत्रकाण्डाः पृथुलतिलयवस्थल्याभोगाः प्रशस्तकौलस्थ(ली ? की)नस्थला महित-
माष्यभक्तय उद्धमौ(गी ? द्गी)नोर्वरा मासुरीण[वरभुवः प्रचुरमञ्जीरकपरिय ?][3]....
तराजमाषाः निष्पावनिकरकर्बुरा गौरसर्षपतषीपरिकरा(?)जरठकुसुम्भकुड्मलविजृ-
म्भणारुणप्रदेशाः प्रसुपान[4]प्रसुरक्षरपेटक(?)प्रकटयो[निपोषा गो]जाविमहिषपोषिणो
बाष्पच्छेद्यशष्पकवचितविविधवीथयः प्रासादादीयदाकु(?)वर्धनद्रव्यवनराजयो
बहुफलेग्रहिद्रुमसमग्रोदग्रग्रामसीमानः सारसकलहंसावतंससरसविकटतटाकमण्डलाः
प्रच्छायसुखप्रपापङ्क्तयः प्रस्निग्धतलसुभगसङ्घावकाः प्रत्युदपानप्रक्ल[5]साटहारिणः(?)
[6]पुण्यारामालिनो मगधा नाम जनपदाः ।

तस्मिन्नामापि नागृह्यत राजद्रोहस्य । वार्त्तापि नावर्ततोपद्रवाणाम् ।
कथापि नाक्रियत कलेः । स्मृतिरपि नाजायत जन्यस्य । चिन्तापि नासीत्
ग्रास्कर्यस्य । प्रसङ्गोऽपि नाभवदभिषङ्गाणाम् । तस्मिंश्च पङ्कः [7]पङ्कस्योप-
कारमात्रको, न हि न ह्यधिकोऽप्यस्ति वधूनां कुचतटेषु कुङ्कुमपङ्कः । केवलमा-
क्रीडाचलतलेषूपलाः । कण्टकः कमलनालेष्वेव दृष्टः, आतिष्ठतुपुनरपि दृष्टः
प्रियतमानामालिङ्गनेषु । श्रेणिः प्रासादशिखरारोहणेष्वेवासीत् । [8]दुरवधूत-
मिद्मासन्नं च विहरत्सु जलविहङ्गमेषु तेन(?) चान्योन्यसन्निकृष्टघनधान्यशैल-
कूटसहस्रलङ्घनायासभयादिवाप्रवेशक्षमो दुर्भिक्षकालकलिकश्च कल्याणोद्यतदुन्दुभि-

1. L. about 16 letters.
2. „ 16 letters.
3. „ 6 letters.
4. A reads खेटक. page 10.
5. A reads प्रक्लसाभवहारिण. page 10.
6. „ पुष्पा. „
7. Shall we read पङ्कजस्य?
8. Here the text is mutilated.

ध्वनिप्रबन्धविद्रावितः सरभसमहास्यतेव विकस्वरेण कुमुदकोकनदसरस्स-
हस्रेण । तस्मिंश्च शङ्के कलशोद्भवपानभयादिवोधस्सु धेनूनां लीनः
क्षीरसागरः । हरिकुलिशव्यसनशङ्कयेव तिरस्कृत्यात्मानं सुरभवनीभूतानि
भूधरकुलानि । राहुमुखविषनिषेकदूषणभियेव सोमेन सुधारसः पुण्ड्रेक्षुषु क्षिप्तः ।
प्रबलपवनपर्यासत्रासेनेव चापहाय मरुत्पथमवनिलग्नानि तरुषण्डच्छलेन
मेघमण्डलानि ।

तस्य चैवंविधस्य मण्डनं मगधविषयस्य, मह्याः स्वर्गविजयसाधनं,
अपवर्गसुखतिरस्कारकारणं जीवोज्जीवस्य, जाह्नवीपरिभोगरागरोषितेनोर्मिमालिनेव
महता [1]खातवलयोपरुद्धम् उत्तुङ्गधवलप्राकारमध्यवर्तितया पौरतरुणसुन्दरी-
कान्तिभावनाहेतोरिन्दुमण्डलादिवोत्कीर्य क्षिप्तम्, अमलमणिभूमिगर्भसंक्रान्त-
प्रतिबिम्बतया विततमणिमयूखजालपक्षैस्तार्क्ष्यैरिव रसातलमुरगोद्धरणहेतो-
र्विशद्भिर्दारुसारमयैः महाप्रासादैरुपशोभितम्, उदयसमुद्रगाधदर्शनोत्क्षिप्तपुर-
देवताभुजलतानुकारिभिः खातवलयपिनद्धैर्मणितोरणैः [2]समुल्लासितम्, उन्मील-
दनेकरत्नरागवलयिभिरतिरभसरतिविहारविच्छिन्नैर्लक्ष्मीमेखलागुणैरिव विपणिपथै-
रुपेतम्, उन्मदहंसमण्डलचलितेन्दी[3]...राजिभिरनिमिषत्तारकागणकरालितान्धकार-
सन्ध्यारागैरम्बरैकदेशैरिव मण्डलीकृतैः मणित(द ? ट)रश्मिजालसन्दिग्धवारिभिः
सरोभिरुद्भ्राजमानम्, उपवन[4]..तबहुविधकुसुमधूलिपाटलपटम् उपरिलग्नमुष्णीषमिव
सकलनगराधिपत्यचिह्नमुद्वहद्भिः, [5]ग्रहणोपरिगमनावलेपवारणायेव प्रकङ्कमानो[6]च्छ्रित-
प[ताकव्यस्तम् अखिलजम्बूद्वीपलक्ष्मील]तैककुसुमं कुसुमपुरं नाम समग्रस्त्री-
पुरुषरत्नसारसंभूतिसागरायमाणं नगरमभवत् ।

1. Read खातवलयेनोपरुद्धं.
2. A reads समुद्भासितं. page 10.
3. L. about 4 letters.
4. L. about 4 letters.
5. The clause is incomplete.
6. A reads प्रकम्पमान. page 10.

अभ्रंलिहभवनसहस्रोपरुद्धगतिरमर्षज्वलित इवो[त्सर्पदरुणमणिप्रभाप्रवाहोपरक्तवपुर]म्बरमध्यस्थितोऽप्यमुक्तशैशवच्छाय इव यत्र लक्ष्यते भगवान् भानुमाली। यस्य च सारगौरवादिव सप्तसागरतरङ्गसङ्घातघोराभिघातायासिता[पि न कदाचन चलति भूतधात्री। (यं च? यच्च)] निवसता धनपतिसहस्रेणाराधयत्यलकापुरम्, उपहसत्यनष्टात्मभिश्च वसुभिरमरभवनम्, अनन्तैश्च भोगिभिर्भोगवतीम्।

यस्मिंश्च पौरा न मधुपायिनो दानरुचयश्च, न कृशानुगामिनः प्रकटितभूतयश्च, न भङ्गुरभोगवृत्तयो भोगिनश्च, न बहु[1]भाषिणो बृहत्कथाव्यसनिनश्च, न जलाशयाः सेतुबन्धलग्नाश्च, न प्रमदस्पृशः कादम्बरी[2]रसावितृष्णाश्च, न सुरद्विषः काव्यदर्शनाभिरक्ताश्च, न[3] मन्ददृष्टयः समन्दाक्षाश्च[4] विश्रुतबहुश्रुताश्च रामायणविदो रामाशुभापातानभिज्ञाश्च, दृष्टमहाभारता भीमगदाभिघातवार्तामुग्धाश्च, प्रमाणविदश्छलव्यवहा(र?रा)पण्डिताश्च सर्वविरोधैकायतनमधिवसन्तो निर्विरोधरमणीयमभ्यस्यमानपुण्यकर्माणः प्रतिवसन्ति।

यत्र च सरसि चित्रायण्यां कात्यायनस्य भगवतो हुताशनस्यात्मजस्याभिषेकहेतोरमरलोकादंशेनावततार मन्दाकिनी।

यस्मिंश्च बह्वाश्चर्ये सप्तच्छदपादपः काममानकामिनीकपोलपाण्डुवर्ति[5] मधूकपुष्पम्(?)। पुष्पपुरं च तत् पुष्कर इवानन्तभोगमुत्कृष्टसैन्यवाहनो हरिवाहन इव सुकृतिनां पदं कृतागस्थिरपक्षच्छेदनः, नरवाहन इव पुण्यजनाश्रयं निधीश्वरः, हरिदश्व इव उदयस्था(न)मर्च्यमहाप्रभावर्षिपादः, गन्धवह इव घनक्षयमशेषक्षि(त ? ति)परागविकारविध्वं(सि ? स)नः, हैमवत इव रत्नाकरमखण्डपक्षः, शेष

1. A reads बहुल. page 11.
2. ,, रसा न दृष्टयः. page 11.
3. This may be amended as न मन्ददृष्टयः.
4. Our Ms. reads समदाक्षाश्च.
5. A reads पीत. page 11.

इव भोगिनिलयमखिललोकधृतिकरः, कुसुमायुध इवोज्ज्वलप्रमदवनमात्मगुणाभिभूतफाल्गुनश्रीः, चक्रवाक इव पद्मालयं मण्डलैकगतिरध्यतिष्ठद् आत्मयशःकुमुदभूषणभुवनसरःक्रीडैकराजहंसो राजहंसो नाम राजा।

यमतिमानुषाकारसम्पदमसह्य(पा ? पौ)रुषं च हरनयनहुतवहोष्मानुबन्ध[1]सम्भूतप्रतापशमनं पुनर्जातमिव मीनकेतुं मेनिरे प्रजाः। येन च गोवर्धनधरणीधरधारणोद्दामदामोदरदर्पदमनायेवारोपितभुवनभारमधरीकृतमेरुगौरवं भुजभूधरयुगलमनारतं बिभराञ्चक्रे। यश्च नयनाधरकरचरणप्रभाभिरभिनवबन्धुजीवपाटलाभिर्निजवक्षःस्थलनिवासलाभनिर्वृतलक्ष्मीविस्मृतानि कदर्थयाञ्चकारेव कमलकाननानि। यस्य च मत्तमातङ्गतुङ्गकुम्भकूटपाटनेषु सुभटमण्डलपृथुलोरःकवाटभित्तिभेदनेषु वरतुरगबलप्रलयसागरोर्मिव्यावर्तनेषु स्यन्दनवृन्दवज्रपञ्जरभञ्जनेषु[2] च व्यापारितः तदायासपिपासित इव समरमण्डलेषु बाहुदण्डो मण्डलाग्रमेचक....पुञ्जकञ्चुकितः केतकीमुकुलधूलिधवलमरियशःक्षीरसागरमशेषमाचूचुषत्। यश्च सम्यक्प्रणीयमानवर्णचतुष्टयोऽपि क्षीरसागरप्रलयपू[3]....यशाः सर्वश्वेतं जगच्चकार। यस्माच्च सर्वस्वमर्थिनोऽभयमरयः, पराजयमिन्द्रियाणि, कदर्थनां कलिरास्यं सरस्वती, हृदयं मित्रवर्गः, सर्वमेव च शरीरं महा[पुरुषलक्षणानि प्रत्यव][4]....दग्धगजघटाभिः कण्ठरज्जुकषणखण्डितत्वचो गण्डमदसिन्धुरंहोजर्जरितजटिलमूलसंहतयः स्थूलकरावलूनकवालप्रवालमुण्ड[मूर्द्धानोद्धृतप्रसूनमुकुलपल्ल[5]]....लङ्गारमिलितवल्लरीविश्लेषविषण्णमदविदाहविनोदा[6]भ्यमस्तकघातभग्नस्कन्धमुक्तरटिताः

1. A reads व्रत....पुन. page 11.
2. L. about 2 letters.
3. ,, 4 letters.
4. L. about 6 letters.
5. ,, 14 letters.
6. A reads विनोदाज्य. page 11. We may read अभ्यस्तमस्तकाघात.

पटुतरपीडोविप[1][त्ते ऽयसरन्नपि मन्ये काकुत्स्थकपि](?)....[2]मुद्वेलावनद्रुमाः। यश्च के (पद्म ? वल)मवनेरेव गोत्वमापाद्य गर्वितो वेनसूनुरिति ऊर्जिताशयः शशिकरशिशिरगुणैर्दिवं पृथिवीं दिशश्च सर्वाः सुरभीच....[3]न्वाय्यातिक्रमश्च न वर्णव्यतिकरो नवर्णव्यतिक(रंच ? रश्च) न राजाविनयशङ्का नराजाविनयशङ्काश्च नाशनचिन्ता नाशनचिन्ता चाजनि प्रजानाम्। यस्मिंश्च....[4]पाकशासनोऽपि नावग्रहं शशाक कर्तुं किमङ्ग पुनरन्ये।

स च राजा सकलराजमण्डलग्रासराहुजिह्वया संरम्भदज्वलनसंभारधूमलेखया मानमत्तमतङ्गजदानपट्टिकया प्रतिबलरभसाभिपात[5]विहतिवेलावनरेखया रिपुजीवितमधुचूषणभ्रमरमालया भुवनमहानिधानरक्षणभुजङ्गवध्वा युद्धामृतमंथनप्रथमकालकूटोद्गमश्यामिकया निजभुजाचलशिखरनिलीनमेघराशिकया वीरकामुकविजयलक्ष्मीसङ्केताभिसरणत्रियामया यममहिषविषाणभीषणाकारया खड्गरेखया कामदूत्येव चतुस्समुद्रमेखलां सङ्कुलशैलकु(च ? न्त)लां सकलकुसुमसंभार(ह?भ)रितारण्यधम्मिल्लबन्धाम् अन्तरिक्षनीलांशुकोत्तरीयां विश्वामेव विश्वंभरां प्रसाध्य विश्रान्तः प्रेमवत्सु पितृपैतामहेषु समस्तशास्त्रविस्तारविविक्तबुद्धिषु सकलकलावगाढवैचक्षण्येषु (ह ? दु)ष्टराजलक्ष्मीकरेणुकाविनयनिवारणाङ्कुशेषु दण्डनीतिप्रयोगचतुरेषु महावराहचरणेष्विव पदबन्धविधुरितभुजङ्गलोकेषु तरङ्गमालिष्विव प्रवरगुणरत्नराशिसंभवेषु निसुम्भसूदनबाहुदण्डेष्विव श्रीरत्नहरणकारणभूतभूभृन्मण्डलावलम्बनेष्वैरावतविषाणकाण्डेष्विव गुरुप्रतिमानेषु सुमतिसुमित्रसुश्रुतसुमन्त्राख्येषु मन्त्रिमुख्येष्वासज्य राज्यभारमभिनवयौवनोपदिष्टेन रागवर्त्मना मन्मथप्रतिमकान्तिरन्तःपुरेष्वरमत।

1. A reads पीडावि. page 11.
2. L. about 8 letters.
3. „ 10 letters.
4. „ 3 letters.
5. A reads अभिघातवेला. page 12.

आसीच्च तस्य महीपतेः समस्तसीमन्तिनीवर्गदेवतायमाना मालतीकुसुमदामकक्ष्यासव्यतिक्रम्यान्योन्यसदृशसौकुमार्यैरवयवै[1][रसाधारणमार्दवाभ्यां म ....मानसाभ्यामुपेता तथा सुकुमा...भुवै]व कार्मुकं, मुखच्छाययैव चन्द्रमसं, श्वासेनैव सुरभिपरिमलं मलयमारुतमवधून्वती, बिम्बाधररागबालातपभीतकुण्डलितान्धकारभारन्निभेन[2] स्वभावसुरभिणा नवाभ्रजालेनेव सरत्नमेखलविपुलशिलोच्चयनितम्बचुम्बिना मदलव्यालहसितबालहस्तेन पत्यभिसारदुर्दिनमिव[3] दर्शयन्ती, वदनचन्द्रमण्डलहठावकृष्टपुण्डरीकलक्ष्मीस्नेहानाद्रुकाभ्यां (?) मृणालिकाभ्यामिव शिरीषदामकोमलाभ्यां भुजलताभ्यामुद्भासमाना, सर्वशरीरसंविभक्तशेषाभ्यां सौन्दर्यपुञ्जाभ्यामिव स्थापिताभ्यां हरदग्धमनोभवोत्कृत्यसारकोशाभ्यामिव तथाकृतोपयोगाभ्यां धात्रा चन्दनधवलसुधालेपौचित्याभ्यां निवासकुम्भाभ्यामिव रागस्य स्वच्छमानसरसातिरेकपूरिताभ्यामिव मुक्तसाभ्यां पयोधराभ्यां भ्राजमाना, गजकुम्भकठोरपीवरकुचातिभारसाधर्म्यविपरमाणुत्वादे(?)भुवमभङ्गुरां बिभ्रती मध्ययष्टिम्, अतिघनजघनाभोगभारखिन्नो[रुदण्ड]स्थिरीक्रियोपयुक्त[4]भूयोवयवत एव तनुतरीभूतेन जङ्घाद्वितयेन राजमाना, प्रणयकलहताडितप्रियतमहृदयोज्ज्वलितरागलिप्तयोरिव न[खचन्द्रदशकरश्मिनालीकसहस्रचूषि]तेनाशेषभुवनवारिजवनप्रभासञ्चयेनैव सततमाप्यायमानपाटलिम्नोरमहारागलावण्यच्छलाद[रुणाशोकपादपेभ्यः स्तबकराशीनिव दोहदपूरण]ताडनेषु दातुं संगृह्णतोः मुखकमलामोदनिर्जितवसन्तकरदत्तमिव सर्वपल्लवसौकुमार्यमुद्वहतोश्चरणारविन्दयोर्द्व[न्द्वेन सैन्धूरीरिव दूरभवः (?) कुर्वती, तरङ्गमयी भ्रूपताकयोः], इन्दीवरमयी नयनयुगे, रक्तोत्पलमयी दन्तच्छदे, कुमुदमयी

1. There is no lacuna in our Ms. But obviously some portion is missing.
2. A word like कुन्तलभरेण. denoting the hair seems to be missing here.
3. A reads पर्यभिसारदुर्दिनमुपसारयन्ती. page 12.
4. „ भुक्त. page 13.

ईषत्स्मितेषु, सौगन्धिकमयी श्वसितेषु, अमृतमयी वचसि, प्रसादमयी मनसि, चक्रवाकमयी पयोधरयोः, [आवर्त्तमयी नाभिरन्ध्रे, पुलिनमयी] नितम्बतटेषु, पुष्करमयी च पादतलयोः, अमरसद्मन इव राजहंसोपभोगायावतीर्णा मन्दाकिनी, लीला(करा ? कला)कान्तिरागचातुर्याणि पञ्चैव प[ञ्चभूतस्था]नै प्रतिविधाय निर्मितेव प्रजापतिना, प्रावृडिव घनगम्भीरस्तननाभिरमणीया, शरदिव सरसां कान्तिमुद्वहन्ती, हेमन्तवृत्तिरिव प्रालम्बिनीहारमालिनी, शिशिरश्रीरिव नवनवमालिका, वसन्तवेलेव चारुभुजवल्युल्लासभूषिततनुलता, धर्मसम्पदिव कोमलपाटलाधरा, सर्वर्त्तुसमवृत्तितयेव नन्दनस्वभावा, सर्वावरोधजनप्रधानभूता रतिरिव कन्दर्पकस्य, शचीव शतमखस्य, शैलसुतेव विश्वेश्वरस्य, लक्ष्मीरिव पुष्करेक्षणस्य, बुद्धिरिव धनाधिपस्य, देवसेनेव सेनापतेः, गौरिव प्रचेतसो, रोहिणीव बुधभवनस्यारुन्धतीव शक्तिगुरोरसुभ्योऽपि वल्लभा देवी वसुमती नाम ॥

तस्मिंश्च सम्राजि राजीवलोचनया तयान्याभिरप्यविकलकलाशालिनीभिरविरुद्धानेकधर्मार्था(म्य ? द्य)नतिसङ्गमङ्गजसुखमश्नुवाने कदाचिदभिषेक्तुमिव दिग्जयाय पुष्पज[1]माजगाम द्रुमलताधृतैर्मधुनिवहवाहिभिः कुड्मलपुटघटसहस्रैः कुसुमलक्ष्म्याः समयः । मध्ववतारवेगोद्धूतमिव हिमजलं जगाल । दक्षिणामप्युपेक्ष्य दिग्वधूमुपेयुषि पटौ पतङ्गेऽतीवोरुतरमुत्तराशा सौभाग्यमुवा(च ?)ह दिनकरविरहे समगृहीताया[2] दिशो दीर्घनिश्वास इव मन्दमन्दमुत्ससर्प तप्यमानपान्थजनो मलयमारुतः । मलयमरुत्प्रेरितेन स्मरवैश्वानरेणैकभवन इव त्रिभुवने सुरासुरमुनिमनुजमादीप्यमाने तद्दाहप्रतीकारंक्षमाणि पयोधरकलशसहस्राणि शरणमेकमचकमत कामिजनः कामिनीसमाजस्य । चित्रोपसृत[3]प्रियो…

1. Does this word denote Madana ?
2. Shall we read तमगृहिताया:.
3. A reads चित्रोपसृत. page 14.

बाष्पवारिपूरप्लुतेषु प्रोषितानां हृदयेषु पाययितुकाम इव कामज्योत्करः प्रकाम-[1]दीप्तानिषून् चिक्षेप । सहकारतरुतलास्तीर्णकिसलयशयनशायिनीनां कामय(मान्)-[2]कामिनीनां कामश(री ?)रक्षतेषु क्षारक्षेप इव मर्मसु मधुरसविसरः परभृतनखमुखोद्दलितकुड्मलगर्भनिर्गलितः पपात । तस्मिंश्च समये रतिसमरविधिविशारदकुसुमशरशिबिर[3]नीराजनज्वलनज्वालावलीषु च राजपुरन्ध्रि(ज[4] ?)माहारजतोवरीयांशुक[5]पदीषु सकलजगत्प्लावनोद्वेलरागसागरतरङ्गवेणिकासु विकसन्तीषु रक्तकुरवा[6]-शोकशाल्मलीपलाशवादि[7]भद्रडाडिमजपाराजिषु, रमणी[8]चरणनलिनताडिताशोकरोषप्रोत्साहिताशेषवनसमाहृतशशिकरकलाविभ्रमेषु, निरन्तरपतच्छिलीमुखप्रकरजर्जरितन्य[9]क्षवनविविधवृक्षविग्रहधवळर्क्षपट्टबन्धेषु, अन्धकमथनमन्युसन्धुक्षितेक्षणाशुशुक्षणिक्षपितहृच्छयोच्चयभस्मभासुरेषु स्मेरेषु करीरकेसरेषु, सितसिन्दुवारबकुलसा[लतिलक]नवमालिकादिषु, ललितमाधवपीतवाससि मधूक[10]वनस्थलीदिष्टिवृद्धि[11]पिष्टातकप्रकरेस्सुदन्तिकटकिङ्किरातकर्णिकारचम्पकप्रकरेषु(?) स राजा मत्तवा[रण इव वशाभिर्मत्तकाशिनीभिः परिवृतो] मधुमत्तमधुकरकदम्बकान्धकारितक्रोडानि क्रीडावनान्यवगाहत ।

तत्र च मदरक्त[12](कत ? तम)कामिनीकपोलरागसन्ध्यागमविधुरितसरश्च[क्रवाकमिथुनकानि बध्नत्पानगोष्ठीमण्डलानि] त्रिदिवमेदिनी(म ? मा)नोज्ञकान्तर-

1. A reads प्रकामानिषून्. page 14.
2. See supra कामयमानकामिनी. page 20.
3. Our Ms. reads शिल्पिबिर.
4. A omits ज after राजपुरन्ध्रि. page 14.
5. A reads अंशुकवतीषु. ,,
6. ,, कुरवक. ,,
7. A reads पारिभद्र. page 14.
8. ,, रमणीय. ,,
9. ,, न्यश्मपवन. ,,
10. Our Ms. reads मधुक्त.
11. A reads वृद्धिविघातक (पिष्टातक?) प्रकरे(र)स्फुटाम्निकट. page 14.
12. ,, ततकामिनी. ,,

दिदृक्षया कौतुकादिवाव्यवस्थितगगनानां खेदखेदि[वा ? ता][1]लक्तकरक्तमेघपल्लवानि भ्रान्तकुन्तलभ्र[मितदुर्दिनो . . . . गीयमानखवि]क्रमापदानानि पश्यन् यन्त्रदोला[2]प्रेङ्खितानीर(?)कोमलकु(सु)मकिसलयोत्तरच्छदासु विलोलपल्लवान्तरप्रविष्टपवनालोलितलतागृहोदरमणिवे[3][. . . तची]नांशुकान्तरीयाणामपि करनखमणिरश्मिसंवलितरलमेखलामयूखजालजल्पितदुकूलकर्मणामन्तःपुरसुन्दरीणामारणितरलशर्करीतुलाकोटिपारिहार्याङ्गदानि प्रेङ्खोलितहारदीधितिप्रकरकर्पूरचूर्णावमुच्यमानश्रमस्विन्नकुचतटानि मधुरविवाददत्तदन्तच्छदच्छिन्नसन्धिप्रतिसमाधानदत्तसदयलीलाचुम्बनानि गाढालिङ्ग(न)मृदितकण्ठदामप्रतिनिधीकृतप्रियतमेक्षणकुवलयस्रञ्जि मञ्जुविहङ्गभङ्गिरातिप्रपञ्चमूर्च्छिताङ्गजविदाहवेगानि रागसाम्यसमाहितरसोत्कर्षाणि राजवृषो रतानि निर्विशन्नुपवनविषयिणीमृतुविभूतिमनुबभूव ।

प्रवृत्तयोश्च विचित्रपुष्पयोश्चैत्रवैशाखयोर्दैत्यराज्यमिव शुचिशुक्रमयं, यमसौराज्यमिव प्रतिदिनवरुणायमानेनकरविरसीक्रियमाणलोकं, रक्षोराज्यमिव परिलघुप्लवङ्गलङ्घ्यमानहीनवाहिनीजलं, किंपुरुषराज्यमिव द्रुमगणगुरूष्मवारणवनोत्सेकरागहर्षकिंपुरुषं, मन्मथराज्यमिव मरुद्गणभ्रमितपत्रमण्डलोपरुद्धसुरभव(न)मुष्मातपमनुबुभूषुः उत्फुल्लकमलरक्तोत्पलानि प्रदीप्तानीव घर्मभयप्रविष्टेन कन्दर्पानलेन, दलशीतलजालिकाजातशीतलजलतलानि(?) दारुणनिदाघगलितशिशिरकारागृहाणीव मधुकरकुलबहलकालान्धकारकालोदराणि करतलोदरीभिः सह सरांस्यवजगाहे ।

I. A reads अलक्तकमेघ. page 14.
2. ,, प्रेङ्खितानां कोमल. page. 15.
3. L. about 7 letters.

प्रविशन्तीषु च प्रणयिनीषु प्रियसखीष्विव प्रत्युदस्थुः प्रसारितोर्मिहस्तदत्तगाढकण्ठग्रहा वाप्यः । प्रबलविपक्षविक्षेपवारिदुर्गप्रतिस्तब्धैः प्रसभमिवोदीर्णदण्डैः पुण्डरीकैर्विमुक्तास्तत्प्रतिद्वन्द्विषु मन्दशङ्कं सुन्दरीमुखेषु शिलीमुखा निपेतुः । निजमज्जना[1]भ्युपायव्यसनितस्य पुरुषपातनिष्षर्धरगणस्य भोघाभ्रान्तिदिदृक्षवः कटाक्षा[2] जम्बामो (?)गर्भशायिनीनां पक्ष्मलाक्षीणामुदवर्तन्त क्षोभतरलितास्तरुणशफरकाः । नृपनितम्बिनीबिम्बाधरचुम्बिनो नाभिजज्ञुरतिचपलाः सरस्तरङ्गाः अर्थ[3]मानमानमानसम्(?) अपितु विलसन्तो विसर्पिणां [4]रागमूहुः । प्रतिमुखस्थितकुवलय[5]कोपादिवातिवामानि भामिनीनामरज्यन्त लोचनानि । चकोरलोचनाकुचारोहचक्रसम्मर्देऽपि कलुषीभवद्भिरम्बुभिरौत्पत्तिकत्वं जलत्वमनक्षरमाचचक्षे । गुरूनपि निरपेक्षो जघान वारिवेगो वरोरूणामुरोरुहभरान् । न हि विवेकः क्षुभितस्य । जलमध्ये मौनमाचरन्तो मेखलाकलापाः स्थान एव गुणत्वं समर्थयाम्बभूवुः । [6]अपास्तालक्तकैरपि रागेणैव दशनच्छदकिसलयैर्व्यजीयन्त रक्तकुवलयवनानि । ह्येषामनेकशो रतिरणप्रणीतोत्थितानां प्रतिस्पर्धिजये सहायकृत्यम् (?) । इत्थं च वर्तमानासु वरपवतुणीतीनां वक्रव्यतिकीर्णापि विकीर्णितोर्मिषु करपुटसलिलसेकलीलामृतालिकासु प्रहेलिकासु(?) महीशोऽपि महावराह इव वहन् वक्षसा वसुमतीं देवीमाकुलाकुलामालोलयन्नप[श्च]चाल । चिकुरांसतटश्चिक्री[डि] क्रीडासु प्रकीर्णप्लुतनिम्नगाधवस्यास्थलव्यचारपतितद्रव्यविचयव्यतिकरभेदादष्टमार्गया जल-

1. A reads निमज्जनाद्युपाय. page 15.
2. ,, कटाक्षानम्भोगर्भ· page 16. Shall we read कटाक्षा इवाम्भोगर्भशायिनीनां.
3. ,, अर्थमानानामाननमपि· ,,
4. ,, मार्गमूढः· ,,
5. A reads क्रोडादिव. page 16.
6. ,, अपास्तालक्तकैः केनापि निराक्षेनैव. page 16.

क्रीडया। तत्प्रधानाङ्गेषु च [स्फुटगद्गदगम्भीरमेदादिस्वरेण] निगृहीतामुक्तसंज्ञेन सलिल[1]वाद्येनानेकमधुरकरणरमणीयेन रममाणं रमण्यः काश्चित् करपल्लवसम्पुटोत्पीडितमुक्तैः [प्रीतिपल्लवद्वैरिवैनं धाराजलैः] [2]....गुरशृङ्गकोणमुखमुक्ताभिः कुङ्कुमजलधाराभिरनङ्गपन्नगमुखशिखिशिखाभिरिवावचकरुः । अपरा [3]विपक्षव्यञ्जितवि[लासरागरोषिता रक्त]कटाक्षमालाभिरेव जिह्मनाम्नीभिः कौसुम्भसरिद्भिरिव सरभसा विधुरायमाणम[4]ाचक्रुषुः। इतरास्तमसीव पयसि दुर्विभागगतयः करतलकमलावष्टम्भप्रसक्ता याहच्छिकैर्नाम तच्चरणमूलघट्टनैः स्पर्शातिशयानुमेयमानप्रार्थनाप्रणिपाता न कृपणमन्वतिष्ठन्त ।

[5]अवनिपो गर्विता व्याकुलयन् , मुग्धाः सन्तारयन् , भीताः समाश्वासयन् , कुपिताः प्रसादयन् , मुदिताः प्रोत्साहयन् , प्रस्थिताः प्रतिरुन्धन् , कासांचिदुत्पलाशां वल्लीमिव सफलयन् , कासांचित् पद्मरागं रत्नमिव सम्पादयन् , कासांचिदमन्दमारभमनो(?)रंशुकान्यलक्ष्यगतिराक्षिपन् , कासांचित् कमलरजस्सङ्गधूननच्छलान्निरञ्जनस्निग्धताम्रतरळताराणि नेत्रोदराणि चुम्बन् , कासांचित् कामायतनेषु कामशरानिवादृश्यपातान्नखानर्पयन् , निबिरीसविलासश्चण्डातकपरिहितः पर्याकुटिलकुन्तलोत्तरापाङ्गलोचनः कुङ्कुमरागलोहितौघप्लुताङ्गः सन्त्रासितसकलराजहंसनिवहो विहृत्य समरादिव सरसः सह(प्रयाभिङ्गं ? प्रियाभिर्जय)श्रीभिरिव निर्जगाम जगाम च।

[6]मज्जनानन्तरमनुष्ठितयथोचिताभिषेकमङ्गलो यथाविध्युपस्थाय तिग्मभानुं भगवन्तमुपास्य चित्रभानुम् , अभिराध्य च देवं देवकीसूनुं, सह सुहृद्भिस्त्वगनुसारिणा सुरभिचन्दनरसेन कृतसमालम्भनः कुशलसूदसाधितेन शोधनकल्पनप्रक्षा

1. Our Ms. reads वाद्यानेक.
2. L. about 14 letters.
3. Our Ms. reads विलक्ष.
4. A reads आचुकुशुः. page 16
5. ,, अवनिपोऽपि ,,
6. ,, आमज्जना. ,,

ळनप्रतिस्तम्भनमार्दवकरणशीतीकरणप्रसादनस्नेहग्रहणवर्णक्रियागन्धोपसंहारषड्वर्गसम्पादनस्नेहविचारपङ्क्तिसंज्ञाभिस्त्रयोवशत्रिधाभिरनेकावान्तरविकल्पाभिः क्रियाभिरुपसंस्कृतेन स्वात्मोचितेन सरसं खाद्येनामृतातिशायिना पटुपाटलपरिमलामोदनिर्हारिणा स्पर्शानुमेयेन पानीयेनाहितधृतिराधाय धूमवर्तिमाचान्तो बहळपारिजातसौरभोद्गारिक्रमुकफलशकलानि शकवधूटीगण्डपाण्डुरां च ताम्बूलवीटिकां जरठपाटलीपुटकोडपाटलं च शङ्खचूर्णं त्रयं च तिक्तकटुकविशदं विमर्दोष्णं लपनलाघवकरं चोपयुज्य रज्यमानदशनावरणो मणिकुट्टिमपथेन गत्वा प्रसाधितं भुक्तास्थानमण्डपमतिमृदुनि क्षौमपाण्डुनि स्थानदत्तचीनपट्टोपधानके पुष्पवाससुरभिणि हैमप्रीतिपादुकाप्रतिष्ठि(त)प्रवररत्नचित्रपादे पादपीठसनाथपार्श्वे प्रत्यासन्नसौवर्णप्रतिग्रहे शयनपर्यङ्कतले मुहूर्तलब्धविश्रमः सन्निहितेष्टसामन्त(:) चित्रालापचिरविनोदिनो विसृज्य णद् (?) विलम्बमाने कदम्बमुकुलकिञ्जल्कपुञ्ज(र?)त्विषि त्वरितप्रवर्तितस्यन्दने सन्ध्यामुखचुम्बनाभिलाषिणि क्रमेण मन्दायमानोष्मणि[1] मणिशिखा[2]सुकालोकलोपनेव(?) सुखविविक्तोद्गन्धिनैपथ्यरमणीयेन विजृम्भमाणमल्लिकामुकुलदामप्रलम्बोत्तरीयरमणीयेन सुन्दरीजनेन चन्दनसलिलसंक्षाळनशिशिरेषु स्मेरमल्लिकोपहारेषु सौधहर्म्येषु [3](सु?स)मगंस्त । सङ्गीतगीतगोष्ठीभिश्च प्रियविदग्धसुहृत्सखः प्रदोषमनैषीत्। [उत्तरयामद्वयमुन्मद] मञ्जुवादिनीजनमनोविधेयवृत्तिरगमयत् ।

एवं च परिसमापितग्रीष्मस्याशेषशिरीषश्रीमुषः क्षपितकरञ्जमञ्जरीत्विषस्त्विषिमत्सोमगो[लकरतिरस्क्रियारम्भजजम्भकाजनाभिनिब]र्हणाज्ञा[विजृम्भि]ताम्भोदकोटयः कुटिलकोमलतटितो विघटमानकुटचकुड्मलामोदलिप्तककुभः केसरसुरभित-

1. Following this there should have been a synonym of sun in the locative case.
2. A reads सुखालोकलोचनेन. page 17.
3. ,, सुमंस्त संशित. page 18.

नभसः सुरचाप..[1][चन्द्रकिबर्होत्तरारसिता भूम्न्योपगुप्तार्कगोगणा]गणतिथहप्तातकस्रजः(?)सुजातजातिजातयो मुदितमुग्धयूथिकावर्षन्नववार्षिकीलता ललितलाङ्गलीकलिका मुकुलितनिचुळवीथयः फलितपूतजम्बूपङ्क्तयः [विकचकदम्बचुम्बि]वाचालमधुलिहः सलिलकणस्यन्दिमन्दमरुतो रुतमुखरभेकभेरीभीमागमनिशीथा निशिथिनीभेदाब्दुर्दिनदिना(?)द्रुतमनोभिसारिकाभिद्रुतदयितोदवसिता विकसितवलाका[लीध]वलितभुवो भिन्नसिलिन्ध्रबन्धनाः सिन्धुरमाम[2]न्दगर्जितघनाघनस्तनयित्नवो नवजलसेकनिर्वृतिविनीतकेतकीगर्भखेदाः पादचारक्षमश्यामलशाड्वलवनस्थला नीलकण्ठनृत्तलीलाविलासिनः सन्नपन्नगकुलाः कूलमुद्रुजो[3]दकोद्रवत्सरित्तरङ्गिणीशताः शतमखगोपावलीप्रवालमेखलाधृतवनस्थलीनितम्बपार्श्व[4]विश्वविश्वम्भराङ्गारूढसरसः स्य [5]यौवनावनजपनवस्य सनदायिनो (?) दीयमानदानवारियोगनिद्रासुखाः सुखमया इव प्रादुरासन् प्रावृषेण्या वासराः ।

(तासु ? तेषु) च ग्रीष्मातपातुरत्रिलोकलक्ष्मीविश्रान्तिधारागृहेषु वर्षावासरेषु कुटचकुड्मलहारमालिनीभिर्लम्बकदम्बकाञ्चीदामभिः केतक[6]बर्हदन्तपत्रभूषितश्रवणपाशाभिर्मदमयललामलाञ्छितललाटिकाभिरार्द्रगैरिकरागरञ्जितचरणपल्लवाभिः कुन्तलवलयिनीभिः सुन्दरीभिः कृतकिरातनितम्बिनीवेषविभ्रमाभिरटन्मृगेषु नटच्छिखण्डिषु, स्फुटन्नीपेषु, रटन्निर्झरेषु, वर्षजलधाराधौतरत्नोपलतलेषु क्रीडापर्वतेषु विजहार । धारारवद्विगुणबृंहितमदरागं च वार्षिकवृक्षवल्लीगुल्मगुलुच्छकच्छन्नमार्गेषु कृष्णागरुसारधूपसञ्चारोष्णेषु मणिदरीगृहेषु मत्तरामाद्वितीयो रेमे ।

---

1. L. about 3 letters.
2. A reads मन्द्र. page 18. Shall we read सिन्धुरामन्द्र.
3. ,, दकीद्रवत्. ,,
4. A reads पार्श्वापार्श्वविश्वम्भराङ्गावरूढ. page 18.
5. ,, पवनस्य....सन. ,,
6. ,, केतकदन्तबर्हपत्र. ,,

मण्डलचतुरश्रायतासु चावर्तवतीषु च [1]रत्नमण्टपगर्भवापिकासु कदुष्णवारिपूरितासु कनकपद्मशतावतंसितासु घर्म इव लीलया गन्धगजगामिनीभिः समं समक्रीडत। निबिडितासु च निशीथिनीषु मन्मथमथितधृतीनां दुर्दिनाभिसारिकाणामासारजलापराधक्लिष्टनैपथ्येषु गात्रेष्वादरप्रतिसमाधीयमानमण्डनस्तासां च स्वजनवञ्चनापदेशकौशलेषु श्रूयमाणेषु [2]संहर्षेणेवासन्नकृतकलीकानीलांशुकावगुण्ठनस्यान्धकारराशेरुपक्रियायामुपन्यस्तायामात्मनि पुरुषाभिमानमारोपयन्, क्वचिद्भवनभित्तिस्पर्शपरम्परोन्नीतपद्धतौ क्वचित्तरलसौदामिनीदामदर्शितपुरोभागे क्वचिन्नागरिकपटहशब्दगम्भीरगर्जितमुहूर्तमात्रविह्वलावस्थाने क्वचित्प्रतिरोधकानामिवाम्बरग्राहिणां प्रथमाभ्राणामविरलशरवर्षासारसम्भ्रमाश्लिष्टमन्दिराङ्गणमार्गपादपस्कन्धे प्रसङ्गोदीरितरागाभिसरणसाहसे सानुकम्पप्रम[3](प?)दमापद्यमानः स्वतिशयोपचार[4]सान्त्वनमहल (?) रसमनेकधा सुरतलास्यमत्युदारतरलितविभ्रमं बबन्ध ।

बन्धागारगर्भादिवाभ्रपञ्जरान्निर्गच्छति पुनरुच्छ्वासभाजि भुवनेऽन्तर्ग[5]तैरावतप्रवम इव स्वस्तेमवने [6](?) चिरनिरोधसम्पीडिकास्वतामामर्षितार्तकरप्रतीकेष्विव (?) प्रक्षीणवारिषु वारिधरमहाह्रदोदरेषु, स्व....[7][मोद्घोष]णविरामपूकेषु स्तो(कि?क)केषु, गलितपयोधरांशुकासु लज्जयेव क्वापि लीनासु ह्लादिनीषूद्विमहावलाहकाचूषितवर्षवारिपूरस्यान्तरिक्षसरसो [मरकतकुटीष्विव स्फुटीभवन्तीषु] नीलकण्ठकण्ठमेचकासु दिक्षु शुनासीरशरासनकलवर्णेषु शीर्णेषु शिखिबर्हेषु प्रतिबद्ध-

---

1. A reads चरणमण्डप. page 19.
2. ,, संहर्षेणावसन्न. ,,
3. ,, प्रमदामापद्य. ,,
4. ,, महत्वरस. We may read बहलरसं.
5. A reads गैतैरापतप्रभम इव ध्वस्ते मेघवने. page 19.
6. ,, सम्पीडितस्वधामामर्षीतार्त. ,,
7. L. about 5 letters.

मुकुन्दलोचनारविन्दवारितवारिधरभयेष्वि[1][व प्रवृत्तेष्वितस्ततो विजृम्भितमम्भोरुहवनेषु पन्नगेभ्य]इव निर्विषेभ्यः पयोदेभ्यो विहाय भयमतिपतत्सु रात्रिन्दिवमध्वनोऽध्वनीनेषु, सकलाब्दकलुषितासु बहुमुखासारपा[तावि...दत् स्वयमेव क्रमादु]-[2]पागतप्रसादासु, चिरक्षोभानुबन्धलज्जयेव मन्दमन्दं वरुणालयमुपसर्पन्तीषु प्रतनीयसीषु फेनमालिनीषु, मधुपोन्मादबन्धने मदगन्धविदग्धविशारदे शारदे विदारयति मनांसि मानवतामनङ्गवारणानीके सप्तपर्णवने, कुसुमधवलमूर्तिषु कुसुमशरशरावलीष्विव (वि)रहि(त?)जनहृदयदारिणीषु समन्ततः पतन्तीषु हंसमालासु, वसुधाविभ्रमहेमचूर्णैरसनरेणुभिरभिनवमनसिजातुराखि(भ ? व) सु[3]भगदर्शनासु वनस्थलीषु बाणमालिनीरिषुधिरिव मनोभुवो भुवः परिहरत्सु[4] माधिच्छेदशङ्किषु(?) स्वमुखानेकवारोदीरितमधुरशात्कृतिग्राहिणीनां शुकश्रेणीनामचकितमुक्तमञ्जुलप्रतिशात्कारशासितास्वनुमन्यमानकलमकणिशभङ्गासु कलमगोपिकासु, सकलकामुकानीकोत्कम्पकारिणीं खड्गधारामिव श्यामामालम्बमाने द्विगुणतेजसि ज्योतिषामधीशे, शान्तगर्जितानि शशाङ्कपादच्छायाश्रयीणि शाल्मलीतूलपरिलघूनि मेघकुलानि विलोक्य दर्पादिव मत्तमधुकरीमधुरध्वानगर्भं हसन्तीषु कुमुदिनीषु, विशदायां शरदि शारदशशिकरासितचन्दनधवलहिमजलबिन्दुशीकरशीतलासु श्लथमानशिशिरशेफालिकोपहारहासिनीषु हर्म्यमालासु मधुभाषिणीमधूनि माधवानुभावपूर्णेष्वपि मनोमणिचषकेषु स्वकरतलोपधानच्छायोपरक्ता रिक्ता इति मुग्धयुवतयः क्षणमनीहमानाः पातुमस्थुः(?) । प्रहसता पुनः प्रियेणावार्यन्त । [5]मत्तकाशिनीवक्त्राम्बुजचुम्बनाशयेवास्तव(ता ? तर)ङ्गमालासु छायामयः पपात राजहंसः । सह मधुना सुवदनाभिपीत[6] एव प्रतिमासु शशीत्युन्मदानां तासां

1. A reads भयेष्वि. page 20.
2. „ प्रसादसुचिर. „
3. „ सुभगासु वन. „
4. A reads हरत्सु समाधि. page 20.
5. „ मत्तमत्तकाशिनी. „
6. „ सुवदनाभिपीत एव प्रतिमाशशी. page 20

रुरुदुरिव स्वादापदेशा(दा)ननेन्दवः । तथा स्निग्धाः सन्तोऽपि पश्यन्त एव तारापतेरात्मनि सं[1]क्रमास्तीस्तरलतारास्तारका(?) न प्रत्याचचक्षिरे मृगाक्षीणां प्रक्षरितस्वेदबिन्दवो मुखेन्दवः । कस्य वा स्त्रीनिमित्तं न हि विद्यन्ते प्रीतयः । सोऽपि सोमस्ता इवानुसरन्निपत्य तत्रै(व) सममज्जत् । न त्वशकत् प्रत्याहर्तुम् । स तैरपि तारान्तरसङ्क्रान्तिमन्थरै[2]र्वलम्बल (?)नितम्बिनीनां वदनपङ्कजैः कुमुदबान्धवः । फलितं हि गुरुतल्पगस्य तस्मिन्नेव देहे पातकमर्हति(?) । (हि)मकरपराभवदर्शनप्रविष्टा इवान्धकाराकृतयो ननृतुर्नतभ्रुवां भ्रुवः । सुधीरोऽपि रिपुव्यसने हर्षाद्विक्रियेत, किमुत निसर्ग[3]चञ्चलाः । कपोलसङ्क्रान्तचन्द्रश्चन्द्रोदय इवोन्मदानामुन्मीलितकुमुदकाननो वरानना(ना)माविरासीदमृतसम्मितः स्मितोद्गमः । मदिरातरङ्गभङ्गरङ्गं मृगाङ्कलक्ष्मणि चषके दूरमग्नसहचराधिया कृपणबद्धदृष्टिषु करुणमारसन्तीषु भ्रमरकामिनीषु कलगिरोऽपि मदकलास्तथै[4]वान्वशोच(य ?)न् । प्रहसत्प्रियप्रबोध्यमानाश्च याथार्थ्य[5]ज्ञानयोगात् लो[6]कितकुरङ्गलाञ्छनाः तमपि प्रबुद्धबन्धुजीववनवि(ल?ड)म्बिना स्वलोचनप्रभासञ्चयेन सञ्छाद्य तत्राप्यदृश्यमानमृग[7]कलङ्का भङ्गुरिताक्षीभ्रुवो(?) वञ्चकास्मान् वञ्चयस इति कर्णकुवलयैः कान्तमंसयोरताडयन् ।

असा[वपि प्रियतमोपहृता]ननवनजवारुणीगण्डूषपानरक्तगण्डो गण्डलग्नरजतपुण्डरीकमिव कर्णचामरविभ्रमं प्रतिबिम्बमृगाङ्कममलं दधानश्चन्दनधवलमूर्ति[रिन्द्रवारण इव मन्दाकिनीपयसि चन्द्रिकाजालके] विजहार ।

1. A reads संक्रामन्ति तरल. page 21.
2. „ र्व्यलम्बत नितम्बिनीनां „
3. „ चपला: „
4. Our Ms. reads तथैलेव.
5. A reads ज्ञानायोगात्. page 21
6. „ योगितकुरङ्ग. „
7. „ कलङ्को भङ्गुरिताक्षिभ्रुवो „

हरिणधरकरपुटावसिच्यमानामृतलवापनीयमानखेदश्च राजपेशलातिशिञ्जानवलयमञ्जुलमञ्जीरकाञ्चीगुणानि गर्जदङ्ग[1]जानि व....[2]रतानि रात्रिश[3](?)ततान ।

तदनु तामरसवनानि पाणिवदनपुनरुक्तदोषपरिहारार्थमिव संहरन्नबलालोचनद्युतिविलम्बनदुरवलिप्तानि कुवल [यवनानि मृद्नन् दारुण] शरदातपद्रा[4]वितजलीकृतानि घनकुलानि तुहिनशीकरव्याजादिवा(व)किरन् हिमकरगृह्यतयेव सर्वौषधिषु गौरवमारोपयन्नीहारद्रोहादिव नित्योपगूढपावकान् वनस्पतींस्तिरयन् , निजरिपुवारिजन्मवर्धनरुषेव जलान्युद्द्राण्पयन् , सपक्षानुजिघृक्षयेव निसर्गशी तलानि मौक्तिकाभरणानि वि[5]श्रमयन् , अखिलजीवलोकतरुकुलताषण्डफलभराकाण्डलुण्टाकडामरीकदमनदीक्षित इव पतिमण्डलानि सङ्कोचयन् , सकलत्रिभुवनरसहठापहार[6]पराभवदुर्विकत्थनं तस्करमिव भास्करं निरुन्धन् दिवि, नतवाञ्छम्यवर्धितानि दिनविदाहविस्फूर्जितानि वर्तयन् निगृहीतसर्वसत्त्वस्वच्छन्दपर्यन्तः संवृतप्रायसर्वारम्भोऽव्यजृम्भत स्वभावशीतलो हेमन्तसमयः ।

तस्मिन्नपि समये दलितहिमजालिमद्भिः(?)अनलज्वालाकबलितमलयजैघसामायसीनां हसन्तिकानां सहस्रैः सन्निहितविलासिनीयौवनविदाहाधाहितनिदाघेष्विव महत्सु मन्दिराभ्यन्तरेषु तुहिनपटलातिभारभयनिलीननभस्तलास्विवानवरतदह्यमानकृष्णागरुबहलधूपदुर्दिनान्धकारासु मलिनदिगङ्गनामुखविलोकमाक्ष[7](म)तयेव गाढविवृतगवाक्षेक्षणासु प्रासादपङ्क्तिषु गन्धतैलावसेकसुरभिगन्धिभिः करतलकलितामिर्दीपिकाभिर्लोकसङ्कोचकृतो हेमन्तरजनीरिवान्विच्छता परिजनेन परिवृतो यथर्तुवेषः स(ह) महिष्या महार्हं शयनमारुरोह ।

1. A reads गर्जदङ्गजानिव भङ्गिमन्ति भङ्गुरितमाद....वलिप्तानि page 21.
2. L. about 12 letters.
3. Shall we read रात्रिषु.
4. A reads शरदातदपत्राणि कज्जलीकृतानि घन page 22.
5. A reads विभ्रमयन्. ,, 22.
6. ,, हठापाहर. ,,
7. A reads विलोकनाकुलतयेव. ,,

तस्मिंश्च रक्तनीलधवलकान्तिना प्रियतमेक्षणा[1]र्धप्रभासञ्चयेन चित्रकञ्चुकेनेव छाद्यमानो, हृदयविजृम्भमाणमन्मथहुताशनोद्गारकल्पेन तत्कालोचितेन कुङ्कुमाङ्गरागेणेव रागेणाधरपल्लवस्यानुलिप्यमानः, कर्णकथनीयमन्मथगुह्याख्यानेषु कुन्दकलिकाभिरिव स्मितमयूखमञ्जरीभिः क्रियमाणावतंसः, क्षणमधिवाह्य प्रणयकथाभिरुपपादितरतोत्सवोपकरणासु निर्गतासु परिजनवधूषु मधुरचुम्बनोपक्रमप्रवृद्धरागावेशो, विवशस्फुटपतितदशनपद्धतिरुद्धूतवेदनाकलहितलाभपल्लवा(?)द्विगुणपीडिताधरमणिमुखग्रहणविग्रहोपयुज्यमानशिखरनखरलीलायुधः सललित विसंवादनिर्गमप्रतिबद्धरुद्धनीविकांशुकपरिपन्थिकोपलीलाकुञ्चितभ्रुकुटितर्जितो,रमसकचग्रहव्याकुलविलोलधम्मिल्लबन्धसन्धुक्षितमन्मथातिस[2](म्भ्रा ?म्भ्रमा)न्तरितविरोधानरोधनपयोधरानिगाढो (?) गुरुनितम्बसम्मर्दवर्धिताक्रन्दचलतुलाकोटिकमुद्धतस्तनतटनिबिडपीडाकम्प्रम[3]ध्ययष्टि दष्टाधरसम्भ्रमभ्रान्तमुग्धलोचनमाश्चितकररुहलिख्यमानकपोलविह्व(न?)लाननव्यञ्जितस्तानितकूजितमलके चुम्बनविमृदितागरुतिलकमाङ्गपारिप्लवस्वेदबिन्दुरेखमुद्दामरागदीयमानयुवतिपौरुषमुपोढालक्तकपदपालीरक्तमकुरतरङ्गोत्तरच्छदमुच्चलितचिकुरपल्लवि...[4]परितगर्भगृहतलमलकवासचूर्णविसरधूसरितोपधानमग्राम्यविकल्पविभ्रमरमणीयमायतायतं सुरतमाचचार ।

गमितहेमन्तश्च हेमन्तातिग....[5][शत्ये शैत्यशान्तशकुन्तकान्ता]मुक्तकोटरशते शीतालुजगत्प्रतीक्ष्यमध्यन्दिनातपे तापसतपःसम्भारभावनोचितेऽपि तुहिनद्रोहदुर्मुखपथिकजनप्राणा[पालनज्वलितपुण्यानलसकलसहे (?) सुभगभासुरहसन्तिकासहस्रे] सहस्ररश्मिाश्रितशीतघृणिशिले श्लाघनीयपक्ष्मणि मृगरोमणि[6]

1. A reads प्रियतमेक्षणप्रभा. page 23.
2. A reads सम्भ्रान्तान्तारितविरोधनपयोधराविगाढो. ,,
3. ,, पीडिता कम्प्रमध्य. ,,
4. L. about 7 letters.
5. ,, 10 ,,
6. A reads रोमणि मणिदास.

दामावहेलहेतौ बहुलितबहळप्रवारस्पृहे प्रियप्रियङ्गुजन्म[नि मन्मथैवकुलवृन्दानन्दिकुञ्जकुञ्जे पञ्जरजालकाररीपुट] घननयाच्छावाचाटहिमजलध (?)[1]जठरपुष्करे पुष्करादृजिरोप्रसम्पदि (?) गतिधृतकन्दराशयालुशयुश्वासोष्ठनिश्चलसुखायमा[नमृगशिशौ शश]विचयाक्षण्वकुण्डचके (?) शय्यातलमुक्त्यशक्तकामुकमिथुने नूतनगर्भभारमन्थरमाधवीलते[2] ललितमारुताकर्षणसुकरणपरिणमत्तरुपलाशे शीते(!)[3] इतरतटाककीलालमज्जनाग्निकाकुलतुमुलधूमुकधूमधूमळोषसि दुस्सहप्रदोषदुर्भगोडुपे दुर्भेदस्फटिकदलबहुतुहिनघन्घनसार[4]हरितपुष्करहरिणशफरुके शिशिरकाले मीलयति भुवनमग्निकदूषे (?) रोमकम्बलकृतावगुण्ठनः परिमृदुत्राणचर्मकञ्चुकितचरणपद्मो हिमसत्रासिसारित(?)प्रमदवनप्रासादवेदिकादत्तसङ्केतमञ्जुजातलङ्घितभामिनीभयमन्तःपु(न?)रनाटकीयकन्यकाजनमाभिनवरसास्वादलालसोऽभिसृत्य सुसङ्गीतपरिजनागतप्रतीहारभूमिकेषु घटितगवाक्षावरणसम्पुटेषु लीलापचकरेषु(!) मधुराश्वासनमितवल्लभाशङ्कमङ्काश्रवणाय[5] च क्षणविहस्तास्थानमायस्तहस्तपल्लवव्यवहिताधरपुट[6]विघटितस(र ?)रसचुम्बनारम्भरागविवलिततनुलतोल्लसत्काठिनकुचमुकुलमुद्भिन्नपुळकजालजर्जरकठोरपाण्डुरेखमसकलगळदंशुकश्रोणिबिम्बझणझणायमानप्रवाळकाञ्चीगुणम् अविरलघर्मवारिवर्षदूषितविशेषकन्यासमदर्शितपथप्रलब्धसदयदन्त.[7] . .वसनास्वादमा[8]कम्पमानप्रथमयन्त्रणोन्माथमन्थरोहदण्डमकाण्डवलनभङ्गुरितरतिलयमङ्गस्ताम्भितान्तरक्षीणविरामदत्ताश्वासमश्रुगर्भतरळतारकेक्षणभ्रमणकारितकरुणमा(तु)रकृपणकोमलाञ्जलिघटनया[9]चितावसानमनलसोपलभ्यमानसद्भव[10]रसं चोरिकासुरतर[11] (स)तृप्तिमन्वगच्छत् ।

1. A reads हिमजडजठरे पुष्करे. p. 23.
2. ,, लतेव. ,, 24.
3. We may read either शीतलतर or शीतेतर.
4. A reads सारहरिण. page 24.
5. ,, श्रवणाय च न क्षण. ,,
6. A reads विघटितसमरस. page 24.
7. L. about 1 letter.
8. A. reads कम्पमानमप्रथम. page 24.
9. ,, याचितमसनमनल. ,,
10. ,, सद्भवनसञ्चारिकासुरतसतृप्तिं. ,,
11. Our Ms. reads रसमतृप्तिरन्वगच्छत्

शीलज्ञवल्लभापसर्पविदितविभ्रमश्च समरदुर्लभं भयमुवाह । प्रकुपितप्रधानावरोधसङ्गृहीतश्च तज्जघननिरवकाशरशनागुणनिगळितचरणः प्रणयकोपकुञ्चिताभिर्भ्रूलताभिराहत इव तासामासादितहृदयवेपथुररुणाशोकपल्लवैरिव[1] चरणकिसलयैरुरसि ताड्यमानो मदनशरक्षरितैः क्षतजैरिव सामर्षस्वेदसलिलक्षालितैः पादालक्तक(दग्रै ? द्र)वैराम्रेडितकुङ्कुमाङ्गरागो बहुरसमहरवाहयत् । अनुकूलतुहिनमारु(त)स्पर्शवेजितानाम[व]यवानामन्यभेषजत्वा (?) पुनरनुनीय स्वयमसितलोचनाभिर्वासभवनमनीयत । शिशिरमरुत्परामर्शपरुषिताधरव्रणरुजाभिश्चाकृतापराधोऽपि भ्रुकुटिबन्धकुटिलतकटाक्षमायताक्षीभिरैक्ष्यत ।

एवं च निरन्तरायरमणीयान् निजभुजबलसंभृ . . .[2] नियार्थान् यथाकाममश्नुवानः कदाचिदग्रमहिषीं वसुमतीमासन्नसत्त्व[3]परिजनादन्तर्वत्नीमश्रृणोत् । आरूढहर्षश्च वि(की ? ती)र्णपूर्णपात्रः स्वप्नदोहलादिकम . .[4] . शेषां यशोवतीं नाम पप्रच्छ । सा तु विज्ञापयामास— 'देव ! देव्याः खलु वृत्ते चैत्रमासे सुस्नातायाः शुचिदुकूलवासिन्याः स्वप्ने सुरभिपरिमळाकृष्ट . .[5] . राप्य शातकुम्भकुम्भसम्भृतैरम्भोभिः कृतोऽभिषेकः । स्पृहयन्ती चेयमानीलगुरुपयोधरमुखमन्थरदर्शन....[6]ष्विव स्नेहवतीषु निस्त्रिंशधारासु पतति बद्धरागा दृष्टिः इति । आकर्ण्य दिव्यानुभावं गर्भमाकलयन्नमृतवर्षेणेव सर्वाङ्गसमा....[7]शनीकाशासु स्पर्शानुमेयास्वाकाशस्फटिकहर्म्या(दि)भूमिष्वाकाशविहारदोहलमस्या निरवर्तयत् । उत्सवोत्तरेण च यथाविधि प्रयुक्ते....[8]वर्धमाने गर्भे क्रमेणाभ्यर्णप्रसवसमयायां च देव्यामहरहरभिवर्धमानानन्दमवनिपालमेकदा भुक्तास्थानमण्डपगतमासकतिपयमित्रामात्य....[9]भ्येत्य महाप्रतीहारः प्रणामपूर्वं व्यज्ञापयत् ।

1. A extends only upto this.
2. L. about 2 letters.
3. Could this be आसन्नसत्परिजनात् ?
4. L. about 11 letters.
5. ,, 20 ,,
6. L. about 22 letters.
7. ,, ,,
8. ,, 20 ,,
9. ,, 5 ,,

देव ! देवदर्शनमभिलषामीति ब्रुवाणः कोऽपि मस्करी परिव्राड्
द्वारभूमौ वर्तत इति । अनुज्ञातेन च प्रवेश्यमान(म ? मा)धिमिर्नियमैश्च क्षाममध्व-
धूळिभिर्दुःखैश्च मलिनीकृतविग्रहमागृहीतपादुकादितनुपुस्तकाक्षमालिकाकमण्डलु-
त्रिदण्डादिकोपकरणमुच्चघोणमल्पकर्णमानिम्नदृशं कृशकपोलमवनिपालः परिव्राज-
मपश्यत् । कृतयथोपचारश्च वेत्रासनोपविष्टमुत्सारितपरिजनस्तमुपह्वरे सहा-
मात्यः पप्रच्छ—'कथमसि (त्वे ? त्व)मेवागत' इति । सोऽब्रवीत्—'विदितमेव
देवस्य यथाहमेवंलिङ्गो मालवेषु नगर्यामनेकशिष्यगणपरि(पु ? वृ)तस्त्वदा-
देशेन प्रतिवसामि । तत्र च **मालवेश्वरो मानसारो** नाम नरपतिरुत्खातप्रति-
रोपितस्त्वया त्वच्चरणकमलरेणुनिकरानिचितमतिभरमिव दुःखदुःखेन शिरोऽवहत् ।
अमर्षज्वरजरितराज्यसुखारोचकः परित्यज्य सुरयुवतितुलितलावण्यमधिगतललित-
कथाप्रपञ्चमञ्चितमृदुकथितहासितमभिजनविनयवन्तमन्तःपुरसुन्दरीजनमतनीयास
तपस्यवर्तत । तपसा च पुनरन्यजन्मफलदानोचितेन, दुःसाधमाकलय्य फलमैहिकं,
महाकाळे महामांसविक्रयमकरोत् । आमर्दकेन भगवता शौर्यातिशयसन्तोषितेन
मवद्विजयाय कोऽपि निस्त्रिंशो दत्तः । स चोद्गिरति विषधर इव हुतवहार्चिषः-
पक्षिराज इव पतति पतङ्गवर्त्मना, सुभट इव च स्वाम्यादेशेन दृष्टिपथे
तिष्ठतामनपहृत्य जीवितं न निवर्तते । तं च भुजसहायमासाद्य मन्दीकृत-
भवत्प्रभावशङ्कः शङ्करगतमपि पारमैश्वर्यमाक्रमोपलभ्यमानमेव मन्य(मान)स्तवो-
पर्यभियोगाय (फ ? ब)लसमुत्थानं करोति । परं तु देवः प्रमाण'मिति ।

राजा तु जातवैमनस्योऽपि स्वभावधीरतया निगृह्य विक्रियां तु – ननु
श्रुतमविसंवादितात्मनोऽस्य वचनम् । अनुरूपं हि मानमयस्य महीभुजो
हृदयस्यारिपरिभवासहिष्णुत्वम् । उत्तमानां चात्मनिरपेक्षाणि साहसानि समर्थान्येव
दैवतान्यपि विस्मापयितुम् । अवन्ध्यसन्तोषाश्च देवता दुर्लभानपि कामानुपहरेयुः ।
अतोऽमुष्मिन्नौपयिकममर्त्योपस्थितेऽतिपातिन्यर्थजाते विचिन्त्यताम् । आगमानु-
सारप्रवृत्ता च बुद्धिरनुगच्छति सर्वत्रैवावकाशम् । आकाशेऽपि विचरन्ति, अम्बु-

नाथमप्यतितरन्ति, पाताळमपि प्रविशन्ति, असुरविवराण्यध्यावसन्ति, मेरुशिखर-
मप्यारोहन्ति, विषधरैरपि क्रीडन्ति, कुपुरुषैरपि व्यवह(र)न्ति, कुञ्जरानपि
वशीकुर्वन्ति, मृगपतीनपि बध्नन्ति, विलासिनीहृदयान्यप्यावर्जयन्ति . . .[1]
प्याराधयन्ति नियतमुपायप्रष्ठोद्यमा मनुष्याः । निरुपायस्य करगतमप्यश(क्त ? क्य)-
मेवोपयोक्तुमित्यविह्वलमचलबन्धमचलं गुहासिंहवृहि....[2]

तेषां तु ...[3] पथश्चिरविचारितमतिः सुमतिरभाषत— 'देव दैव(म)चिन्त्य-[4]
मिति यदभिहितमर्थशास्त्रकारैस्तदेवेदमापतितं....[5]मसाध्यं च सर्वपुरुषकाराणामा-
मर्दकप्रसादः । तदेवंगते परबलसम्भूतानुभावस्य रिपोरात्मार्पणेन प्रसादनमु....[6]
संशयकरम्, इतरद् भोगात्यन्तविरोधि । तथापीदमेव शास्त्रे....[7]यथात्रोन निदर्श-
नेन निदर्शितम्, एकान्तपराजये सत्युभयतः प्रजाक्षयादधर्म्ये . . .[8] स्तदादाय . . .[9]
सारभूतं कोशवाहनमनभिज्ञेयं कश्चिद् दुर्गवनमाश्रिताः कालमेव प्रत....[10]देवीं वा
विन्ध्यगिरि(का ? कन्द)रालयां शबराकुलित(?)[11]रचितनरपशुपिशितोपहारतुष्टामिष्ट-
वरप्रदानपण्डितां चण्डिकामाराधयिष्याम' इति । अपरे च मन्त्रिणो जीविते-
(व ? च) सति भद्रमित्यस्यैव मतमुच्चावचाभिरुपपत्तिभिरुपचिन्वत ।

श्रुत्वा तु सत्त्वगुणमिव लब्धवृत्तिमच्छसितचन्द्रिकाच्छलेन दर्शयन्
विशांपतिः रामानुशयानुरूपां गिरमिमामुपादत्त वक्तुम्—'अस्तीदमात्मशरीररक्षा-
कृते जनपदपुरमालिनी रत्नाकरवलयमेखला क्षितिरपि अनन्यमेव त अयं त्वस्य-
र्णावस्य(?) गौरवातिशयस्त्रिवर्गसाधनोपकरणतयाभ्यनुज्ञातः कृतास्माभिः, अन्यथा

1. L. about 6 letters.
2. „ 16 „
3. „ 4 „
4. See 'अचिन्त्यं दैवम्' Kautaliyarthasastra VI-ii.
5. L. about 20 letters.
6. L. about 20 letters.
7. A space for 3 letters is left blank here.
8-9. The two lacunae cover about 17 letters
10. L. about 8 letters,
11. We may read शबरकुलरचित.

पुनरधन्यस्यास्य कर्मभूमिसमुद्भवस्यानेकशाखाभेदसञ्चितात्मनः, पयोधरप्रसेकवर्धितस्य, स्नायुसिरालतावितानगहनस्यास्थिस्थाणुशतनिचितस्य, चपलेन्द्रियमृगगणविचरितस्य कुसुमशराशीविषाधिवासभीषणहृदयकोटरस्य, पवनबलप्रचलितस्य, विजृम्भमाणतृष्णापिशाचिकाधिष्ठितस्य, रुधिरपटलपल्लवस्य, पलितकुसुमजन्मनः परिणामनिदाघशोषणीयस्यान्तकवनगजभञ्जनीयस्य, कायसंज्ञस्य शून्यारण्यस्य कीदृशं सारं, क्व चोपयोगः। दृश्यतां च तावच्छरीरयन्त्रम्, त्रिशत्यास्थिकीलानां, सषष्ठ्या वा सप्तशत्या सिरारज्जूनां, पञ्चाशता पिशितपेशीप्रलेपानां, चतुर्विंशत्या रसवाहानां धमनीस्रोतसां, सप्तभिर्धातुभिस्त्रिभिर्दोषैः, पञ्चभिर्मरुद्भिरेकादशभिरिन्द्रियैः, सप्तभिश्च त्वग्भिरन्येन चैवमात्मकेन दुष्प्रपञ्चेनाविचारप्रसिद्धरामणीयकमुपरचित(मि ? म)तिविचक्षणेन कर्मशिल्पिना मर्मणां किल शतेन सप्तोत्तरेण। यत्रकश्चिदवघट्टितमप्रतिघटनक्षमं तत्क्षण एव व्यापद्यते। शक्यं चैत(द्)धर्मयन्त्रमस्थिपञ्जरं सिरागहनं रुधिरह्रदं पिशितराशिमेदःकुम्भमलजम्बालं रोगनीडमित्यन्यतमेन नाम्ना व्यपदेष्टुम्। अत्र दुष्कृदिरेन्दुः खलासं(?)वसति ज्ञानदरिद्रः पुरुषः। अत्र मवल्मीके(?) भोगविकारानुपहरति नैकमुखस्तृष्णामहाहिः। अत्र विषवृक्षे जन्मफलानि भक्षयन्ति लोलुपाः पञ्चेन्द्रियशकुनयः। अत्र कासारे प्रज्ञासलिलमावृणोत्यभेद्य(मित्य ? म)विद्याभ्रपटलम्। अत्र श्मशाने ददाति सान्निध्यमुद्धूतभूतिपरुषितो रिपुषड्वर्गपितृगणः। कष्टं बत पापपार्थिवस्यास्यानवस्थितं बलमनाभिमुखा दुःखोपद्रुताश्च विषयाः, नियतमायासभूयसी यात्रा, नैकविधव्याधयः प्रतिहन्तारः, मुखमेकम्, अनेकमुखानि छिद्राणि, अनवस्थिता वर्णस्थितिः कोशैकाधिष्ठानं दर्शनम् आशयो दोषग्राही, रक्तस्य तिरस्कारोऽन्तर्गताः प्रभञ्जनाः, शिरस...[1]रुणन्नोपरमत्यक्षक्रीडात्वमार्गदण्डधृतिरपरिणीतस्य अत एवैकान्तिकनश्वरत्वं शाश्वती प्रदीपशिखा, निश्चलो नवजलौघः स्थिरतराणि सलिलबु....[2]पि नायं रवस्थास्नुः(?)। अस्यैव च दुरात्मनः कृतघ्नस्य कृते(?)रपरभवना

1. L. about 4 letters.
2. L. about 18 letters.

द्वारस्थगळमहानुभवन्ति, असीक्षेपनिरस्तितिक्षु(?)....[1]सुपरचयन्ति, गात्राणि सङ्कोचयन्ति, मस्तकेन महीं मसृणयन्ति, दास्यमप्युपगच्छन्ति, उच्छेषणमुपभुञ्जते, भि....[2] धूनपवदन्ति, माहात्म्यमपह्नुवते, मित्राण्यभिद्रुह्यन्ति, गुरूनपक्षिपन्ति, प्राणान् विक्रीणते, स्तेयमाचरन्ति, मायाः प्रवर्तयन्ते, वृद्धिमुपजीवन्ति, कुप्य....[3] मांसपिण्डमहानितपीति...[4]त्(?)क्षपयितुमभिनिविष्टा दुर्मतयः। तदेवमेतदनेकातिप्रयासपरम्पराबर्ध्यमानमप्यकस्मादेव क्षुद्रसङ्गतमिव विभज्यते, नोप....[5]न्ति, नोपलालितं गणयति, नानुवृत्तिमवबुध्यते, न पक्षपातं पश्यति, न बहुमानं मन्यते, सुलभविनाशकारणत्वाच्च निषेक एव व्यापद्यते, गर्भ एव वा स्रवति, शवीभूतमेव वा जायते, जातमात्रमेव वा नश्यति, शैशव एवोपरमति, यदि कदाचित् कर्मबलेन कालसामर्थ्यादीश्वरेच्छया यदृच्छया वा तावन्तमतिपतति क्षेमेण नतिवंध्य(?)मध्वानमनभिरामया गभीरकासच्छलेन तर्जयन्त्या काळरात्र्या वाजसस्रुतलालास्यन्दिविस्रसया सुनियोगतः सकचग्रहं हठादाकृष्यते।

कष्टं जराभिभूतस्य जन्तोरन्तकसन्निकर्षोपसर्पणभयादिवोद्विजन्ते गात्राणि। महाप्रयाणप्रयासचिन्ता(दिव ?)वैक्लव्यादिव जायते गतिसादः। दोष्ण(?)-दर्शनकर्माधिकारिणी जीवित एव कालदू(त ? ता)गमननिवेदनार्थमन्तर्विशति दृष्टिः। अक्षिगूहनहेतुजिज्ञासार्थमिवानुपतति स्थानभ्रंशदुःस्थिता भ्रूः। भूयोऽवयवशैथिल्यादचिरधवळरोमजालशबलायाः शयनैकरसायाः कम्बळ इव (ल)म्बते चर्मसञ्चयः। पञ्जर इव राशकुन्त्यास्तातश्वासकासिन्या (?) स्फुटीभवत्यस्थिराशिः। विशदायन्ते नवयौवनक्षरणकुल्यावल्यः। परिणामदहनदग्धस्य यौवनस्य

1. L. about 20 letters.
2. " 25 "
3. " 3 "
4. L. about 10 letters.
5. " 3 "

भस्मेव पलितरशिरत्यासङ्गादुत्तमाङ्गेनोह्यते। प्रतिमुखापतितपण्डवार्धक्यघट्टना
प्रविशीर्यन्ते दन्ताः। प्रेतविषयप्रयाणारम्भप्रहतगम्भीरकासदुन्दु(भि)भिर्जीवि
मार्गालोचनदूता इवाग्रतः प्रसर्पन्त्युत्कथितरतिरवानुकर्षणा इव पूतिग
श्वासाः। नोपयाति विकृतरूपमप्रत्यभिज्ञान(व)तीव स्मृतिः। अस्येव
व्यपदेशादपत्रपमाणेवापसर्पत्यपत्रपा। पापीयसी चेयं जरा नामावमा
माता, धिक्कृतानां धात्री, कार्पण्यस्य भगिनी, भयस्यायतिः, अभा
प्रागवस्था, धैर्यस्य विरतिः, अहङ्कारस्यावसानमनित्य(स ?)तायाः स
सम्मोहस्य सन्ततिः, अशौचस्यावतारवीथी, नरकवेदनानां पूर्वरूपं, शृ
विलसितानामपथ्यभूमिः, दीपिकमदनं रक्षिकदर्थिन(?)मनुद्धृतनयनम
करणमशल्यवाक्यं कर्णशकव्यवसादनमभीमयुद्धं गदाभिघातसङ्कुलमनबल
तिलकालकप्रसाधनममोघमेतदन्तकायुधम्।

एवं च जातिजरामृतिभिस्तिसृभिस्त्रिखण्डकल्पाभिरतिभयानकम
जव(?)जलधिमवगाहमानस्य नौरिवे(यत् ? यं) प्रतिक्षणाशङ्कनीयभङ्गा त
तथा चास्य देहस्य त्रिदोषस्यापि दोषानुदाहरन्तो नाद्यापि पारं पश्यन्ति मह
रसमयमप्येकान्तविरसमेवं विजानतामनेकजन्तुसहस्रसम्बाधसङ्कुलमपि शून
तदालोच्यते। तच्चेदमनेकसारयोगमप्यसारमनेकान्तजालवेष्टितमप्यबन्धम
सन्तापकारणमप्यशुचि रूपं अभयङ्करप[1]..क्ततरं सरोमारुव्यव्यवार्या(?)स्वादरस
गुरुशुक्रमप्यनाथमप्यन्तर्गलमसम्भ(?)मप्यनवस्थानमन्तश्चरपवनपञ्चकमपि
[2]....लमन्तर्गतमद[3]...मतिस्फुटसन्धिशब्दमपि (वि)ग्रहव्यपदेश्यमशिवमशान्तम
मूलम्। अथच किलैतद्दुस्त्यजम्। अत्र किलायं कृताभिष्वङ्गः पु[4]...योदुरपक
ऽमुना(?) किमपि साध्यमध्यवस्यन्ति। अस्य तु मे बभूव युक्तोऽयं भूतस

---

1. L. about 5 letters.
2. „ 5 „
3. L. about 10 letters.
4. „ 34 „

स्तथापि क्षत्रकुलकुं[1]..स्मव देव्या वसुमत्या राजलक्ष्मीर्युष्मति दीपिकाप्रकाशिकेन(?)च यथासुखमसम्बाधरमणीयेन वर्त्मना मुक्ततन्द्रतन्द्रिताः प्रमोदनभाजा[2]..मिष्टानि वसूनि स्वरतोऽर्थिवर्गः सुहृद्गणाश्च संव(र्जि ? र्धि)ताः स्वनिर्विशेषं भोगप्रपञ्चैः। पश्यामि नातः परं करणी(ये)ष्वन्यतरम्। उत सन्ततिप्रतिष्ठा[3].... स्वप्नदोहलप्रत्ययेन स्निग्धादेशव्याहृतेन स्वचित्तवृत्तिप्रामाण्येन च महानुभावः कोऽपि देव्या गर्भवर्ती कुलस्य निस्तारकस्तन्तुरिति शक्यमध्य(वानु ? वसातु)म्। अयमसावहम्, अस्ति हि वचनम् 'आत्मा वै पुत्रः' इति। असावेव यथाचिन्तितेन श्रेयसा योजनीयः। ततो मम च मत्पितॄणां च प्रजानां च बहूपकृतं भवति। स खल्व-हमनालोचन (र)मणीयमकाण्डभङ्गुरं शरीरमाहवशिरसि क्षत्रकुलोचितेन वर्त्मना व्ययीकृ(त ? त्य) शरदिन्दुमनोहरमासंसारस्थायि पुण्यतमं य(शः)शरीरममरलोक-विहारि चानेकाध्वरपरम्पराप्रार्थ्यमानम(य?)श्रमेण (शरीरम् ?) आसादयितु-मिच्छामि। नेच्छामि दुःखायावर्णाय चैतत्कलेबरं धारयितुम्' इति।

अभिहितवत्यवसिते मनुजभर्तरि, जानन्नपि तद्व्यवसायमप्रावर्त्य(?) भर्तृस्नेहपरवता धैर्यस्तम्भितामि(ष)ङ्गेण चेतसा सुमित्रः प्रत्यवादीत्—'देव! ज्ञात एव कातरस्य जीवितव्यमितरस्य प्रियमरणे मर्तव्यमि(ता ? ति)। आर्तत्राणदीक्षया चाद्यापि न्यायनिर्व्यूढया यथार्थमूढः क्षत्रशब्द इत्येतदप्यन-पलापमेव। न चेदमनारतं (धि ? नि)जगुरुसुहृद्बन्धुकृत्योपयोगात् कृतप्रयोजनेन खतः पुनरधन्येनानिन्येनाशुना(?) दुःखरूपेण चेतसा सम्प्रति रणयज्ञाङ्गतां गतेनात्मना सञ्जाते(?)। न खल्वमहावराहो महीं समुद्धरति, नाशम्भुरभ्रगङ्गां धारयति, नाहिरण्यगर्भो भुवनत्रयीमुद्भावयति, नादुग्धोदधिस्सुधामाविष्करोति।

---

1. L. about 25 letters.
2. „ 15 „
3. „ 3 „

न चाभवान् भवस्सन्ततिमुत्थापयितुं समर्थः । न(न्व ? ह्य)नन्तादन्येनानू-(ढभरो ? ढो)भरः कैटभारेः । विदितमेव खलु विदितवेदितव्यस्य यथेमाः प्रतिपदसुलभान्तराया दुर्योधनसाधनसमवायाश्च सम्पत्तयः । प्रार्थ्यमानदुरवापा समाराध्यमानदुःखशीला रक्ष्यमाणप्रपलायिनी च लक्ष्मीः ।

लक्ष्मीविडम्बनम्—प्रत्यक्षमेव चास्याश्चापलम् । एषा खलु देवस्य पितृपितामहसंवर्धितापि रिपुषड्वर्गसम्बाधमुक्तचित्तेन सुचिरलालितापि प्रवीरकरदण्डमण्डलीकृतप्रचण्डचापचक्रटङ्कारमुखरितेषु शरीरं जीवितमप्यनवेक्ष्य रक्षितापि यथेष्टलाभसंवर्धिता तुष्टद्विजवराशीर्वादाभिनन्दितापि नित्याराधनप्रसन्नकुलदेवताधिष्ठापि(तापि) नित्योद्युक्तविद्याधरवृद्धसमाजाजस्रग्राह्यमाणविनयापि चतुरुदधिवलयमध्यवर्तिसकलनरपतिकुलविरचिताञ्जलिकमलवनविहारमानितमनोरथापि स्वभावदोषेण दुर्मतिरपरिचिता जीवत्येव तस्मिन्नरिजीवि(ते?त)लेहलोलखड्गजिह्वे महाहिभोगभीषणे भ[1]....मेतस्यामिन्दुकरदलितकुमुदकुड्मलोदरदलावदातामपहरितबृहस्पतौ(?) तिष्ठत्येव तस्मिन् भयपलायनोद्विग्नसकलक्षत्रकीर्तिमानिनी...[2]रिचेयं पतङ्गरथमयीव भुजङ्गभोगिनी मुहूर्तमप्यविश्रम्य परिभ्रमति । उपनतापि दैवादुरसि च मद[3] ...विदितकृत्याकृत्यमाकुलीकृताक्षमनक्षरमनुभवदुःखमङ्गनिर्भोगैराचक्षाणमारूढशङ्कासाध्वसैरवस्थानुरूप[4] .... रुषमप्रत्यपेक्षाप्रधानपति(?) मधुकृद्भिरिव मलिनवर्णैः क्षुद्रात्मकैः शिक्षिता कर्कशपुरुषसाहसैकहार्यमनास्था(?) दुर्ग्रहेष्वे[5] ....द्वाराहति दुष्ट मर्कटीयं तमकस्मादेव क्षो(प?भ)यित्वा विच्युतफलमुद्धूतपत्रमुत्सृज्य विटपम(द्यं ? न्यं) सङ्क्रामति ।

1. L. about 8 letters.
2. " 24 "
3. " 25 "
4. L. about 25 letters.
5. " 6 "

यत्र च लग्ना ज्वलनशिखेव तमवश्यं[1]....स्यैव प्रशाम्यति । मन्ये च कालकूटस्यास्याश्च भगवत्या निष्पता(?) निर्विषीभूतः स्वस्तिमानिदानीं दुग्धसिन्धुः । अथवा नेयं काळकूटतुल्यकक्ष्या लक्षयितव्या, यदमुनैकस्येश्वरस्य कण्ठमात्रं दूषितम्, अनया शतसहस्राणीश्वराणां सर्वाकारं दूषितानि । सैषा मन्दरोद्धूतमहासमुद्रवीचिवलयवेगास्फालनविजृम्भिताङ्गभङ्गज्व(रे ? रा) महान्तमूष्माणमुद्वमति, स्थानासनशयनेषु धृतिमुपगच्छति, मुहुर्मुहुर्वेष्टते, भक्तं द्वेष्टि, दृष्टिमुद्भ्रमयति, जीवितं च पर्यस्यमाना भयानकां दशामावाहयति, अचलक्षोभतुमुलजलधिगर्भमूर्च्छन्मारुतातिरेकस्वीकृतेव (क ?)जातवातप्रकृतिरसङ्गतशीला चानवस्थिता च क्षुद्रा च निष्ठुरप्रलापकारिणी च कृशवर्णा च कृतप्रलोभना च स्वप्नरूपैर्विभ्रमैर्भृशं दुनोति । (कारता ?)मुरगनायकस्य वासुकेर्मन्दराकर्षणखेदविह्वलस्य निःश्वासनिज्वरविषाग्निधूममण्डलामिकृतेव(?) सदसच्च न पश्यति, परप्रणेयासतीमजस्रमालम्बते, महापथेऽपि स्खलति, नरपशूनपि समापतति, अस्पृश्यानपि स्पृशति, अशुचिमप्यधितिष्ठति, चक्षुष्मद्भिश्च परिभूयते । सत्यमचलवृत्तेरप्युदग्रस्यापि भूभृतोऽस्याः समुद्भवे द्विजिह्वसंवेष्टनमतिघोरा च भ्रान्तिरासीत् । सर्वानेव देवान् ब्रह्ममुखान् परिभूय समस्तमायासिद्धान्ततन्त्रतीर्थकरं नारायणमात्मनोपसृत्य भजमानयानयोद्घोषितमसाधारणं धार्ष्ट्यम् । अमुनातिमाये(न?ने)मां रक्षताधोक्षजेनारभूतावमानतादिं नानाविधा (?) विडम्बनार्थपरा चेयं दुग्धराशेरपसृता चटुलकटाक्षदृष्टिक्षेपोन्मादितपुरुषा स्वनिमित्तसङ्कल्पितानि विग्रहसंग्रहाणि पश्यन्ती वश्येव राजकुलेषु लीलावष्टम्भरसप्रगल्भं भ्रमति । सोष्म(त)येव जातिं म्लापयति । तेजोरूपतयेव वंशसन्ततिं दहति । तमोमयत्वादिव सद्भवनानि मलिनयति । व्यभिचारितयेव महाकुलानि पांसुलयति । चित्रमिदम् अयशोदापि वर्धयति (म?)बलम्, असुभद्रापि विजयमानुगुण्येनाकर्षति, अदमयन्त्यपि लोकपालानवधूय नलसारङ्गगुरुकरोति (?) । अमरैकसत्वाद(?)पारिजातं रत्नाकरमपि

1. L. about 4 letters.

नाधिवसति, विरतविग्रहं मकरध्वजमपि पुरुषबुद्ध्या नाभिनन्दति । कुलासंग्रहशीलकुलिश(?) इत्यसुखोयमानव शङ्के शशाङ्केऽपि न वसति । सुरभिगन्धसम्पन्नमन्यमसहमाने(नै?)व मन्ये महोत्पलेऽपि न पातयति पदम् । अङ्गीकृतमसुरस्नेहोपचारमित्यसूययन्त्येव नूनमसिधारातलेऽपि न चङ्क्रमते । तर्कयामि चास्याः सान्निधानादेवावदातेऽपि चन्द्रमण्डले स्फुटीभूतः कळङ्कः, पावनेष्वपि कमलवनेषु प्रदीर्यते रजोविकारः । स्वच्छेऽपि च कृपाणधाराजले ज[1]....ष भेदनशक्तिः । त्यागशक्तिमुत्कर्षिणीमिव दर्शयन्ती त्यागशीलानेव त्यजति । शूरैः सह शौर्यमिव प्रकाशयन्ती विगृह्यैव तिष्ठति । विनीतेऽपि विनीततरेव तिरस्करोत्यनुराग[2]....व न सुखमास्ते । ह्रीमत्सु नितान्तह्रीतेव न रूपमात्मनोऽभिव्यनक्ति । धर्मरतिचण्डरागारतियन्त्रणासहिष्णुतयेव(?) नावेशयति विद्वत्सु जळप[3]....भ्युपैति प्रणयम् । अदीनेषु दीनसत्वा शीलभेदादिव नावलम्बते मैत्रीकं म(?) (उ)च्छ्रितेषु क्षुद्रारोहितयेव ना(द्धि ? धि)रोढुं क्षमते । शाकट[4]....प्रतापम्लानं प्रश्रयमनुवेलमवकिरन्ती प्रवर्तते । अम्बुगर्भा रागमिव विदाहदूषितलमाभिजात्यं प्रतिक्षणमवमृकाति (?) चरणमिवानुरक्तमत्यधस्ताद्वर्तयति[5]....तनुतरं दधाति । ऊरुदण्डमिव स्थितमुपहितोरुजालं क्लेशयति । जघनमिव महाभोगमावृणोति । उरमिव मध्यस्थं भग्नकलुत्वमुद्राति(?) । नाभिरन्ध्रमिव गम्भीरं बह्वावर्तमुपस्थापयति । स्तनतटमिव प्रवृद्धं बन्धयति । भुजपाशमिव मृदुमवाङ्मुखयति । अधरमिव परिस्पन्दवन्तं क्षतवस्थन(?)मापादयति । दशननिवेशमिवामलमधरातिरस्कार्यमारचयति । लोचनयुगळमिव स्निग्धं विभ्रमेण योजयति । केशहस्तमिवायतिमन्तं संयमयति । खरतरेषु चासौ खलेषु पातिता धान्यपूलीव (?) दुर्जनवरणमात्रसंहृता निःशङ्कतां गता विफलीक्रियते ।

1. L. about 3 letters.
2. „ 15 „
3. „ 24 „
4. L. about 22 letters.
5. „ 12 „

निर्भयादविभ्रमा च मत्तमातङ्गानपि भ्रमरीवाभिसरति । विद्युद्विलासतरळा मेघराजिरिव रा(ज)हंसानप्युद्वेजयति । जळानप्यन्धानपि मूकानपि क्षयिणोऽपि श्वित्रिणोऽपि व्यङ्गानपि विरूपानपि वृद्धानपि क्लीबानपि कृपणानपि लुब्धानपि मुग्धानपि निष्ठुरानपि स्वैरि(णीन ? णोऽ)पि हरति । असदृशानेकदुर्जनोपभोगनिर्दयकदर्थितापि नापत्रपते ।

किं बहुना । न गुणमपेक्ष्याभिवर्धते, ना(भिभोषे ? पि दोषे)ण व्यावर्तते । तथाहि—अजातशत्रोर्धार्मिकतामनिलसम्भवस्याध्यवसायसामर्थ्यमर्जुनस्य पराक्रमं, यमयोस्त्वतिमानुषरूपमनुरुध्यमाना शकुनिरचितमक्ष(प्यू ? द्यू)तकपटं चारीकृत्य क्षुद्रम(ले ? ली)काभिमानगर्वं दुर्योधनमतिनिर्भरमालिलिङ्ग लक्ष्मीः । किमनया नाचरितमिन्द्रजालेषु, किमनभ्यस्तं प्रलम्भनेषु, किमु शेषितं महापातकेषु, किमगणितमकार्येषु, किमप्रवर्तितं वर्णसङ्करेषु, किमभिन्नं मर्यादासु, किमनुद्भावितं मोहविलसितेषु, किमप्रतिहतं जालवर्त्मसु । रज्जुरियमुद्बन्धनाय सत्यवादितायाः, विषमियं जीवितहरणाय माहात्म्यस्य, शस्त्रमियं विशसनाय सत्पुरुषवृत्तानाम्, अग्निरियं निर्दहनाय धर्मस्य, सलिलमियं निमज्जनाय सौजन्यस्य, धूळिरियं धूसरीकरणाय चारित्रस्य । चित्रीयते चेदं सीमन्तिनीविसंवादि वृत्तमस्याः । य(ता ? तो)यमेव पुरुषमेषा समाश्लिष्यति स्वयमेव तमुद्दामकामं परस्त्रीसहस्रेषु योजयति । स(जापी ? दापि) वारुणीं हतेयमात्मनः स(म)क्षमासेवमानमुत्साहयति । गुणानपि दोषीकरोति, दोषानपि गुणीकरोति । अस्याश्च चापलातिशये प्रक्रान्ते प्रस्तावोऽपि (नाचिराधीषा ? र्चिषाम्) । न वार्तापि करिकळभकर्णपल्लवानाम् । न कथापि कदलिकाप्रान्तचारिकाणाम् । केवलमनार्यबुद्धेरेवैनामनवस्थितत्वेनानुसर्तुमस्ति श(स्ति ? क्तिः) । एवंविधापि चेयं दुराचारासकृद्व्यभिचारितापि स्वभावचापलेन भूयोऽप्यसाधारणपुरुषकारभूषणैर्भवादृशैरेव श(क्ष्य?क्य)ते प्रत्याहर्तुम् । धार्तराष्ट्रानुच्छ्रिष्मित(?)कपटद्यूतहारितापि खल्वरण्यवासविनिवृत्तैः पाण्डुपुत्रैः प्रत्युद्धृतैवेयमपरिमितमहामहीभृत्प्रभूतवाहिनीवरपरिबृंहितमनेकशतसहस्रनागसंकुलं

कुरुकुलबलजलधिमनुप्रविश्य शुक्ति(? क्ते)रिव वृत्तमुक्तालक्ष्मीः । दुर्लभश्च स[1] .... यस्येयं निश्चला । चलितामेव खल्विमां दुष्टचेटीमिव पुनः पुनरवगृह्य निगळयित्वानीतवतं कालम्(?) अचलशिखाकूटविकटमांसळांसपीठाः पीठीकृतसप्तद्वीपसकलाराज[2]....चरणा धरणिभुजः। श्रूयते च नवनळिननालतन्तुगर्भलीनो नहुषप्रभावसमयं समग्रमेव चक्षमे सहस्राक्षः। पुनरमुष्मिन् पुलोमकन्यकारुचिर[3] .... धिरूढे निग्रहामर्षितस्य महर्षेरगस्त्यस्य शापादजगरभूयं गतवत्यनघवृत्तं कळत्रमनायकां च नाकलक्ष्मीं प्रापद्यत । ननु च[4] ....द्यताम्बुजश्रियं प्रत्याकर्षन् प्रत्यक्ष एव देवो दिवाकरः । लक्ष्मीविडम्बनं समाप्तम् ॥

प्रसीद देव ! निवर्तस्व साहसादपहर्तस्तय परिकर[5] .... रचलदुर्गमलङ्घ्यमाश्रितः प्रतीक्षस्व कालम् । उत्पन्नवरबलोपयोगसन्तुष्टो राष्ट्रोपलब्धिघसिद्धयात्राफलः फलवद्भूमिरामणीयकाकृष्टचित्तवृत्तिरत्रैव वर्तेत वासमेव जनपदम्(?) । अवसितप्रयोजनस्यापि च विषमशैलदुर्गजुषस्त्यक्तात्मनश्च नास्माननुप्रहृत्य शत्रोः फलम् । प्रभविष्णु हि प्रहरणममरप्रसादोपलब्धं तदपि दृष्टिगोचरस्थितेषु श्रूयेत ।

श्रुतोपपन्ने च भिन्नशैशवे शासनक्षमैकमायावर्महरे कुमारे करिष्य(ति ? सि) कदनमात्मनिरपेक्षः प्रतिपक्षस्य कक्षेषु वा कालमक्षयेण तपसा क्षपयिष्यसि । न साम्प्रतमेवेदमद्य कन्यकास्तथा हीति द्विषा हने (?) स्वदेहाहुते रतिसञ्जनम् । अथ यदि यदृच्छामात्रसाध्यमशेषपुरु(ष)कारगोचरानीतमेव मन्यसे महदस्तु

1. L. about 4 letters.
2. „ 14 „
„ 20 „
4. L. about 24 letters.
5. „ 15 „

यदृच्छवकस्यार्ति(?)दशायामात्मेच्छया परिवर्तेत देवस्य कल्याणी कुलसन्ततिः । एतेऽपि वयमिह निरुपयोगमात्मानमप्रमरणेनोपयोक्ष्यामह इत्युपराचितप्रणामाञ्जलिः प्रचलचूडेन मस्तकेन महीं जगाम।

मशित(?)मधुरप्रश्रयस्तु पृथिवीपतिरुत्थाप्य तमूर्जितार्थं वचनमाचचक्षे—यद् ब्रवीषि मानम्लानमलीमसानपि प्राणानरण्यानीनिलीनः स्वस(न्त्यु ? न्तस्यु)पक्रियायै धारयेति, तत्र च चि(न्त ? न्ते)यं—परभृतबलावलेपो रिपुः किमितो मुक्तपुरजनपदमपगतप्रधानसाधनमनुचितप्रजोपक्रोशपांसुलमुपरतप्रतापतया प्रोषितात्मच्छायमुष्णकरप्रतापवारणाय कामपि कान्तारपादपच्छायामुपासीनमेनं जनं नानुबध्नीयात् ? । आत्मशरीरैकशेषः शफर इव सलिलमूलतलनिलीनोऽपि किमनभिद्रुतो दुर्योधनः पूर्वनिकारस्मरणदारुणेन रुधिरपूरितोदरेण वृकोदरेण ? । मानी च मानसारः प्रसारितप्रतापः कृतोपकारश्च पुरा मयासद्वैरस्यं मन्यमानोऽपसार्यतया ह्येव राष्ट्रादिना धृतिमनुबद्धस्य वारिणा सुचिरोपार्जितसन्निहिते स्वतेजसि प्रकाशके न शक्यमदृश्येनात्मना बहळतमतमस्सस्सवीव(?) गहनेषु स्थातुम् । नहि नोय(?) निजापदानोच्छ्रितयशःशरीरः शशक इव क्वचित् सम्भवति गुल्मकुक्षौ । तथा च सत्यनुद्रुतस्य द्विषा सुदूरमपि गत्वात्ममैकान्तिकः[1] शरीरव्ययः । सन्निहि(तं निहि ?)तकळत्रस्य मे व्यापत्तौ सापि सन्ततिः संशयमापद्येत । यदर्थमर्थित्वमवर्णोपहते जीर्णतृणलवलघुनि जीवितेऽपि कुर्यायाः सपर्यामपदिशद्भि(?)र्बलवद्भिरागृहीतसारकोशैरपरिभावयद्भिः कालमनुगतप्रधानमूलभृत्यामविदितासद्व्यसनवृत्तान्ततया परिस्रुतगर्भखेदामितोऽपवाह्य देवीं यथोपपन्नैरुपायैरवगृह्यार्थयोग्यानाटविकानस्मुतान्[2] मोदन्तैस्तावदासितव्यं यावतो-

1. Shall we read गत्वा स्यान्ममैकान्तिकः ?
2. We may read मोदमानै.

पपत्स्यते प्रकृतार्थसिद्धिः । अस्त्येव चेदमनेकप्रत्यूहानित्याम्नाता विपन्नाश्च सम्पदः । दुर्लभा च दुरभिरक्षा च क्षपितशीला च खलैकवल्लभा च निष्करुणा च निष्कारणविलोभनी चालक्षणा लक्ष्मीः । प्रबुद्धजनप्रहत एष पन्थाः । नात्र संशयः । तथापि का गतिः । जातेन जगति जीवितार्थे नियोगतो यत्न[1]....पायवर्गस्य सामादेः शास्त्रदृष्टेन वर्त्मना वार्तादीनां चानुष्ठानम् । तथानुष्ठीयमानस्य चार्थस्य सिद्धिर्दैवमेवोपक्रोशयति न पुरुषम् । अत्रे[2]....... जाये नास्था न पोषणे रक्षणे च विनयाधाने च यतितव्यम् । एतावति पुरुषस्याधिकारः, परं तु दैवं न तत्र पौरुषं क्रमते....[3]श्रियम् । श्रूयन्ते हि कुशलवादयो वनमृगैः स(ग ?)हाश्रमेषु वृद्धाः पुनरुपेत्य राज्यं गृहीतवन्तः । प्रतीपयन्ति भव्यमर्थं रमणीयमरमणीयं वा(?) । यतमानस्तु यावच्छक्ति विद्वानात्मानमवाच्यमापादयति । तद(मु)ष्मिन्नकृतप्रज्ञदुष्करे कर्मण्यप्रतिपत्तिनिष्ठुरेण रागपृष्ठप्रस्थितेन चेतसा कुलक्रमाद्वागतस्याप्तभावस्य, सहपांसुक्रीडोपबृंहितस्य स्नेहसम्भारस्योत्तरोत्तरापतितमाधुर्यप्रकर्षस्य परिचयस्य, सर्वरहस्यनिःशङ्कालापसंभृतस्य विस्रम्भस्य, स्वदेहनिर्विशेषानुष्ठितस्य निरुपस्कारकान्तस्य संव्यवहारस्यैकपदे भवद्भिः प्राकृतैरिवानात्मभिरिवाविचारक्षमैरिवानभ्यस्तनयप्रयोगैरिव च न परिम्लानिरानेया । न हि ममैकमालम्बनं पात इत्युपारूढाया युष्मासु सम्भावनायाः प्रलघूनि प्राणतृणान्यवकीर्य प्रतिकूलं भविष्यति ।

क्षणिकेन हि समाधिना साधनीयो जीवितस्य व्ययः । यावज्जीवितेन निक्षेपरक्षणम् । अतोऽसौ रक्ष्यतां निक्षेपः, स्थिरीक्रियतामात्मा, मुच्यतां कातरत्वम्, उत्थाप्यन्तां यशःपताकाः, प्रदर्श्यतां श्रुतप्रभावः, प्रस्थाप्यतां सत्पुरुषवृत्तम्, उद्घो(ष्य)तां तत्त्वदर्शित्वम्, आराध्यतामात्मस्वामिवंशः,

1. L. about 12 letters.
2. „ 24 „
3. „ 16 „

सुहृदश्च क्रियतामपुनर्दर्शनसम्भवादुपनतपरलोकप्रयाणो जनोऽयम् । अस्त्वयमव्याजगर्जयोर्जित्य(?)निर्जितमरुत्तकार्तवीर्यस्य स्फीतकीर्तेस्तातस्य पुत्रः, पौत्रश्च पुरुषपौरुषग्रीष्मोच्चूषिताशेषसपत्न(स्य?) सम्पत्तेरनवरतरणमहामहस्य पितामहस्य । न हि राजकेसरिणामुदारस्यान्वयस्य युज्यते हरिणस्तन्तुः । अतो निरन्तरमविरलविस्तृतशरलतावितानधवलितनभसि रुधिरपटलपाटलस्फुरितबन्धुजीवभूषणायामजर(?)भीषणायां शरदि विधिबलमपि निजबलेन विपारिवर्त्य पुरुषसहस्राण्यभूयःप्रबोधनाय स्वापयेयम् ।

अत्र चेदिह भवन्तः प्रतिषेधाक्षरविरसमात्मसाहाय्यदानसम्बद्धं वा पदमनुचितविरहविह्वलत्वादुपा(म ? द)दीरन्नय(म)हमविरळसारदारुकवळग्रहवलितार्चिषि पीतस्फीतसर्पिषि स्फुरि(त)स्फुलिङ्गविप्रुषि विषमार्चिषि विरंस्यामित्यवसिते वचसि वासवानुभावस्य भर्तुरमोघनिर्गमत्वादुत्तमपुरुषसञ्चराणाम्, अप्रतिलो(म ? भ)नक्षमत्वात् प्रभुत्वस्यादृष्टक्रियोपचितत्वाद् भृत्यभावस्याप्रतिबन्धयोग्यत्वाद् विधिचेष्टितानामनवसादप्रतिक्रियत्वादनर्थोपचितानामध्यवसायसहचरत्वान्महासत्त्वतायाः, व्यसनकालविकसिततया च विद्याबलस्य (म ?)बलवतीमपि न्यक्कृत्य शोकप्रवृत्तिमुद्धृतमप्युपष्टभ्य हृदयमुदीर्णमप्युदस्य रणरणिकामुद्दामामपि नियम्योष्णबाष्पधारामुद्भूतमपि नि(र्वर्त्योत्कं ? वृत्योत्कं)पमुत्क्रान्तकल्पमप्युपरुध्य जीवितं जीवन्मरणमिवारिमाविरामा(?)रम्यरूपमभ्युपयन्तो मन्त्रिणस्तथेति वैधुर्यानिश्चितया वाचा गत्यन्तरमलभमानाः पत्युराज्ञां प्रस्य(वसेत ? सेवन्त) ।

देवीं च विदितदेवार्चनवृत्तान्तां (अर्चन ?)ज्ञातभर्तृसङ्कल्पतया स्वैरानुष्ठीयमानप्रयाणोपकरणसंभारामकारयन् । अवनिपतिरप्यु(? त्यु)दयमिवाभियोगमरेः कान्त्वातिसत्त्वतया विक्रमरसातिरस्कृतस्वजनविरहदुःखः नि(र्वे ? वृं)तेन चेतसा तमपरभाग(म)ह्नः समग्रां च यामिनीमनैषीत् ।

अथापरेद्युरुदयमारुरुक्षति क्षतजरागपाटले पादपातपरा(ग?)हतक्षुभितगर्जद्वाहिनीपतौ पटुतरकरास्फालनोल्लस[1]....न्यतेजस्तिरस्कारिणि रक्तचक्रधारिणि धरणिभृन्मकुटघटितस्पष्टमण्डलाग्रकिरणसंहतौ प्रतिक्षणविजृम्भमाणदुःसहोष्मणि प्रतिपक्षता[2]....द्याधरमप्रस्तुतस्तुतौ सुभट इव रथवराधिरूढे परिवर्तयति कालमात्मगत्यनुसारेण देवे सप्तसप्तौ कृतप्रभातमङ्गलाम(ङ्गले ? ङ्ग)षु प्रौढगर्भभारमन्थरेष्व[3]. . . . षु रचितभूषणामुदयगूढचन्द्रमण्डलामिवाल्पाल्पतारकास्फुरणां शरत्प्रदोष(ब ? वे)लां मौलवृद्धवर्षवराधिष्ठितामनुसृतस्थविरहंसबृन्दामिव मन्दाकिनीं देवीमुत्सुकप्रिय(जा ? जना)नुवर्तनमुहूर्तलम्बितपरिजनाङ्गनाससम्भ्रमानुयातां पुरस्कृत्य कालदूतैरिव गतिमनिष्टां गमयद्भिर्भर्तुराज्ञाक्षरैः प्रेर्यमाणाः दुःखोपहतमुखत्विषः कृष्यमाणबलावयवा दक्षिणां दिशमभि प्रत्यच(?) सकळत्रा अपि त्राणमन्यदलभमाना विन्ध्यगिरिमभ्यवर्तन्त मन्त्रिणः ।

अनन्तरं च सर्वस्यामेवोर्व्यां सर्वक्षत्रपिशुनाः कालरूपा इव चरितुमारभन्त (चो ? घो)ररूपा महोत्पाताः । तथाहि—प्रथममेव स्वभर्तृकालक्षयासचित्रासादिवोदकम्पत क्षितिः । अभ्यर्णर(तो ? णो)दयादिव व्यजृम्भन्त द्विगुणमुद्गर्ज(य ?)न्तो वाहिनीपतयः । जङ्गमभूभृच्छिरोभङ्गसौकर्यप्रत्ययोत्पादनायेव केनाप्यभज्यन्त स्थास्नूनामवनिस्फुरितरत्नोपलानि भूभृतां शिरांसि । समरोत्सुकराजलोकसाहाय्यार्थमिवर्तव: सर्व एव स्वचिह्नलक्ष्याः समन्ततः समं समाजग्मुः । अखिलमिव धरणिपृष्ठमाहवाङ्गणीकुर्वन्तः प्रसभोत्पाटितनिरस्तवृक्षवीरुधः क्षुण्णपाषाणशर्कराः क्षणमपि नोपरे(मू ? मुरु)प्रस्वनाः प्रभ्रमन्तः प्रभञ्जनाः । कालापसर्पा इव कालसर्पाः प्रसर्पन्तः सर्वपार्थिवानामाविविशुः शय्यागृहाणि । अटव्या इव दण्डविक्षेपा व्याघ्रादयः पुरा-

1. L. about 20 letters.
2. ,,
3. ,, 2 ,,

ण्यरुन्धन्त । राजास्थानेषूदतिष्ठन्नलक्ष्मीपरिवारार्थमिव स्थूलस्थूला रोहितस्त्रियः । प्रवहद्धमहाघबुद्बुदानीवोद्भवद्भङ्कुराणि हीनातिरिक्तपाणिपादान्याशिरांसि(वि ?) विकृतघोररूपाणि मानुषेषु तिर्यक्षु च प्रभूतानि भूतान्यभूतये भुवः प्रतिभयानि भूयसा बभूवुः । अभावचिन्ताकातराणामिव करितुरङ्गमाणामनभिनान्दितयवसपल्लवानामाननादगळन्नश्रुबिन्दवः । सर्वशक्त्यासङ्ग एव ध्वनिमिव शङ्खदुन्दुभिमुखैर्निग्रहेऽपि स्वशब्दो न व्यसृजत(?) । प्रभूतप्राणिराशिप्रक्षयशुचेव रुरुदुर्दैवताप्रतिमाः । पूर्णशशिभ्रान्तराहुशिर इवातपत्रेषु बभ्राम भ्रमरपटलम् । शस्त्रेष्वेभन्ति(?)दर्पादिव दर्पणेष्वपि पतितुं नेषुः पार्थिवानां मुखानि । तेजस्विनमर्कमप्यभिजग्मुश्च्छायात्मानः मानिमां(?) । संप्रहारत्व(र)येव कोशेभ्यः शस्त्राणि स्वयमेव प्रज्वलन्ति निर्जग्मुः । आहूयमानानामारोहणपरिभवसहिष्णुगन्धहस्तिगर्हणायेव तन्मदो हस्तिनीनां कपोलमाशिश्लेष । अप्रणिपातप्रणुन्नानीव मुहुर्मुहु(र)वर्तन्त प्रतिष्ठासूनां वाहनानि । सुदूरमपि गतेष्वेव मनो भाविनी दुर्शल्याद्वेगादिवावेवावन्नातपत्रध्वजपताकादीनि(?) राजचिह्नानि । अभज्यन्त च रथशकटादयः। कतिपयज(व?)नापराधकुपितकाळरात्रिप्रभारचितमेखलाप्रवाळमणय इवाश्रुपाताः शङ्खदेशेष्वलक्ष्यन्त । क्षत्रपि[1]....काः कुजश्च नानाविधा रोद्धुमिव साहसं विलेगुरङ्गेषु (?) । सदसत्तामार्गदर्शिनामिव गुणविपर्ययः कार्यकाले मन्दतीक्ष्णानां वाजिनामभूत् । पुंगवत्वादिव प्रणदन्तः ककुद्मन्तः प्रतिमुखं बलान्यभ्यद्रवन्त । अप्रग पापेषि[2]...सव्यं पक्षिणः प्रदक्षिणं च वनमृगाः परिपतन्तो निर्भयं चावगाहमाना व्यभजन्निव सैन्यान्यन्योन्यमामिषत्वेन । काकैरपि कालसामर्थ्यमिव[3]....तद्ध्यानम्लाना वाजिकुञ्जरमनुवाजामखुरलेलिख्यमानभूतलानां

1. A space for 4 letters is left in this Ms.
2. L. about 3 letters.
3. ,, 20 ,,

च वाजिनामङ्गानि अभिनभवभिन्नानीव पुष्पचुम्बिन(?)इवाभ्यलीयन्त ....रभन करकबन्धादीनि घोरतराणि दर्शयद्भिश्च वलयप्रतिलोमभीमरूक्षगर्जिताजाशनिभि(?)-राविरळरुधिरमधुवसातैलोपलोरगमकरा[2]....ताटिपिशङ्गहेमदण्डैश्चण्ड(र ?)मरुद्भि-रभ्यर्दितानां सहस्रधैव सैनिकानामभिद्यन्त हृदयानि । माह्या(?)समाजप्रेक्षार्थि-दिक्पालरचितहेममञ्चा[3]....दह्यमाना दिशः । क्षत्रक्षोभभयादुद्वसन्तव(?) जुघूर्णिरे गन्धर्वनगराणि । प्रबुद्धमहायेन्द्रप्रेषितानीवेन्द्रायुधानि यामिनीष्वदृश्यन्त । भैरव-स्वरविरसविरासिनीनामशिवानां शिवानां प्रत्युत्थीयमाना इवोन्मुखीनां मुखोल्का-भिरुल्काबहुदंष्ट्रापाट्यमानशशलक्ष्मश(शि ? श)रुधिरधाराभ्यक्ता इव प्रज्वलन्त्यः प्रदोषेषु पेतुः(?)। प्रनृत्तमृत्युबाहव इव बहुधा धूमकेतवः प्रावृण्वन् दि(व?)शः । सर्वभूतक्षयदर्शनाक्षमत्वादिव स्वयं स्रुततारकान्धकारि(का ? ता) द्यौरभूत् । तादृशीं दिवमिवानुशोचन् प्रशान्ताङ्गारनिष्प्रभः प्रभाकरो रिपुणा स्वर्भानुनाभ्यसूयत । रामलक्ष्मणाविव मलिनसन्तापिनौ सोमसूर्यौ कबन्धेनोग्रं जग्रसाते । तदेवं भौमान्तरिक्षदिव्यैर्महोत्पातैर्वार्यमाणमपि राजमण्डलं मगधमालवेन्द्रयोराज्ञया कालदूत्येवाकृष्यमाणं समाजगामैव समराय ।

तदा च राजा राजहंसः सज्जभूयिष्ठसैन्यमण्डलो महादर्शनं(ददा ? मा) लवेन्द्रदूतं द्वारप्राप्तं द्वारमुखादुपलेभे । ज्ञातप्रायप्रयोजनस्तमीषदाविद्धमन्युना मनसा मानवेशः प्रवेशयामास ।

प्रविश्य चासौ राजानुभावजनितसाध्वसं हृदयमभिनिगृह्णन् ब्राह्मणायनो दक्षिणपाणिमुद्यम्य स्वस्तिशब्दमुच्चैरुच्चारयामास । रिपुवचोहरं च तमग्राम्याभिजा-

1. L. about 28 letters.
2. „ 16 „
3. „ 5 „

(त्य)सौम्यरूपमनिष्ठुरप्रगल्भदृष्टिसञ्चारमाकृतिप्रत्ययाद(प्र ?प्रा)कृतोऽयमित्यवधार्य (तग ? द)र्मासने सज्जनादनुजग्राह मगधराजः ।

आसीनं च तं मुहूर्तविश्रान्तमुपगृह्य निसर्गस्निग्धया दृशा मालवेश्वरस्य क्षेमारोग्यं पप्रच्छ ।

दर्शितादरस्तु दूतस्तथेति क्षेमारोग्यकथनानन्तरमनुक्रमेण स्वमागमन-प्रयोजनमित्थमाचचक्षे—देव ! देवेन मालवेन्द्रेणास्मि भवत्सकाशं कुशलवार्ता-परिज्ञानार्थं प्रहितः । स्निह्यति स राजा निसर्गतोऽत्र निबद्धपक्षरागः । निष्कारणमे(व)वा जन्मान्तरनिरत्ययप्रवृत्तकर्मवासनाबलेन वा देहारम्भकभूतभूम-सामर्थ्येन वा दर्शनमात्रेणैव क्वचित् कश्चिदारोपयति पेशलं प्रणयम् । अस्पेतरं चाप्रतिसंहारदारुणं द्रोहमितरत्र । सैषा लोकस्थितिः । स्मरति चासौ माहात्म्यनिबन्धस्य निर्व्याजविजृम्भमाणवीर्याहृतहर्षविस्मयस्य वमद्वह्निवर्ष-भीषणप्रहरणाभिपातव्यतिकरस्य कातरभयासनस्या(ष्टा ? न्या)दृशोदारपुरुष-स्वादीयसः सम्प्रहारपरिचयस्य । तानि तानि तत्प्रातिब(न्धा ? द्धा)नि शौर्यत्यागसत्यौर्जित्यसंहितानि कथान्तराणि रसातिरेकेण पुळकितकपोलः सभासु सम्प्रवर्तयन्न तृप्तिमेति । आह चैव मन्मुखेन स(र ? म)क्षमिव स्नेहचक्षुषा पश्यन्निह भगवन्तम् । धन्यं बत मानुष्यकं यत्रासि[1]....सुभगा बत भगवती भूतधारिणी या त्वया सनाथीकृता । सैव च देवी महाभागा स(हस्र ?)मग्रदोष-दुष्टायाः सीमन्तिनीसृष्टेस्तीर्थस्नानशुद्धिरिव पाप[2]....वानल्पतेजा दिशः प्राच्याः समध्युषितवान् नस्य नादा मा जवं जवेन विकालस्रोतस्यद्यापि(?)किञ्चिदेवंभूतं

1. L about 5 letters
2. „ 18 „

भूतपूर्वम[1]...तेजस्वी चक्रवर्ती देवस्तिग्मरश्मिर्न भ(वस्वा?वा)निवानेकराजमण्डल-
क्षपणयोग्यां शक्तिमुद्वहति, नोच्चलितधातुरागरक्तान[2]....नेकवर्णानन्दमुदीर्णहंस-
शब्दो विकरोति न क्षत्रकुलानि चानेन तेजसा तिरस्क्रियन्ते । कामं च महाबलः
प्रभञ्जनात्मा चाञ्जनाहृदयवल्लभ[3]....क्रान्ताश्च पुनरनेन बलजवलुलितसकलजल-
धिवेलावनेनावनेरवनमयता शिरांस्युच्छ्रितानामनेकशश्वक्रवाळम्, अपि तु नित्यं
भवानिवापांसुलै[4]....यथा प्रवर्तितुं कृतप्रतिज्ञः । कृतार्थजन्मनश्च तानवैमि येषां
महाहवेष्वत्रभवतः प्रतिव्यूह्य विरतानामिहाभूतसम्भवस्थास्नु स्थितं यशःशरीरम् ।
परत्र च वीरकळत्रश्लाघाभावनीभिरनघयौवनाभिः सहाप्सरोभिरुत्फुल्लकल्प
पादपपारिजातसन्तानकमन्दारासु नन्दनवनभूमिषु मन्दमन्दं मन्दाकिनीतरङ्ग-
वायुभिरायासितबालचामीकरारविन्दसरःशतैरङ्गानि सुरतखेदसुप्तानि संवाह-
यद्भिरानुगुण्यसन्धुक्ष्यमाणकन्दर्पाशुशुक्षाणि रममाणानां प्रदक्षिणीभवत्यखण्डकल-
कल्याणराशिः । मम तु मन्दभाग्यस्य बहुतिथमम्लप्रहारजनितमोहमूर्च्छान्धकार-
मुषितचेतसो रणाङ्गणतलास्तीर्णकम्बलशयितस्य शिरसि मदूर्जितप्रतिगर्जिता-
र्जितामर्षेण त्वया स(ह?)रभसाभिघातखण्डितकरण्डकोच्छलवृत्तलण्डजटिलिताम्बरं
चरणमनवशेषक्षत्रियसमक्षं निक्षिपता निस्तीर्णतुङ्गसङ्गरभरलघुरात्मा कृतः ।
कृतश्चाहं हास्यवस्तु निस्तलवृत्तकीर्तिमुक्तावालिमण्डनानां मनस्विनाम् । सुभरो
हि भारः क्षितेरुपरिलग्न उच्चैःशिरसां, न तु लघीयान् परस्य पादरेणुः ।
परचरणाक्रान्तमस्तकस्य च मनुष्यस्योष्णीषमिवोत्तमाङ्गाग्रवर्ती दूरमपनीयते

1. L. about 30 letters.
2. „ „
3. „ 18
4. „ 3 „

जातिधवलं वीरव्रतम् । उत्तंसमधुकरकुलानीव झटित्युत्पतन्ति स्वभावमलीम-
सातिनी वक्तयानि (?)[1] । कुसुमस्रज इव कोमलावदाता म्लायन्ति कीर्तयः ।
वासचूर्णप्रकर इव प्रयत्नरोपितः प्रक्षरति कुलाभिमानः । चूडामणिरिव
स्फुरितरागश्चूर्णीभवत्यहङ्कारः । केशकलाप इव दीर्घकालसंवर्धितः पर्याकुली-
भवति प्रभावः । भावाश्च पुनरभावा एवास्य । मन्ये परम्पराकस्यास्मिन् (?)
मूल एव निकृत्य मस्तकेन महीस्पृशा परेण पातिते छिन्नाशेषशाखे
शाखिनीव कम्रचम्रधारा(?)[2] दारयन्ती हृदयमतिनिष्ठुरा पतति लौकिकानामवज्ञा-
दृष्टिः । अतस्त्वामेकवीरं भूयोऽपि समरप्रवर्तनाय प्रार्थये । यत्रैष प्रचलित-
वीरबाहुपादपवननपवनवाहिनी(?) ममावकीर्येत महानवमानराशिः, तदाति-
भारनामितं वा दुरुद्वहं शिरः । श्रेयानसावेक एव यः शिलीमुखप्रकर-
पातकवचिताशोकपुन्नागनागव्यूहेषु सम्पूर्णे काममूलमित्रपरभृतश्रेणिखलाकुला-
रण्यके स्फुरत्प्रभासिलतावनादहासभासुरेषु(?) रणवसन्तवासरेषु वीरगोष्ठी-
विहारशीलः स्थानदत्तदन्तखरतरनखरप्रहारो रागपाटलमोचनोदरः सरभस-
दष्टदन्तच्छदो रसकण्टकिताङ्गयष्टिर्लीलायमानां विजयलक्ष्मीं सकचग्रहं रन्तु-
माकर्षति । तद्बधान परिकरम्, उद्दामदर्पनिर्भरभटार्बुदबृहत्कळेबरोत्सधवे
तु बन्धस्खलितत्वाहिनीबलकीलालवाहिनीः(?) कार्तवीर्य इव कर्तुमशूर-
मुखाणि च तानि[3]....वल्लभानि भूयोऽपि प्रभूताम्भःसम्भाराध्मातलम्बोदरा-
म्भोधरध्वानगम्भीराणि नर्त्यमानहृष्टभटशिखण्डिमण्डलानि कण्ठगर्जितानि तत्र
छ[4]....मुखविहारसिन्दूराळिन्दसुन्दरमिन्दीवरपत्त्रनीलवर्ण (ला ? या) कालरात्र्येव
त्रासयन्त्या जगद्विजृम्भिकाभिर्विकटकुटिला भ्रुकुटिरेखा[5]...द्वयं लोचनयुगळ-
गळत्तुहारो(?) भारतसमर इव सम्प्रत्यपि समस्तदृप्तक्षत्रपक्षसं(र ?)क्षयेण क्षिते,

1. We may read मलीमसानि वाक्यानि.
2. Shall we read ककचाग्रधारा.
3. L. about 5 letters.
4. L. about 24 letters.
5. „ 30 „

क्षरितक्षतजकुल्या[1]...लेषु रुधिरचन्दना(र ? नु)लिप्तमूर्तयस्त्रिदशवारविलासिनीसाभिलाषकटाक्षलक्षिता विलसन्तु विक्रमक्रीडया यौधपुरुषाः । प्रतिरोमकूपनिपतितानि[2]....जर्जराणि प्रवीरमांसानि परिहृत्य रक्तपानमाचरतु प्रनृत्तश्रान्तः पिशाचवर्गः । संवर्ततां च व्यवशान्तदर्पोष्मणा सुभटजीविताहारोपहारेण भगवान् वैवस्वतः । स्वतन्त्रश्च मुमानि मर्महा वीरमुत्सृज्य सुखाशयः कुलोद्यतो मुखं प्रधावन्ति(?) । इत्येष वः समरसम्बन्धिनो यशःशरीरकल्याणकामस्य माळवेश्वरस्य मदाननार्पितः सन्देश इति ।

उपसंहृते वचसि वचोहरेण स्मयमानमुखो महीपतिः प्रतिव्याजहार—समर्थमिदं समग्रम् । अर्थो हि महात्मनामनुच्छिन्नसन्ततिर्यशःप्रवाहः । स च विना पुरुषकारादनन्यसाधना(न?)धीनः क्षत्रबन्धोः । लक्ष्मीरपि बाहुदण्डनिर्दयभ्रमितभूभृन्मण्डलेन चाकर्षणीयेति सुरासुरामृतमथनमार्गेणैवायमर्थो निर्णीतः । परलोकविजयद्वारं च राजन्यस्यालभ्यमानमहापशुक्रतरुचिराज्यावर्तनोपबृंहितप्रतापानलो महावीरविजृम्भणातिभीषणः प्रस्तुतशस्त्रव्यतिकरो मदकारणकल्पमनामृतायमाणसुरांशसुचिरयमध्वरो(?) मरणात्मको विधिचोदितत्वादाहवो नाम । नेदृशमपरमकृपणमस्ति त्रिवर्गसाधनं यथैतत् प्रथनकर्मसत्र(प ? वि)जयसाधितचतुरन्ताधिपत्यजीवनं मरणलभ्यस्याभ्युदयस्य बलप्रतीहारः(?) । किं बहुना युद्धं नाम सिद्धिमुखानां प्रथमम् । एवं चातिरमणीये कर्मणि प्रवर्तयितुकामेन चामुना विशालेश्वरेण यत्तत् प्रियतममतिबहळकथितं तत्पुनरमृतवायनोपच्छन्दनमिव लक्षयामि ।

अथवा नैव जानात्याभिजात्यं प्रियादन्यल्लापायितुम् । इच्छंश्चास्मत्प्रियहितैषिणा मानसारेण माळवेष्वेव सन्निपत्याहवशिरसि तत्सन्देश-

1. L. about 25 letters.
2. „ 16 „

वस्तुनः प्राप्तरूपं प्रतिव्याहरिष्यामि । अथवा पुण्यतमः प्रयोगोद्देशस्तत्रैव नोऽस्मागतोऽस्तु(?) । कामं च वासरोऽयमननुकूलस्तदपि न कार्याराधनक्षमः । कालक्षेपो मङ्गलतिथिनक्षत्रेष्टत्वं हि लाभविघ्नमवज्जमध्यपतेर्मध्यचित्तैः(?) । अतोऽद्यैवाभियोगाय सन्नह्यतां सैन्यम्, उद्घुष्यतां प्रयाणाय पटह इत्युपरचिताञ्जलिमुपास्थितं बलाध्यक्षं हर्षनामानमादिदेश । दूतं महत्यार्थपूजया योजयित्वा हृष्टवर्णं यथादिष्टनिवेदनायाग्रे विससर्ज । स्वयं च सन्नहनग्रहणाय विसर्जितराजलोकः सिंहासनादुत्तस्थौ ।

उत्थिते च राजन्युदधिरिवोद्चलदुत्क्षेपडोलायमानतरळतरङ्गफेननिकरनिर्गमोत्तरीयसमन्तः सामन्तलोकः । सम्भ्रमोत्थितानां चेतरेतरास्फालचालचालभुग्नभुजारत्नकोटयो जगररिवाभ्यर्णाजिकर्मभूरिगर्वैः(?) । भूभुजां भुजार्गळागळितगण्डमूलमदरागनिर्मृजानि भैरवरणवार्ताश्रवणविह्वलानि वामांसावसक्तचारुचामराणां वारसुन्दरीणामासन्नचन्द्रमण्डलपराहतप्रभाणि[1]....नानोपहारकुसुमभक्तिधूसरच्छवयश्चलितजनचरणशताभिघातभग्नपक्षतीनां षट्चरणकदम्बकानां शिञ्जाननितम्बरल[2]. . . नाधन्यताघ्रातमात्मानमिवानुशोचन्त श्चुक्रुशुर्मणिकुट्टिमाः ।

नरपतिरपि कुब्जवामनकिरातप्रायपरिजनगणपरिवृतो[3] .... नमालिनी नीललोहित इव कैलासगह्वरमभ्यन्तरमविशत् ।

अथैनं सांवत्सरः सह पुरोधसोपसृत्य विज्ञापयञ्चकार—देव गुरुभार्गवगर्गाद्यनेकाचार्यसन्दर्शनमार्गयाथातथ्यवेदिनो देवस्य यत् फलानि नावगाहते

1. L. about 18 letters.
2. „ 28 „
3. „ 18 „

मतिरतोऽयमर्थः प्रत्युच्यते । कथं नु गुणमवधारयत्येवंभूते भूतवैकृत्ये अत्युग्रविग्रहेषु सांख्ये वह्निदैवत्ये रक्तवारे चाहिमन्नक्षत्रे तिथौ नवम्यां दिशं प्रतीचीनमारब्धायां कयान्मायागमप्रमाणो देव इति(?)। तमसावतामसाशयः प्रत्युवाच—युक्तमिदमार्येणास्मि प्रतिबोधितः, किंतु भूविजयैषिणामेष मार्गो यद्दिनादिसम्पत् प्रतीक्ष्याम इति । स्वर्गविजयैषिणो विपरीतमेव शोभते । प्रजोपपीडाशान्त्यर्थं तु दुर्निमित्तशमनदृष्टशक्तयः शान्तयः क्रियन्तामित्याथर्वणिकमैक्षत ।

सोऽपि ननूत्पातानामारम्भात् प्रभृत्येव दीक्षानुरूपं गृहातिथ्यमुदकग्रहणं वास्तुशमनं निर्ऋतिहोमः पृथक्तन्त्रमप्रतिरथो दक्षिणेत्यष्टानामष्टादशानां चामृतोवाक्तकल्पनां रुद्रेन्द्रवरुणवायुकुबेरविष्णुसन्ततित्वाष्ट्रप्राजापत्याग्निकुमारनिर्ऋतिमरुद्गणगन्धर्वैरावतपृथिवीलक्षणानामभयायाश्चाभयार्थाया महाशान्ते(?) घृतकम्बलप्रभृतीनां च कर्मणां पुण्यतमानामन्येषां चाथर्वदृष्टानामनुष्ठानं क्रियत एव । यद्येष एव सर्गः स्वस्त्यस्तु देवस्य भवतु विजयाय स्नानमङ्गलमिति पुरोहितस्य वाचमनुरुध्यमानस्तदुपदिष्टेन वर्त्मना कृताभिषेकस्तेजःस्पृहयेव समुपस्थाय विधिवद्भगवन्तं भानुमन्तं द्विगुणप्रयत्नः पुरो(धाः ? धसा) पुण्याथर्वमन्त्रशान्ताभिरद्भिरभ्युक्षितमौलिः शुक्लमाल्याम्बरो जगति जातस्य दुर्जातजातस्य शान्तये कृत्स्नमेव कोशजा(तं) द्विजातिसाच्चकार ।

ततः क्षणादरुणरागरञ्जितदिनमुखानुकारी हरितभुवनाभ्यन्तरविवरो(?) दिनकरमण्डलस्फटिकपाटलीकरणपिण्डालक्तकरसः पिण्डितसकलजगदुपप्लवद्रुमारण्यानीदहनदावानलः खलकलिक्षणदाचरकटकलुण्टाककाकुत्स्थकपिलायमानो गगनसरःकमलराशिरंशामुखरोचनाच्छुरणकल्पः कल्पयन्निव कल्पितहि(र)ण्मयाण्डसम्भवं कल्पमूल(?) दिवमुत्संसर्प विप्रगणप्रहर्षप्रसारितस्य मेरुशिखरविपरस्य(?) कनकराशेरा(म ? र)क्तशाकविलासिनीकपोलद्युतिरतिमहानालोकप्रवाहः । यस्य च विजृम्भमाणस्यावकाशदानार्थमिव तिरोधत्ते स्म समग्रा

दुर्निमित्तसंहतिः । अनंहसां च ब्रह्मसङ्घानां यथाभिलाषं हेमरत्नानि स्वीकुर्वतादिति बभूवुरुच्चावचाः प्रचुरविस्मयगुरुकुतू(ह)लचलितप्रसृतलोचनाः प्रलापाः । लब्धमिदं प्रभूतमर्थजातं, शक्यमनेन सोमसंस्थाः कर्तुम् । पूर्णमिदं सुवर्णमसक्तमवाप्यते न सर्वार्थ्यम्(?)। एष महाहिरण्यराशिः, कार्यमनेन सारामं प्रातिवेश्यं गृहनिविष्टाय मे ज्येष्ठपुत्राय । भ्राजिष्णुरयं प्रभूतपूर्णमासीन्दुमुखो मुक्ताहारः, प्राय इमं प्रतिमोक्तुं ब्राह्मणी मे जिह्रेति । सकल एष कन्यालङ्कारः, दास्यामि सुतामनेनालङ्कृताम् । एष विषहरो हरिन्मणिः पवित्रतमश्च, बन्धयाम्येनमस्मिन्नङ्गुलीयके । महार्होऽयं जातिरागः पद्मरागः क्रय्यमनेन चिन्तयन्नपि न पश्यामि । हेमरत्नचित्रोऽयं मेखलाकलापः, इदानीं यथार्हेण मूल्येनैनं ग्रहीष्यति । कथमयमष्टसहस्रयष्टि....[1]यान्यवन्तमनेन मा करिष्यति । बन्धुरोऽयं भङ्गिपर्वा विद्रुमाङ्कुरः, करोम्येकं बालकस्य कण्ठाभरणम् । एतानि प्रमाणवन्ति प्र....[2]किञ्चित् पितुर्मे कर्णमुद्रिकायामर्पयिष्यते । तदिदं कलितपनीयं नाम पञ्चवर्णः सुवर्णयोनिरुत्तमवर्णः । इमानि तानि....[3]दिव हैमवत....[4]षाणि शुक्तिशङ्खप्रकीर्णयोनीनि मौक्तिकानि । त एते वैडूर्यशिरीषपुष्पकादम्बवंशरागेन्द्रनीलचन्द्रकान्तादयो मणयः । तानीमानि नानागन्धवर्णानि लाघवादियुक्तानि चन्दनानि । त एते विविधवर्णगन्धगुणयोनयः काळागरुतैलपर्णिकादयो भोगद्रव्यसम्भाराश्च । रत्नमिदं नीलकण्ठकण्ठकान्तनामकं प्रैय्यकमेननीलपीतश्वेतलेखतयेन्द्रायुधोद्गारिबिन्दुचित्रं च, सा चैषा द्वादशग्रामीया द्वादशाङ्गुलायामा विसी महाविसीची च(?) । श्यामिकेयं कापिला बिन्दुचिता च । काळिकेयं कपिला कपोतवर्णा च । कदलिकेयमपुरुषहस्तायता च । चन्द्रोत्तरेयं चन्द्रचित्रा । ण्याकुलेयं(?) कदलीत्रिभागा कोलामण्डलचित्रा च ।

---

1. L. about 15 letters.
2. " 18 "
3. L. about 1 letter.
4. " 24 "

बहून्येतानि स्निग्धबहुलरोमसुकुमाराण्यजिनरत्नानि । आविकोऽयमनेकयावनप्रकारः क(द?)म्बलादिः । एषा वङ्गपुण्ड्रादिसम्भवा दुकूलजातिः । एता मगधपुण्ड्र-सुवर्ण्यकुड्यदेश्यनागलिकुचबकुळवटयोनयः पत्रोर्णाः । कौशेयमिदम्, एते चीनपट्टाः, कार्पासिकमेतत्, तदापरान्तिकम्, एतन्माधुरं, माहिषकमिदम्, एष कुप्यराशिः कोऽस्य वोढा दृढं बधान रत्नभाण्डं यथा पथि न भ्रश्यति । भरो गरीयानशक्तोऽयं वोढुम्, अयि धिक् त्वां भोक्तुमेव जातम् । उद्धर यत्नेनारोपय स्निग्धमुद्वह(न्स?) भज्यतेऽद्य स्वाध्यायः । कीनाश किं ममाङ्केऽपि हस्तमर्पयसि, कोपनक त्वमेव तावन्मे दूरमुद्वह । हा दृष्टसारं मे फल्गुना विपरिवर्तयसि । दुर्मुख ! दृष्टमेभिः सारतरं मया लब्धमखरकमर्ककर्करमक-श्रुकमयमकमरकुमकर्मकमसिक्तं च मे मुक्ताजातमिदं तुष्टः कथं कथमिहागतमसन्तु-ष्टकिष्टदुष्टैनैकेन(?) बहूनि निस्तलस्थूलवृत्तस्निग्धभ्राजिष्णुगुरुश्वेतदेशविद्धान्यमूनि मौक्तिकानि, प्रभूतान्येतानि जातरूपरूप्यताम्रपात्राणि । त्वमपि चैषामर्थमुद्वह, महादानमिदं प्रवृत्तम् । अहो महात्मा महाराजो नैवं नापराह्णिकः कर्णो राजा वा युधिष्ठिरो दृष्टवान् वसूनि(?) । कारणमत्र मन्ये मन्त्रिणामसन्निधिः । मा मैवं, न तेऽपि शुष्कपाक्षुण्ययोगश्रद्धारुद्धपरलोकदृष्टयः । हंसश्चायं हंसपरिवारश्च । सर्वथा समर एनं रक्षन्तु शक्रमुख्या लोकपालाः । लभतामयमष्टादशद्वीप-लक्ष्मीपरिग्रहमग्रेसरं चक्रवर्तिनामत्यादित्यतेजसं तनयम् । इत्येतानि चान्यानि च यथाश्रद्धं व्याहरद्भिर्वहद्भिर्वाहयद्भिश्च द्युम्नजातं द्विजातिभिरुपरुध्यमानेषु वर्त्मसु बलनिर्गमदर्शनबद्धरागैः पौरयुवकदम्बकैरन्योन्यविमर्दसम्बाधमारुह्यमाणासु सौध-हर्म्यवळभीसभाग्रदेवतायतनचैत्यवृक्षप्राकारवलयप्रतोळीषु भर्तृस्नेहविह्वलाकुलाबला-लोचनजलप्रसरनिरुद्धनिर्गमानां प्लव(?) इवापतति दृढतरे सेवाधर्मस्मरणे हरिहयवज्राभिपातघर्घरितकुलगिरिगुरुशिलापक्षनिर्घोषभीषणं रणितमाततान प्रयाणदुन्दुभिः ।

दुन्दुभेश्च प्रळयाशनिदण्डचण्डपातेन बालिभुजेनेव हेमकोणेनाभि-हन्यमानस्य रसितमाकम्पितत्रिभुवनमन्तेषु दिशां दशानां चस्खाल । येन

सरभसमाहतो भीत इव प्रतिखबलविषमवलदजगरभोगजिह्मैर्गुहामुखैः सुतरा-माररास लोकालोकः । यस्य च शिखिकुलानीव जलधरारसितस्यानुनेदुरुद्दाम-रोमहर्षणानि सकलस्यैव बलसमूहस्य सन्नाहतूर्याणि । तस्मिंश्च मुहूर्ते मुखपवना-पूरितो भीत इवादरेण सजीवेनेव तारतरं शब्दयमानेन[1]....ङ्खमण्डलेन संवर्त इवोद्वर्तन्त चटुलतरतुरङ्गतरङ्गपङ्क्तयः । परिप्लवप्रवरशस्त्रपण्यप्रपूर्णरथानीक-नियुतप्रोतव्राता(?) स्फीतजनघनौघरुद्धदशदिशश्चेत[2]....जलधयः ।

भूपतिस्तु पुरोहितोपदिष्टेन वर्त्मना विधाय सर्वं प्रास्थानिकं क्रियाकलापं चन्द्रालोकमयमिव नेत्रनिवेशाभिरामधवलमंशुकयुगलमुद्वहन्[3] ....शरदभ्रकुलेनेव कल्कतेन(?) तदनुसारिणा चन्दनेन कृतसमालम्भनः प्रतिमुक्तमौक्तिकप्रायसकल-भूषणो भीमानभीरपिशुनं तावर्षमिवातिदर्पादात्मनैव(?) लीलया दधानो, धवल-मालतीस्मितमुखमुकुलकल्पितमुण्डमालिकाकुसुमकोमलया भ्रमणीयदिगन्तराला-लोकनयारूढाग्रलवाग्रेसरसर्वोच्चैःशिरसात्मकीर्त्या सर्वशुक्लश्च, कैलास इव दशमुखबाहुदण्डश्चक्रे(?) सकललोकपालोत्कम्पनकारिणि द्रढीयसि व्यवसाये वर्तमानः, स्थानदत्ततरुणतोरणजालजटिलपालिकासहस्रादिभिः(?)नवकमलिनीहरि-तवर्णप्रस्तररत्नकुट्टिमादुपरितलाधःपार्श्वदत्तकीलिलम्बमानरत्नकाञ्चनकुसुमसञ्चयसुख-सञ्चारेण मणिमयाळिन्दवर्त्मना पद्मरजःस्पर्शपरिहारायोर्मिकरकमलैरिव स्वप्रति-बिम्बकैः पदे पदे धार्यमाणचरणश्चरणाभ्यामेव निर्जगाम ।

निर्गत्य च प्रसरत्यपि प्रणामलालसानां वसुमतीपतीनामुन्मेषिणि चूडा-मणिमरीचिजालातपे ससम्भ्रमावर्जितमकुटप्रच्युतापीडकुसुमदोलायमानमधुकर-

---

1. L. about 7 letters.
2. „ 24 „
3. „ 18 „

कुलान्धकारकल्माषितं कुड्मलायमानकोमलाञ्जलिकमलवनसहस्रं चित्रीयमाणमम्बरतलं ददर्श ।

जय जयेति च तारतरमुद्गायतो वन्दिवृन्दस्यामन्ददुन्दुभिध्वानानुयातमायतशङ्खशब्दमिश्रम् अतिकलकाकलीकलितकाहलरणमूर्जितप्रहतमर्दमस्निग्धनिप्रादमांसळमनुसृतकांस्यतालसंकुलमालोकशब्दमालोकयन् (?) आकर्णपल्लवमाभूमिलम्बवालनीलचामरकलापाममलकार्तस्वरकलितालङ्कारकान्तां चारुकोमलपुष्करकरां जयलक्ष्मीमिव जयलक्ष्मी ....[1] ससम्भ्रमाधोरणसंज्ञानिवेदितां द्विरदकन्यकामारुरोह ।

आरुह्य च हंसतूलगर्भप्रदिष्ठचीनपट्टोपधाने परिस्तोमवस्यनेकरत्नचित्रपर्यन्ततया यात्रारम्भयोग्यानीन्द्रमिवादौ जित्वा गृहीतानीन्द्रचक्राणीवावहति सुविहितप्रहरणाचापे(?) महति कनकपर्याणके सुखनिषण्णः पश्चिमासनगतेन हेमाङ्गदवलयरत्नहारदीधितिस्तबकचित्रवारबाणेन **बाणदेवनाम्ना** सामन्तपुत्रेण कल्पवृक्षेणेव फुल्लरजतपुण्डरीकस्योह्यमानस्य मध्यार्पितमहामणिमयूखपटलपाटलांशुकचितलीलावेष्टनस्य बालातपरक्तशारदाम्भोधरानुकारिणश्चामीकरविकटदण्डस्य प्रलम्बतरलस्थूलमुक्ताकलापस्मेरपर्यन्तभागस्य महतः श्वेतातपत्रस्य निसर्गशिशिरछायया वार्यमाणमार्ताण्डकरावलेपः, पक्षकरेणुवर्णिनीभिर्वारयुवतिभिराधूयमानचामराभिः प्रावृण्मेघ इवोपान्तचलवलाकाभिरभ्रालोत्संगिनीभि (?) सौदामिनीभिरुद्भासमानः समतिक्रम्य दुरुच्छ्रासं वहन् महाजनत्वाज्जगदुद्वारिणीव समग्राणि(?) सकुतूहलपौरसुन्दरीजालमालमार्गप्राहितलोचनसहस्रसंछादितामुदश्रुदुत्पलप्रचयमेचकामिव भवनदीर्घिकां राजहंसो राजवीथीमवजगाहे ।

नगर्याश्च सपदि बलभरपीड्यमानभूभागशिथिलमूलडोलायमानभवनमण्डलाया(त ?) मत्तगजकर्णतालपवनपराहतध्वजपताकाया भर्तृवियोगदुःखात् समुज-

1. A space for 5 letters is left in the Ms.

विक्षेपं व्यावेष्टमाना(ना ? या) इव बद्धजनकोलाहलमतिमहदाकुलत्वमलक्ष्यत । बाष्पजलबिन्दव इव नगरदेवतानामवनिपतौ पेतुरार्द्रवंशवलयन्तो(?) लाजमुष्टयः । कृष्णागरुधूममण्डलग्रस्तमन्तरितमिवान्तरिक्षमवनिपालया(त्रां ? त्रायां) विजयांसता[1] जीमूतपटलेन । ध्वजवनमरुद्धूतकरिकुम्भसिन्दूरधूलिमिलनारुणै रणोन्मुखस्य राज्ञः कनकनाराचैरिव दारुणैस्तरणिमरीचिभिरम्बरशराधिरापूर्यत । निर्ययौ च नरपतिरण्डादिव हिरण्यगर्भो लोकमाकर्षन्नगरात् । नगरे च तस्मिन्नन्योन्यविमर्दस........[2]सेतुबन्धरुद्धरेवाजलप्रवाहानुकारीणि प्राचारिषुर्दिक्चक्रवालमाबद्धकळकळानि ।

तत्र केचिदुत्तमहयैरष्टहायनैस्तूर्णपदाहरणपूरितातिरक्तं पर्वा....[3]मुहुर्मुहुर्जवमिवोद्गिरद्भिर्जागतब्रह्मचर्यसमावृत्तैरिव क्षिप्रप्रयुक्तपाणिग्रहणैः काश्यपीयपाठकैरिव क्रमकृतावाल(?)स्थितिभिर्विजिगीषुभिरिव दृशीतलवुपदानुवर्तनव्यसनविग्रहैः(?) समरशिरःसमाधूननैरुपेतेन मार्गवल्गिभिः प्रजग्मुः(?) ।

अन्ये प्रततमहोच्छ्रासारम्भक्षुभितमूलमिव स्तुव(?)माधून्वद्भिश्चिरकृतबन्धस्थापनत्वादिव रुद्धगत्यावेष्टमानैर्विक्रमकौशलादिव बलीमुक्तान्धुरं परिपीडितामुद्वहद्भिश्चतुरः शते(?) वामे वामैर्दक्षिणे दक्षिणैरन्तरा च लङ्घयद्भिस्तूपचालीमार्गवल्गिभिस्तुरङ्गमैरगमन् ।

अपरे समुच्छ्रितपूर्वकायतया विलम्ब्य दर्पहारावष्टम्भादिव जघनभागेषु बमद्भिरुन्मृशद्भिश्चापमृश(द्भि)श्च शिरसा पादैश्च तदनुरूपैः पवनजवजयादिव मल्लिलालं(?) विलम्बयद्भिश्च श्लाघितमार्गेण वल्गद्भिः सप्तिभिः प्र(त)स्थिरे ।

तथापरे परिपीडितसकलांगमचलिताक्षमत्याशुभगात्रं सुस्थितासनबालं चरणचतुष्टयसमुन्मुक्तपृथ्वीतलमनस्युच्चमजिह्वा इवापोषन्त(?) ।

1. Shall we read विजयं शंसता.
2. L. about 16 letters.
3. " 5 "

केचिद्दह्यमानचरणा इव क्षिप्रमुक्तभुवो विनमितोर्ध्वकन्धराः सङ्किरन्त इव पाणिभ्यामुरगा इव प्रारभन्त लङ्घयितुम् ।

त(दै ? थै)के बाह्लीकाः संपिण्डितपूर्वगात्रमवरार्धविकृष्टं वैहायसं बाधानमवलव्यतिकीर्णं(?) कलविङ्का इव सहितं नाम नीचैर्गतं मार्गमदर्शयन् ।

अन्ये वैहायसोरस्कं सुसंरम्भविलम्बितमुभयतः सुविस्पष्टोदाह(?)पादान्तरमविरतायतरश्मिप्रमुक्तमायतं नामानुतिष्ठन् ।

अपरे केदारविषमकर्दमाश्मधानादिषु बाह्यमानप्रतिपन्नपाणयो नतवंखनश्रमेऽप्यतिष्ठन्तः सर्वं नाम समभिपेदिरे(?) ।

तथापरे मत्तलीलया-प्रनृत्यन्त इव गच्छन्तस्तथा च वक्रतरं वंखन्तो बाह्यानुवृत्तं नामाभ्यवर्तन्त ।

केचित्तु नीचैर्गतेषु शोभनतरं किञ्चित् किञ्चित् पूर्वार्धोपवेशनमल्पसंक्रान्तिविकम्पितशिरस्कं प्रकीर्णगात्रं प्रकीर्णकं नाम प्रायोजयन् ।

अन्येऽनल्परत्नुपविषा(?) परार्धदर्शितक्रीडाकारवंखितप्रकीर्णगात्रं प्रकीर्णतरं नाम, केचिद्दर्पितपूर्वगात्रा वेल्लितजानुकूर्चकूणिताः सुनिवेशितशरीरा धेनुदञ्चितोद्यतमल्पे संक्रान्ते(?) वहन्तः संवृतसमशिरस इव वेल्लितं नाम, केचिदाशु गृहीतपाणयो विभक्तपार्श्वसङ्क्रान्तयोऽपरार्धनिषण्णखेलगामिनः(?) सिंहागतं नाम, केचिदचिरभास इव पूर्वगात्रास्थिताकाशाश्वरणैरञ्चितोद्वेल्लितैः समविभक्तपार्श्ववंखिताः स्वस्तिष्ठाहितं नाम, केचिदञ्चितवामचरणा दक्षिण बुलुखित-[1]भूतलाः शिखासाभिविधितोऽल्पे संक्रान्ते वहन्तो निषण्णाचलिताः(?) शारभं नाम, केचिदपरचरणनमितभूमयो वैहायसपूर्वकाया बहुप्रकारप्रलङ्घना व्यक्तविमर्दगात्रदर्शितक्रीडाः शरभक्रीडं नाम, केचित्पिण्डितविभक्तगात्रं दर्शिनाभिनिषण्ण(?)-समसंस्कारमूर्मिगतं नाम, केचिदञ्चितविधुतशिरस्कं दर्शितनाभि सुसमाहितपरि-

1. Shall we read खुरालिखित.

[1]. . . .घस्ताज. . . [2].ह्वमतिगुरुखरघोषमाकाशप्रचुरयानमसृष्टप्रायभूतलमसमायतदर्शितपक्षं त्वरितव्यतिकीर्णपूर्णवारितं त्रीतालं नाम, केचिल्लब्धदक्षिणपदं समञ्चि(त)वामगात्रं गात्रविषमं समासनं विभक्तपाणिसंक्रान्तं ससौष्ठवं पञ्चपाणिरताः पञ्चवान्नाम,(?) केचिद्वेल्लितसूपविष्टोद्यतसमाहितं निक्षिप्तप्रथमगात्रं पुनःपुनर्गृहीतपाणयः पक्षपयदर्शितस्त्वरितगामिनो(?) द्रावितं नाम, केचिदुत्पन्यस्तवदनिषण्णाखचञ्चिताः(?) सम्यगुच्छ्रिता वैहायसस्थिरधुरा बालस्पृष्टभूमयो भूमिशायितमुसलवर्तनक्षमाभ्यां स्वल्पेऽप्यध्वनि सुबहु....[3]मन्तरिं नाम सप्तयः समादर्शयन् ।

अथ केचन धुरितमार्गपक्षप्रवर्तितमुत्क्षिप्ताञ्चिताशिरोधरं मायूरं नामकेचन संवर्तितमधुरत्वरितगात्रं सुब ....[4], केचन समायतस्तब्धकायमतिखरमृदुत्वरितगात्रं प्रसारितधुरितत्वारितवीक्षितं स्थिरवामं नाम, (केचन) त्वरितपक्षपूर्वविमुक्तपश्चिमम(न ? व)नतपूर्वगात्रं ....[5] नाकुलं नाम, केचन त्वरितवीक्षितमभीक्ष्ण, पल्लवं प्रचुरपूर्वपृष्ठविकम्पिनि(?) स्पृष्टगात्रं भद्रपाश्चिमासनं वेलगात्रं नाम, केचनाञ्चितमधुरकम्प ....[6] गन्त उपगगनं स्पृशन्तं इव भुवनमतिखरखुरघोषतुलितमेघनिस्वनं रुद्धगात्रं मुक्तवलाहकं नाम, केचन प्रचलितफलजघनरन्ध्रकटिकर्णकङ्कणसोदरकटाक्षकेश ....[7] रश्रोणिकर्मपृष्ठमेकनाळिकयार्धयोजनक्षमं सामुद्रस्वस्थपातानुयातपोतानुकारिणमुत्क्षुभितप्लवमार्गं नाम, समभिपत्य सादिमनोनुगामिनो जग्मुः ।

नैकलीलादर्शितवीरतरुणा भद्रवाहैश्च वाहैः कुञ्चिताकुञ्चितासनमृद्धसंपु(?)क्षिप्ताक्षिप्तक्षिप्ताक्षुभितगात्रावरैरुपकण्ठप्रमाणेन धैनवीं गतिमनुसरद्भिर्निहं

1. A space for 5 letters is left.
2. „ 7 „
3. L. about 4 letters.
4. „ 16 „
5. L. about 36 letters.
6. „ 32 „
7. „ 3 „

च (?) नातिमनोहराणि वामदक्षिणमध्यमानि चाम्बूकृतानि पार्श्वप्लुतानि च दर्शयद्भिर्यथावकाशं यौवनोत्सेकेन किञ्चिदन्तरमतिक्रम्य पुनःश्लथखेदमपरिहरन्तः सम्मर्देन च निरुध्यमानाः शनैः शनैः प्रजग्मुः।

आधोरणाश्च प्रकीर्णेन समाहितोच्छ्रितपूर्वकायेन शृङ्गारेण च रमणीयेन पणविकारेण नीचैर्गतं स्थूलोच्चयं मध्यं च मतङ्गजान् गमयन्तो लीलयानगतमर्धनखगतं पदगतमर्धनखगतमध्यर्धपदगतं च यथावसरमु(त्प ? प)पा(त ? द)यन्तः पश्यतात्मनां सविस्मयमनाः (?) क्षणं विलम्ब्य पुनरनुसुखं प्र(त)स्थिरे ।

शनैः शनैश्च जनपदाधिष्ठानजनितभूतिरविरलप्रचरितकरितुरगरथानीकशतसहस्रसंभृतोपचयो बहुक्षमोपादानतया बिभ्राणो वर्णविशेषानुद्दामदर्पभटसहस्रहेलोल्लासितासिपञ्जरमध्यपाति गृह्णन् दिशां दशानामपि चक्रवालमालम्बितच्छत्रचामरध्वजपताकः प्रमदमनादरेण सकलस्यैव राजकस्य सरभसातिक्रमणमलिनितमुखरागस्य कृपणचूडामणेः शिरसि कुर्वन्न(?)वष्टब्धसकलशैलाटवीसमुद्रद्वीपकच्छः स्वेच्छावरुद्धपिण्डितसमग्रवाहिनीप्रवाहः प्रावर्ततातिवृद्धिकलुषो नहुष इव दिवमप्याक्रमितुं पार्थिवो रजःसमूहः ।

स च तुहिननिवह इव शिबिराबलाननकमलानि धूसरीचकार । तत्कमलनिहित(?)ग्रहामर्षादिवोष्मायमाणान्यर्कतेजांसि जग्रसे । तदन्तर्दाहोद्दामतृष्ण इव मदजलानि यथाकामं पपौ । दानसुरापानमत्त इव खड्गधारातलेषु चस्खाल । खड्गक्षतविह्वल इव करिकुम्भस्थलीषु मूर्च्छितः पपात । ततश्च समुच्छूतकुम्भसिन्दूरपृक्तो रससिक्त इव कर्णतालतालवृन्तवीजितः शनैः शनैरुत्पपात। उत्पत्य च व्रणपट्टिकाग्रहणहेतोरिव ध्वजदुकूलचाराण्युपससर्प। ध्वजपटपवनपराहतश्च भूयः सुकृतीव स्वरेवारुरोह रेणुसञ्चयः ।

सञ्चितेन च सकलराजलोकमकुटरत्नरागच्छुरणपाटलपतङ्गमण्डलमुल्लसद्ध्वजपटानिलाकोटितामरापहंसकमंसमृणालिकावलयमिव(?) कमलिनीपलाशमनेक-

फेनहिरण्मणिहरितमम्बरतलमाचेमे । भ्रमरपुञ्जनीलेन बहुलपरागेण पटुरयभरितसहस्रखुरखुरविकटपाण्डराः फणाभित्तयः(?) । तदा च बाडव इव धूलिजलधेरुल्ललास क्वचिदवनिपालभूषणानामालोकप्रवाहः । कलुषरजःपराभवपिशुनमुत्पाततारकावर्षमिव क्वचिदुत्ससृजुः । करशीकरबिन्दुजालकुञ्जरघटाघटितकरप्रचाराश्च मन्ये तमांसीति रजांसीति क्वचिदपाहरन् परिपतन्तश्चामरेन्दवः(?) । जल ....[1]नन्धूलि....[2]रमन्त कुञ्चितालोलदुकूलजिह्वाध्वजभुजङ्गमाक्षिविष्टपाविष्टम्भगर्वितपातालजिगीषयेव पुनरपारे पारावारपयसि बलपरागः । ....[3]लशैलक्षोदराशिनिकाशेन तादृशेनाहवरेणुसम्भारेणायमनावष्टब्धा नोपययुः स्थलभावं जलनिधयः । ततश्च करिकरशीकरासारवारिवेणिवाहि ....[4]यासितबलविलासिनीकपोलघर्मजलवर्षिणा खरखलीनखणुखणायमानतुरगमुखविक्षेपविसृत(?)फेनलालावस्तबकशबलितेन बलदालिदलितमही....[5]लवासारधूसरेण कटकसंकटमिवापहर्तुमितस्ततः परिभ्रम्य यथाशक्ति शमितमुनिराजश्चतुरचारचारुचारमससाटोपदलितधौतासिलतावचनप्रेरितेन पृतनामारुतेन(?) ।

प्रशान्ते च रजसि प्रचलकदलिकादुकूलचिरमृष्ट इव स्पष्टतामगादाकाशमणिदर्पणः । चटुलतरतुरङ्गबृन्दवेगविक्षिप्तानीव दूरीबभूवुर्दिङ्मुखानि । नृपशतमकुटमकरमुखप्रलीननिर्गत इव रराज रत्नालोकलोहिताकवो[6] दिवसः । सागरसलिलोन्मग्ना इवादृश्यन्त रत्नदीधितिखचितचलचामरचटुलपक्षाः कुञ्जरकुलगिरयः । करिकुलचरणसहस्रसङ्घट्टघनीकृता वज्रमयीव प्रबलेऽपि बलक्षोभे विधुरतां पुनर्नाविक्षदेव मेदिनी । निर्धौतप्रसवोल्बमिवोल्बणरजोमुक्तं निर्मलीबभूव त्रिभुवनम् । अनिषिद्धप्रचारा हरिण्य इव स्वैरमारेभिरे हि

1, 2. The two lacunae cover about 12 letters.
3. L. about 28 letters.
4. L. about 22 letters.
5. „ 12 „
6. Shall we read लोहितातपो,

रेचयितुमभिनवदूर्वाश्यामलासु दिक्षु दृष्टयः। तावता च मद(ग ? क)लमातङ्गगण्डशैलक्षरितदाननिर्झरजलप्रवाहचिक्लिल्लदुर्गमं गव्यूतिमात्रमिव बलभरोपरोधादसुलभपदनिवेशस्थानमध्वानं लङ्घयित्वा विरचितनिबद्धकण्टकपतिपरिक्षेपमतिविशालाभ्यन्तरविभक्तवल्लभतुरङ्गमन्दुरमौपवाह्यस्थानस्थापितविकटपटमण्ड[1]पाग्रदूष्यसञ्ज[2]वनमिह .... टानां तृणकुड्यः सन्तु, गुप्तिरेवं भविष्यति। अत्र गोण्यः श्रेणीक्रियन्ताम्, अत्र फेलादवस्थाप्यताम्(?)। इह महानसमेव दीर्घः खण्डपटः कृत्स्नमेतत्परिक्षिपति तृणमदूरेच्छोदिषेयमाहरत कुमाराः पुरा परेह हरन्ति संहरताशु पानीयं भृङ्गारदृष्टि तिषु पुरा दोहान्तिकं कलुषयति(?) कोऽयं दर्पो यदन्यावासमध्येनाचकितं गम्यते। नन्वियं रत्नरचिता वृतिः किमिति भज्यते, प्रगुणोऽयं देशः, किन्तु भयानकोऽयं वल्मीकः, कच्छोऽयं सच्छायः, सरित्पुनरनियतामरगराज्यमिदं(?) गुल्ममण्डलमासन्नं तु मत्तहस्तिस्निग्धोऽयं न्यग्रोधः पर्यन्तास्तु नातिशुद्धाः शुद्धोऽयं नक्तमालपरिधिः। अदूरे तु सुरदसूनापणाधिक्षामूखयरत्वमग्रप्रहितस्वर्गेऽपि न कमग्रहीः(?) अग्रहीषुर्मद्गृहीतानि स्थानानि बहूनि बलिनो राजवल्लभाः। किंकृतेऽस्य प्रथमं प्रेषितोऽसि। ननु विशदाः पर्यन्तभू(म)यः कृष्णेयं भूमिरवरवर्णार्हा, न मे ब्राह्मणस्य मङ्गल्या मळयोपपाध्यायशुक्लैव चिरमन्विष्टा(?) कथं मे क्षत्रबन्धोः पीतेयं वैश्ययोग्या भूमिः स्थानायोपकल्पिता। रक्तेव च क्षीरपक्षिणी च नात्र भूरियं तु सारिण्युत्खाते रक्तवालुका नात्यम्भोवचूषणी स्वपांसुप्रतिच्छन्नापटाप्रतिपथमपगच्छत लम्बन्ते वैव कथिकाः प्रविष्ट एव सर्वः कटकजनो मुक्तास्मत्पुरुषो वशदानतिवीरमत्र भ्राम्यतां नो नैकोऽपि कमभिगन्ता नाद्यापि दृश्यते(?) [3]... दुष्टदास्ये। ध्रुवं धूर्तालापैः शृङ्खलिताः कस्य वा लभ्या गतिरिह प्रबन्धसङ्कटा कण्ठदघ्नमदकर्दमा

---

1. One folio (B of लक्क = 34 & A लक्क = 35) is left blank.
2. A space for 3 letters is left blank.
3. L. about 4 letters.

मार्गाः, रजोन्धकारदुर्गमा तुरगपद्धतिः, बलीयान् बलीवर्दसम्मर्दो ल [1].... तालपसमुचितः सामन्तनिवेशभेदशंसिनीनां संज्ञादुन्दुभीनामभिनवघनघटोन्नामेदुरेण(?) तारतरशङ्खशब्दामिश्रेण शब्दमय [2].... भवद्भवजटाभारभ्रष्टभागीरथीपातहिमाचलविपुलगह्वरह्रादबहळो बलकोलाहलः। सादरोपग्राहप्रयत्नोपर [3].... इव प्रयाणे विक्रमसमाहितसकलक्रियाकलापो दिवसमध्यवाहयत्वनिम्न:(?)।

ततश्च बहलबलपरागपरिपीततेजास्तेज इवौर्वाग्नेय्या [4]....लीभूपालशतातपत्रमण्डलग्रस्तमुक्तसौष्ठव(कः?त)या कृतसंन्यास इव प्रतस्थेऽस्तगिरिवनानि गैरिकरसरक्ताम्बरो दिवसः। नृपशतमकुटकठोरकोटिपाटितपतङ्गपरद(?)पल्लवक्षारिता क्षतजस्रुतिरिवालक्ष्यत लोहितायमाना सन्ध्या। सैन्यध्वजकदलिकाकशाघ्रातमार्गजवश्यामायमाना दिक्षु पस्नुरुस्तिमिररेखोपलक्ष्यकर्णतालाभिघातभयपलायितस्य(?) श्रमजपुलकोद्भेद इवोल्ललास तरलतरस्तारकोद्गमस्तारापथस्य। घनमपि तिमिरसङ्घातं गजघटेति मत्वा क्षणं न व्यघटन्त चक्रवाकमिथुनानि। बलरजःपुनरुद्भवभयलीनतरणिगोपनायेव बद्धमुखानि जज्ञिरे जलजानि। कटुकटप्रकटकोलाहलोद्वेजितानामुल्लसद्दन्तपत्राणि श्रवणानीव स्फुटितुमारेभिरे सरसीनामालम्रा(ला?)ळिनीलालकानि कुमुदानि। प्रबलबलोत्थीया(?)पीडितभुजवनक्षुभितक्षोभो गर्भ इव निर्लुलोठ लोहितपादः प्राचीकुक्षेः क्षपाक्षरः(?)। कूटयौध इव रात्रिसत्रापाश्रयः शरवर्षेणाविस्रब्धनिविष्टं शिबिरमाकुलीकुर्वन् बभ्राम कुसुमधन्वा। मित्रेण मकरकेतुनाभियुक्तमभिनवकुलवधूविरहविह्वलं कामुकबलमुभयसम्पीडितमिव दर्शयता भृशमविध्यतानुबध्य कुमुदबान्धवेन। मन्मथानीकिनीनामिवादर्शितप्रहारपा(ट)वानां रागहेतुः शुश्रुवे कळकळरवः सज्जितानां वल्लकीनाम्। वीरपानमिव कामिनीसैन्यं मधु पपौ रतिरणाय। रवेरस्तमयादनाथः श्रश्रीय(?) इव सन्ध्यातपस्फुरित-

---

1. L. about 20 letters.
2. ,, 28 ,,
3. L. about 30 letters.
4. ,, 20 ,,

मन्दरागाणि सुन्दरीमुखेन्दुबिम्बानि । तेजस्तोमाः कामानलमिवानलामधरपल्लवं(?) पपुः प्रवीराः । मकरध्वजदिग्विजयप्रयाणतूर्याणीव श्रोणीतटे(घा ? शि) शिञ्जिरे मञ्जुवा(चा)मञ्चितानि काञ्चीदामानि । उद्दामरागान्तरितशीतनखरप्रहारानुवेदनमादिश्यमानदशनच्छदमच्छस्वेदबिन्दुजर्जरकपोलमवलेपविशृङ्खलाधिक्षेपवचनजनितसंरम्भमन्तरान्तरोपनतान्योन्यक्रियाप्रशंसमंसनकन्तळ(?)करताडितोरस्तटं कृतप्रतिकृतप्रतिग्रहापसारसङ्कुलमालोहितकुटिलदृष्टिलक्षितपरस्परावस्था(न)मास्थाकरमनेकदुष्करकरणयोन(?)मक्षताभिमानानां यूनां प्रावर्तत क्रीडारूपद्वन्द्वयुद्धम् ।

अनेनैव च क्रमेण परिणामं जगाम यामिनी । ततश्च सुरतक्लान्तकमिन्दुद्वन्द्वमन्दमन्दसंवाहीनो(?) वन्दिवृन्दमङ्गलगीतिग्राहिणस्तदनु तुहिनकणासारधूसरितहरिसटा(गा?भा)रधूननोद्धूतरंहसो हंसमिथुनकान्तिपीतकमलमधुमदाबद्धारोहनिद्राहठापहारनिर्दयाः(?)शय्योत्थितमत्तमातङ्गचरणरणरणायमानशृङ्खलारवाकर्षिणः कर्षितः(?) इव कटकमारेभिरे चरितुं प्राभातिका मातरिश्वानः ।

नरनाथस्तु हृदयहारिण्या रमण्या समरचिन्तयैवातिनीय रजनीमहनि जायमाने छनित(?)सैन्यसन्नाहः समुत्थितो दिनकर इवातिसृज्य कपिलानसहस्रमुस्रणाः(?) प्रत्यङ्मुखः प्रतस्थे । कतिपयप्रयाणाक्रान्तावस्थितस्य तु पार्थिवस्य कश्चिच्छत्रुकटकादागत्य रहसि विज्ञापयामास । दे(व.) दैवतप्रभावदृप्तो देवस्य जयाया(ग)त एव राजा मालवानामितस्त्रियोजनमन्तरं वर्तते । तस्य किलानुकूलानि भो(दा?गा)नि दि ....[1] तदाहवेषु देवेन पुरा विजित्य स्वचरणनखचन्द्रिकाकल्पितोष्णीषमुष्णश्वासशोषिताधरपुटकृच्छ्रनिश्वारितालोकशब्दं च क ....[2] सञ्जतमतिहृष्टं च वर्तते । पौरस्त्यास्तु राजानः प्रभञ्जना इव

1. L. about 18 letters
2. „ 28 „

पार्जन(?)सुरभयो घनसमयं भवन्तमनुवर्तन्ते । सार ....[1] व कुलिशम् । ईशोऽसि (क ? ख)लु कर्तुमन्तमन्तकस्यापि । (कुतः?) कुरु गोग्रहणोद्यतस्य सर्वक्षत्रस्यानुत्तरं कदनम् । एवं सति विजयोऽपि जितो ....[2] विसृज्य सदसि दत्तास्थानः समस्तसामन्तसन्निधौ सधीरमिदमुवाच — पुरा किल मनुमादिराजमानाथ्य दीनाः पालना(स ? य) प्रजा भेजिरे । तेन गुप्ता निर्वृत्य मात्स्यन्यायेन त्रिवर्गं निर्विविशुः(?) । ततः प्रभृत्युद्बभूव स्वभुजापाश्रयः शस्त्रबन्धुः पृथ्वीकलत्रः कीर्तिसारः समरमृत्युप्रतीक्षः क्षत्रमित्युदीर्णपुण्यशब्दो वर्णः । स च सुवर्ण(तयेव ? मिव) यथा (यथा) तप्यते तथा तथोत्कर्षेण दीप्यते । तस्य चासावप्राप्तस्थानीयो योऽप्राप्तः समरशौण्ड(का ? ता)म् । इह स्वल्पप्रतिभः कविः, अप्रगल्भो विवदिषुः, अ(ति ? नि)रूपको व्याचिख्यासुः, अचिकित्सुर्भिषग् , अतितिक्षुरविविक्तो विजा ....[3] रिरनुद्युक्तो वणिग् , अनृतवागमात्यो, नाथर्वा पुरोहितोऽसमञ्जसः करणस्थोरुपचारज्ञः कालो(?)ऽर(म्य ? म्य) शीला युवतिरपीयतोप्यन्यो(?) नायलो ज्ञातिरकण्ठो गायनोऽकृताङ्गो नर्तकोऽक्लेशक्षमः क्षपणोऽकरुणः शाक्यमुनिरनपत्रपः कुलपुत्रोऽनुपकर्तृ मित्रमविक्रान्तश्च पार्थिव इत्यकिञ्चित्करो वर्गः । प्राप्तश्चायमवसरः पराक्रमस्य । प्रत्यासन्नो हि रिपुरुपसमाहृतबलसमुदयः । तदिह महत्याहवक्रतौ क्रमसमिद्धसंघर्षहुताशने हुतशरीराहुतयः पुरुहूतविषयमारुरुक्षवो यथासुखमृजुनानेन वर्त्मनाधिरोहन्तु । यस्यैवं प्रयोजने न बुद्धिः, प्रियं(चा ? वा)जीवित(व्य ?)म् , ऋणं वा(न ? नि)स्तरणीयम्, अरपन्ना(?)[4] वा सन्ततिरपरिपूर्णा वा मनोरथाः, अतृप्तं वा चित्तमचिराहृते कळत्रे, यो वा पित्रोरे(क)पुत्रः, यस्मिन् वाप्यसौ विपर्यते(?) गुरु कुटुम्बं,

1. L. about 26 letters.
2. „ 16 „
3. A space for 2 letters is left blank.
4. We may read अनुत्पन्ना.

यस्य वा तपसि श्रद्धा, यो वा लोकानमूनुपायान्तरेण जिगीषति स इतः प्रति(नि)वर्तताम्, इत्येवमेव घोषणां व्यादिदेश।

तथा च पत्यौ कृतवचसि मर्यादोप(सि ? स)ष्टस्तसहेमावदातो वृत्तलम्बबाहुः पृथुलोरःस्थलो वृक्षप्रांशुरङ्गराजः सिंहवर्मा नाम राजकस्य हृदयमुद्धर्षयन्नुङ्कुरध्वनिधारा(धरा?)वधीरित(धीर? धाराधर)ध्वनिर्बद्धभ्रुकुटिरभ्यधत्त— सत्यमिदं यदाह देवः क्षात्रं नाम विक्रान्तमतितरं निष्प्रयोजनं तिलं हि मानुष्यमानशून्यः पुरुषो न च मान(?) परावलेपानुपेक्षते। स च वराकः श्रियमभिमुखागतां भ्रंशयति, शरज्ज्योत्स्नामन्तरयति, अमृतकुल्यामुलङ्घयति, मलयमारुतं व्यवदधाति, पारिजातपरिमलप्रसङ्गे नासापुटं पिदधाति, वसन्तोपवनप्रवेशे चक्षुः संमीलयति, चन्दनचर्चापातने कञ्चुकं परिधत्ते, यो मनो(म ?)रथशतप्रार्थितोपस्थितं रणमहोत्सवमननुभूय प्रतिनिवर्तते। कस्तादृशः खलु पुरुषः कुत्सितः। न तथैते भूपतयः। जातिप्रतिबद्धमेषां हरीणामिव भिन्नमदवारणं शौर्यम्। नैसर्गिकमभ्राणामिव सर्वाशोपरोधि गर्जितम्। औत्पत्तिकमाशीविषाणामिवान्यदुःसहं महाप्रतापानिमनम् (?)। स्वाभाविकं कल्पान्तनभ(व ?)स्वताम् (इव) क्षितिभृत्कुलचूर्णनक्षमं बलम्। आत्माधीनमुदधीनामिवोदारवारिग्रासघस्मरं तेजः। तथा चैषां भ्रूभङ्गो न शत्रुभङ्गं व्यभिचरति। घनाधरस्फुरणमरिवधूदक्षिणेक्षणस्फुरणं न ललाटस्वेदोद्गतिः प्रतिजडं जीवितोद्गतिर्नैरसंरम्भदृष्टिदीप्तिर्न च मौलिकम्पो विपक्ष ....[1] टीं भ्रुकुटिरारोहत्यत्र करोति कोळेकाळरात्रिविधूर्दवाङ्कुरप्रकर इव विक्रमरसकादुद्यते कपोलस्थलीषु रोमोद्गमोऽत्र क्रीडति लब्ध्वा ....[2] खराणि लोहितायन्त्यो गर्वदृष्टयोऽत्र चासौ रचयन्ति चरणरागं लक्ष्मीशबरी(?)। न चैते

1. L. about 16 letters.
2. „ 28 „

बाणासनेष्विव रत्नासनेषु निष ....[1] व राज्यफलेषु भूरिस्पृहाः। न खड्गधारातोयेष्वि(ह ?)व भृङ्गारधारातोयेषु पिपासवः। न लोहितचर्चापातनेष्विव कुङ्कुमचर्चा ....[2] नोदश्रवणेषु पर्युत्सुकाः। न मृत्युदर्शेन इव मृत्युदर्शनबद्धरागाः(?)। न व्रणपट्टबन्धेष्विव सामन्तपट्टबन्धेष्वभिमानिनः। न कदलिकावनेष्विव प्रमदवनेषु....[3] श्रमै....[4] णो न श(री?)रतल्पेष्विव शेरतेऽङ्क तल्पेषु सुखस्वप्नकाः सुजनोमानकेसरिवांसपञ्जर(?)जरासन्धवृकोदरानुसारिणो धरापतयः। स तु त्वदादेशे नास्त्यमीषां दुष्करं नाम। शीधुनिवासरक्तोत्पलानुदधीनप्युदौर्वहुतभुजः(?) सतृष्णमापिबेयुः। लता इव सकुसुमा दिशोऽपि स्फुरितग्रहतारकाः सलीलमावर्जयेयुः। चक्रमिव हृदयमुदयरक्तं पतङ्ग(म)ङ्गुल्या भ्रामयेयुः। पुण्डरीकमिव समृणालं सितमयूखं मृगाङ्कमुत्तंसकं रचयेयुः। महीसमुद्धरणमपि महावराहभुक्तोज्झितमिति नाद्रियन्ते। कुलगिरिसमुत्सारणमपि चान्येन धनुर्बलोच्छिष्टमिति न बहुमन्यन्ते। सकलभुवनभस्मीकरणमपि कल्पानलप्रहतमिति सुकुरुपक्षे(?) स्थापयन्ति। का पुनरेषां पुरुषसिंहानामत्सलरिकुलग्रहणे(?) गणना। यत्तु निवृत्तिकारणत्वेनोपन्यस्तं देवेन, तत्रैताचिन्त्यम्। समर(ण ?)मरणे संशयितः स्वर्ग इति, शास्त्रस्यातिशङ्कायां यागादिष्वपि तत् समानम्। प्रियं जीवितमिति, तत्पूर्वमेव त्वत्वसुकृतैः(?) कृतम्। ऋणं निस्तर(म ?)णीयमिति, बलवद् भर्तृपिण्डस्यानृण्यम्। अनुत्पन्ना सन्ततिरिति, सुलभैव स्यात्सुरत्र रिक्ता सन्ततिः(?)। अपूर्णाः कामा इति, नैतत्त्वय्यवनिकल्पतरौ। न तृप्ता दारे (द्वी ? ष्वि)ति, रणत्यागान्निवृत्तपुंस्त्वस्य किं दारैः। पित्रोरेकपुत्र इति, तेन पितरौ जीवपुत्रौ यः सोष्मा। कुटुम्बम(हा?ना)थमिति कः सचेता बाह्यस्य कृते स्वमात्मानमुपहन्ति। तपश्चरामीति, तच्चिर-

1. L. about 30 letters.
2. „ 20 „
3. L. about 1 letter.
4. „ 1 „

क्लेशं क्लशफलं च । शक्यमुपायान्तरेणापि परो लोको जेतुमिति, कोऽसौ जयप्रकारो यो नागूकर्णननिशितनिस्त्रिंशमनाधानमनाकृष्टविकटचापचक्रं प्रेरितप्रासर्पणकणयशक्तितोमरमनु(?) म्रियते । तदे(हि ? भि)राप्लावय प्रळयकाल इव महावलाहकैरुन्मत्तगर्जिताशनिभिरुच्चकापचक्रकोटिभिः ककुभां चक्रवालम् । अद्य श्वो वा भवतु भयङ्करमरिनरपतिकुलशिख(रो ? र)मकुटभारभरितभूतलमुद्भिन्नविपुलविद्रुमलतावितानच्छन्नम(द्या ? ध्या)भोगमेकोदभूतमिव चतुरम्भोराशिवलयमित्युपरराम । इतरेऽपि तरस्विनो यथायथं राजलक्ष्मीलीलासङ्गीतमृदङ्गघोषगम्भीरमभिरयोरजव(?)जनितजगज्ज्वरं जगर्जुः ।

त(को ? थो)परतेषु घनगर्जितेषु, प्रशान्तेषु पुरःश्वसनेषु, गलितेन्द्रगोपतरलरागासु प्रसन्नासु गण्डस्थलीषु शुचिमुखकमळविळासलक्ष्मीनूपुरखानुकारिणा स्वरेण बलाधिकृते निधाय चक्षुर्व्याजहार राजहंसः—कच्चिद्विचिता समरभूमिरिति । स तु प्रणम्य व्यज्ञापयत्—देव! विचितैवेयम् इतो गोरुतमात्रामिवातिक्रम्य समासारवत्यभिमतरसवर्णगन्धसंस्थानानुद्धातिन्यभङ्गुरा भयरथानमाखुचत्र(?)ग्राहिण्यस्थाणुश्वभ्रकर्दमा समाहृतस्यापि सर्वजगत्प्राणिसमुदयस्य स्वैरपरिवर्तनक्षमा या [1] .... युद्धायेव बुद्धिपूर्वमिव निर्मिता भूमिरिति ।

अथ महीपतिः कस्यचिद्वचोहरस्य मुखे वयमिदानीं (भवत् ?) भवत्प्रार्थि(ना ? ता)नामप्रहता अरण्येऽस्मिन्नाभोगवति स[2]... त इति मालवेश्वराय सन्दिश्य श्वः प्रकृष्टं हस्त्यश्वं दर्शयेत्यादिश्य बलाधिकृतं कृतसदोविसर्जनो विवेशान्तःपुरम् । अनुष्ठितदिव [3] .... सरे वासरकमले वरुणादिग्वधूमुखारुणाधरलेखां

1. L. about 6 letters-
2. „ 16 „
3. „ 25 „

भ(ग)वतीमुपास्य सन्ध्यामुद्दामतमसि भन्नतेजसि सङ्कुपितनभसि(?) विकासिकाभि[1]....धसि नीडनिलीनपतत्रिणि दत्तकौशिकमुदि कुमुदभासिनि तनुमरुति रतिवरप्रजातनैशज्योतिषि प्रदोषसमये कृतयथोचितकृत्यः शया[2] .... यामेति यमायितुमुदयमाने तिमिरमरुणतेजसि, तरुकिसलयमासिनि कुसुमलवप्रभासिनि(?) प्रालेयकणमुचि मृदु चरति प्रभातमारुते, रुतमुखरमुखे दिशो दश प्रयातुमुद्धूयोद्धूय सज्जयति पत्राणि पत्त्ररथमण्डले, स्मयमानासु कमलिनीषु, मन्दायमाने कुमुदवने, वन्दिमङ्गलगीतिभिः प्रतिबुद्धो दिनमुखोचितमवसाय्य नियमविधिमनुष्ठितप्रतिकर्मा निर्गत्य विविधसारदारुघटितनियोगमुपरि रचितश्लक्ष्णमृत्तिकातलमुपहारकुसुमपुञ्जकञ्चुकितं मञ्चमारुह्य सापाश्रयपरिस्तोमोपविष्टो निष्टप्तकनकदण्डविकटमायूरातपत्रमण्डलनिवारितातपः कतिपयाप्तसामन्तपरिवृतो वारविलासिनीभुजलतोद्धूयमानचामरपवननर्त्यमानकुटिलकुन्तलाग्रः स्वर्गे इव सुरेश्वरो नरेश्वरः सुखमवातिष्ठत । यस्य स्वतेजसा देदीप्यमानस्य प्रतिबिम्बमिवाम्बरसमुद्रसंक्रान्तं बाला (र्थ ? र्क) बिम्बमालक्ष्यते ।

ततः क्षणात् पुरः प्रवृत्तपत्तिकलकलापिजलझङ्कार(?)घोरचण्डरवोन्नीयमानागमनो वैनतेय इव स्वर्गवार्तात्रासविद्रुताशेषनागलोकश्च स्वप्रभू भुन(?) भुजकम्पनैर्भञ्जनभयविह्वलैरिवासन्नानोकहैरनुमीयमानबहलबलकर्षो बहलसिन्दूररागसन्ध्योपात्तमस्तकोऽस्तशैलबल(?)सकलतेजस्विराजमण्डलास्तमयाय स्थिरनिबद्धैः पादैरुपस्थितः स्फुटप्रहारयोग्यदीर्घपीनकराङ्गुलिकलितचारु(सु?पु)ष्करः प्रमाणयुक्तमधुरवंशपणवको रमणी(य)श्रवणतालशब्द उन्मत्तमधुपकामिनीगीतनादशोभिशुभवितानविशेषकान्तिदर्शितशृङ्गारलोको जङ्गम इव सङ्गीतमण्डपश्चित्र(प)दन्यासविभ्रमाया राजलक्ष्म्याः, नैसर्गिकवैरसंभवमृदितमृगपतिसित(पट्टा ? सटा)तन्तुसन्ता-

1. L. about 32 letters.
2r „ 16 „

(न)संवेष्टितयोरिव रश्मिजालजटिलयोरीषादण्डकान्तजोरुसन्ननिषण्णलक्ष्मीविष्टर-कमलदुक्तमधुधारासिकयोरिवातिस्निग्धयोरालोकसरासि कटकटलङ्घनीकर्णतालमरुत्तरङ्गितेषु मुहुर्मुहुः पिपासयेव लोहाञ्चितं(?) गमनमुल्लासयन् मधुमणिचषकयुगळमिव मदवृद्धये केनाप्यभिमुखावस्थापितमापिङ्गलं लोचनयुगळं दधानः प्रतिकुञ्जर-प्रतापानलपानादिव लोहितोष्ठतालुजिह्वो मुहुर्मुहुर्जयेषु दि(क्ष्य ? कूच)कभ्रमारूढतया उल्लिखितमिव रूपदेहमुद्वहन् वंसक्रियार्थिवालम्बिनीं बालपल्लवमञ्जरीं भर्तृभक्त्या स्पर्शयन् महीं विग्रहः कुटकेन सह(?) भ्रमन्नन्तरान्तरा समाघ्रायान्यां गजपदवीमगणिताधोरणमसूयया साचीकृत्य (म ? प)दं तत्र चिकुरिताक्षं मुखमीष(ति ? दि)व सित्वा(?) पुनरपि स्वेच्छया प्रतिष्ठमानः, श्रीपर्वत इवेश्वरसम्भावितः, कैलास इव राजतात्मा, (म)न्दर इव सुवर्णशृङ्गो, मैनाक इव स्वपक्षरक्षाक्षमो, मलय इव दक्षिणोद्यतः, सह्य इवापरान्तयोगी, विन्ध्य इव शिरस्तटानुमेय-कुम्भसम्भवगौरवः, पवनज(न्म इ ? न्मे)वोपादानक्षमो, हिमशैल इवोदग्रकान्तैकप्रकृतिः, उदय पर्व(त) इव पुरस्तादुच्छ्रितः, सर्वभूधरसमा(न)सारश्वर इवापरः पर्वतेन्द्रो निर्मितः प्रजापतिना, अद्य दुर्निवारोऽपि स्ववग्रहः, कामवानप्यनङ्गहीनः साक्षिकूटोऽपि साधुवृत्तकरः कपोललम्बिषट्चरणोऽप्यविषय[1] .... षापि स्वभावभवो लिम्पन्निव तेजसा तं प्रदेशमाससाद द्विरदेन्द्रो हेमकूटः ।

स्फुरितपक्षं पक्षराजयो राजकाननकमलकानन(?) ....[2] तं च नन्दनमिवा-निमिषप्रेक्ष्यं प्रेक्षमाणः क्षोणीपतिः परं परबलदुर्जयमेवाजीगणत् । सारनैतृसान्त्वलालितश्च कानि कान्यप्यमृतमयानीवा....[3]नः तेन पाति चीयमाणं(?) पृथ्वीपतिमनुवर्तमानः प्राप्तरूपं वचनमित्थं व्याजहार प्राञ्जलिर्बलाधिकृतः—

1. L. about 10 letters.
2. „ 22 „
3. „ 18 „

पश्य देव! दिवि दिवाकरजिघृक्षयेव कुलिश[1] .... व्याददाति नागराजो मुखम् । अस्य चासौ सलिलपर्यस्तकदाम(?)वक्रच्छदस्यायामवान् विक्रमसमयजृम्भमाण-नारायणचरणानुकारी सुरसिन्धुधवलशीकराभिषिक्तः सर्वानेव दानवान् भीषयते जनं (?)जयध्वजायमानो हस्तदण्डः। कोमलकालु(?)रागवर्षिणी च पद्मराग-मणिगुहेव हेमकूटस्य दृश्यते मुखमहादरी । (ना ? न)र्दनोऽयं बृहदुरोमणिमर्द-गुणदुर्धरेण गुरुणा बलेन (गु ? यु)क्तो गुप्तमण्डलः खरतुरगशकटनागमर्दनो महाघोषमातिष्ठति । कामीवायं कान्ता(र ?)पीनस्तनाभ्यर्यव्यस्तो गुणैर्न रञ्जयति पार्श्वयोरिवायमुभयपक्षवर्तिनोर्मैनाकवैनतेययोरपि लब्धसाम्यसोयमंस इव प्रतापेऽप्युपचितस्कन्ध इव स्थिरतरे यशस्यपि प्रथीयानस्यचेतुमिन्द्राशनिपातघोरस्तनयित्नुक्रियासहस्य बलाहकस्येव मूर्तिरुल्लसदविरलबिन्दुजालकास्नायतव्यायतायतच्छविरक्तशमृजु सुवृत्तं चास्य गात्रं परं सत्कलत्रमिव गुरुतरमपि भारं लघुवदुद्वहति(?) । शरदम्भ इवानाविलं, देवयानीयौवन-मिव कचाविवर्जितं, मणितलमिव वानुपदिग्धश्लक्ष्णं विलहन्तप्रोहपङ्क्ति(?)-पादमस्य लक्ष्यते । स्नेहमार्दवोपपन्नमपि शिलीमुखा(बा ? पा)तदारुणं द्वित्वसंख्या-वच्छिन्नमप्यनन्तभेदमन्योन्यसमं दिग्वधूचुम्बिकर्णपल्लवयुगलमपि खुरविपुलपल-क्षिप्तान्तरस्निग्धचरणरुहापदेशादित्यभीत्या स्वपादाश्रितं विंशकरिकृत्वे वैषपत्ते चन्द्रमन्याङ्गनिराकृतस्याकरुयेव काश्यस्यावकाशं ददात्यसोदरमतिकठोराहङ्कार-निर्वासिता भयेन सूक्ष्मीभूय स्निग्धरोमच्छदादेकैकनिर्गता इव मृदुवर्तयः(?) । स चायं भयस्थानेष्वभीरुस्तेजसां निधिरित्यर्थवेदी वश्यक्रोधः शूरो मेधावी शीलवानकर्कशो युद्धरतिरसन्तापी क्षितिमिवावतीर्णस्स्वत्प्रभावादैरावतो वारणपतिः। अप्येवास्य दिक्कुञ्जरकुलप्रतिपक्षं क्षपयेदयं, अपिनामुदयकूटं(?) शत्रुहस्तनामिति।

अथ तस्मिन्नरदेवेन स्वहस्तोपहृतपुण्ड्रेक्षुकाण्डसम्भाविते प्रयाते पुनरपरेऽपि करिपतयः क्रमेणोपतस्थुः । केचिदलिकुलकलितदानपट्टिकाश्यामगण्डदेशाः,

1. L about 8 letters.

तरुणतमालपल्लवस्वस्तरुस्तीर्णमणिशिलापट्टिका इव रणरतिक्षमाः कीपलाः(?) केचिदनि ...[1] क्रीभूतमापिदाहो सुयमान(?)पाटलमुखपटांशुकाः स्फुरिताशानिपल्लवा इव लोकसंहरणदारुणाः प्रलयकालजलधराः, केचिदालम्बितमहावराहलीला इव भुवमवाङ्मुखं निरयदशनकोट्या दारयन्तः, केचिदाह्वयमाना इव हरीनाकुलीकृतमहामहीभृत्कटकमभि(ग)र्जन्तः, केचिदाय(त)हस्तपादसंवेष्टमानजनप(टां ? दाः) कालदूता इव परिभ्रमन्तः, केचिदुपायनभूतप्रविष्टलोकालाभां(?) दुःखादीर्घशूत्कारानिभेन निष्प्रयोजनं जवमिवोद्गिरन्तः, केचिदलसानेकपरुषबाह्यपरिघभञ्जनसरभसा दशनभङ्गशङ्कया निर्याणभागिनीपाक(?)निष्ठुराङ्कुशकेळिभिरवनतपूर्वकायैः सप्रयासमाधोरणैर्निवार्यमाणाः, केचिदभिहतभागीरथीतीरभित्तिभागोद्धूतधूलिपटलम(न्न ? ग्न)मूर्तयः क्रोधानलधूमधूम्रा इवो ....[2] मसदत्तविस्तीर्णमस्तकाघातपात्यमानचैत्यानोकहाः प्रतिकुञ्जरसन्निपातयोग्यमिवाचरंतः स(क ?)शंखाः सघण्टापुटाः सडिण्डिमाः सहेम ....[3] या इव लावण्यमया इव रागमया इवाहङ्कारमया इवावष्टम्भमया इव भद्रप्राया मन्दमदधर्मान्वया दुर्मृगस्वभावाः कीर्तिमहौषधिहिम ....[4] पि क्षितिपालं नयनहारि चक्षुश्चक्रवालमिव दिशामात्मोत्सेधेन संक्षिपन्तो मातङ्गपतयः ।

तांश्च दर्शयन् बलाध्यक्षः क्षितिपतिप ....[5] वनप्रजाताः प्रकामावगाढं भीरदी ....[6] दौरिकांभसङ्कलुषेतरकालतोययायिनः कौशिकीतीरकशकाशवनविलोचनाः कालमहीविहारिणः कम्रमा ....[7] विततलौहित्यतीरागरुतयरुत्वचः(?)

1. A space for 4 letters is left blank.
2. L. about 12 letters.
3. „ 20 „
4. L. about 32 letters.
5. „ 20 „
6. A space for 4 letters is left blank.
7. L. about 5 letters.

कम्बुकसरसरागाः सरभसवप्रक्रीडयोद्धूतसैकतविसरधूसरितपूर्वसागराः विधुरितवारिपत्त्ररथस्था(?) जलस्थलास्फालव्यसनिनः कपिकापिलकपिमतितटोत्सङ्गप्रतिशृङ्गभङ्गसाङ्गिनः(?) पङ्कज(षं?)कुमुदषण्डोपगूहगोमतीजलातिवाहितनिदाघमध्यन्दिनाः दिनविदाहद्रावितहिमशिलारसौघपूरशिशिरभागीरथीपरायणा रदनखण्डितबान्धवाद्रिसानवो नवघनभारचारुवैवाहितभूभृत्प्राग्भागचरा गुणितचरणलङ्घिततुङ्गशृङ्गोत्सङ्गधूत(या ? घा)तुधूलिस्थगितगोरथगिरयः कालिदकाकालकीटकाशिकोसलकिरातपुण्ड्रमल्लमलदमगधाङ्गवङ्गपर्यन्तगोचरा वनह(?)स्वभावादनतिबहुल(दाना ?)दानवेगा मनागवाग्रा रभसोन्मादिनो नातिप्रशस्तपार्ष्णिनखदन्तोत्सङ्गोदरशिखरोष्ठीकय(?)श्रवणा मनोहन्तरबृहद्द्रुमन्तो(?) (महा ?)महावंशाः पृथुहस्ताः पेचकिनो व्यायामविलुप्तशैथिल्यदोषा विजयकर्मजनितशौर्याश्च तद्वनजमतङ्गजोत्तमाः समाहृताः ।

एते चेदिकरूशकाननोद्भवा रेवाशोणप्रसवसेविनः पूर्वापरसमुद्रवेलाविहारिणः कोलाहलकटकबन्धयुद्धकोलाहला रदनोल्लिखितमाल्यगिरिशिखरभूमयो गन्धक्षणभग्नधुण्डुशैलषण्डद्रुमा मदविकटमयूरनृत्ताचार्यमन्द्रगर्जिता निर्झरजलशीकराङ्कितनितम्बशैवालजातशीतशैवालशैलसामवनपीपित(?)घर्मतापाः प्रियनागप्रियप्रस्थकराश्चैतिदिहपर्वतदेशानन्दिनकशिकश्यर्मूकवनसमृद्धयो(?) म(ङ्ग ? ग्न)भागीरथीतटास्तंसामूलपनसभञ्जनास्तमसातामरसाविसरसास्वादलम्पटाः प्रम्लगातीरवनमृगातकवाहिनो (?) लाजगौरबीजैकरवकबललालिता लसदौदुम्बरीकटोदुम्बरकदम्बकम्पनाः पम्पापानदोहलिनो मुक्ताभङ्गशुभ्रशुक्तिमतीजलविहारा मुक्तसक्तयः कालश्यामप्रियायाः(?) क्षौद्रवर्णदन्तास्तूर्णगामिनस्तुङ्गाननाश्चण्डाश्चारुचरणा नात्यायताश्च नागवराः ।

त इमे दाशार्णकारण्ययोनयः सूनव इव यमुनायाः समा(व ?)नवर्णाः, भर्तार इव वेत्रवत्यास्तद्भोगावितृष्णाः सुहृद इव सुकरच्छाया(?)

स्वरसावर्जिताः, भृत्या इव चित्रमाश्यवन्या नित्यासेवनाभियुक्ताः, वैणा इव वेणुवत्या वेणुशब्दाभिसारिणः, वत्सभूमिवत्सलाः स्थूलवक्रहस्ताः सूक्ष्मविरलबिन्दवो विपुलशिरःशिरोधराः विशालोत्सङ्गदन्ताः दीर्घपुष्कराङ्गुलयो दृढप्रहारशीला मधुपिङ्गलनयना मदगण्डवारिजातार्द्रमोदाः(?) प्रकामवृद्धपक्ष्मार्धाः प्रायण्याम(?)पद्मवर्णा मत्तकरिणः ।

(ए)ते युध्यमानत्रिदशासुरगात्रभङ्गभग्नशिखरिमण्डलखचितभूमौ तदसृक्सहपतितसत्त्वसारा तन्वयदि [1]... वर्धनद्रुमलतातृणोद्गमभत्याङ्करेयके(?) वने समुत्पन्ना नालिकातीरकर्णिकारनागवृक्षप्लक्षप्रवालकुलकबळभक्षिणो विशालरूपशल्मलीशल्म [2].... सिन्धुरोधोधवलधन्वमधूकन्यग्रोधगृध्रवः परातीरातिबुकतिनि(?) एकभेदमोदकीक्षीरितापरुषशिरीषाश्वत्थश्वेतव [3].... वलाम्रिबहुकान्तनुवृन्दारकेक्षुपालिकाकाण्डेषु श्रृङ्गाटकरसनालनाळिकानलनैतालनलपोतिकरताः सिक [4]... नकटमनु [5].... कामुक्ताः कुञ्जाकुञ्जगर्भव्रीहिशालूकलोपतः कवलितोद्दाकच्छपाबाणभेदिकादलितकाकण्डुपतिकाग्रहनाग्रहस्तहस्तिश्यामाकारा (?) [6]....ध्वस्तजम्बुवनाश्छिन्नशीर्णश्रेष्ठवतीतटश्लेष्मातकद्रुमा मथितलू(ल ? न)वसुमतीतीरवानीरवञ्जुलादन्तदत्तसूपावप्रंवातरीयतय(?) [7]....... नीरोधसङ्करभतारभवोमुयइतमालामलोन्मूलिनः(?) पिञ्छासैकतकरभञ्जनाः कान्तावन्तिकामाः श्रमानन्दालोलसामन्दमन्दथयो(?) व्याघ्रीनवोघाघ्रा [8].... णश्चुल्लकपिकल्लोललीलोल्लासिनः शतभागाभोगभाजः भुञ्जारोधोरजःप्रियातसपरापालिलब्धस्वैरसुखयः सैरन्ध्रिकपारियात्रकम्बकासु सूपकूटपर्वतपातप्रष्ठवैषधूर्यवासन्तपुष्पगिरिसितगिरिणाप्रश्रवन्तश्च(?)

1. L. about 4 letters.
2. " " 25 "
3. " " 28 "
4, 5. " " 24 "
6. L. about 24 letters.
7. " " 7 "
8. " " 1 "

कक्षेष्वक्षयस्य भोगस्यासदुपारैर्विस्मितानि रूपदेहमृतत्वचः कलालापिलक्षयभागां स्वक्षायुद्धाध्वभारदक्षिणा(?) प्रमाणबलशरीरसत्त्वसम्पन्ना लोहितोष्ठतालुजिह्वा महावराहकरिप्रायाः शीघ्रदीर्घक्रमाधेनुकानभीका स्निग्धरोमाणोन्नताधन्यभोग्यातु(?) गन्धकरिणः ।

त इमे कालिङ्गवनजन्मानः कलिङ्गोत्कलमहिषकान्धकच्छककुडुम्बपुन्नाधप्राङ्कणकेरलचोलपाण्ड्यान्नरपाण्ड्य(?)पर्यन्तचारि(ण)स्तैलामिक्षुमतीं लङ्कां वैतरणीं महोषामघवतीं नक्रनवां शुष्कनदीं श्वसेनां वेणां कृष्णवेणां सुप्रयोगां गोदावरीं चूर्णीं सूकरिकां सन्नीरां प्रवेणीं वैस्यां ताम्रपर्णीं कुञ्जां कुमारीं दक्षिणोदधिमगस्त्यतीर्थं मानसं सरः(?) सूक्ष्मरोमोच्छ्वासाः सुप्रतिष्ठितशिरसो परा जघनावरा महाशरीरोपस्कावष्ठवन्तः(?) कलविङ्कनयना नीचैर्वृत्तसुस्थितचरणनखमृद्वायतहस्तदण्डा दीर्घकेशवा(लमा ? ला) दीर्घाध्वक्षमाः श्लिक्ष(?) क्षुत्पिपासासहिष्णवो जहाः(?) संहता बलिनोऽन्वर्थवेदिनः स्कन्दवरा(?)स्ताम्रतालुजिह्वोष्ठा म(सु ? धु)सन्निभविषाणा धनुःसवर्णसुवंशाः पीनायतपृथु(च ? ल)ग्रीवाः स्वल्पनिष्कोशाः सुपेचकाः क्रियास्वल्पदोषा निष्परिहाणयः पद्मप्रायाः परबलावमर्दिनः प्रकृत्युदग्राः प्रेक्षणी(य)विग्रहाश्च वारणपतयः ।

तेऽमी पुनरपरान्तकवनभुवः प्रेहरामुररयो (भो ? गो)दावरीदारुवर्णयोर्बाणामूणयोर्निराभैमरथ्योः परामधुकन्दयोर्दमनतापिनैतम्बयोः कारिरिलाङ्गलघातकयोरन्यासु च महानदीषु लब्धरतयः मन्दरकुमुदकृष्णगिरिसह्यतुङ्गवरमत्यमर्थं(?) पर्वतानां प्रस्थाटविकप्रतिबद्धेषु जाङ्गलोद्देशेषु घृतमधुलाजतैलपूर्वापणिकाश्चारं चारं जातदर्पाः चक्राटकेषु बालिकेषु दर्भभूमाभक्षिणो मर्कटकमुत(?)यवगोधूमश्यामाकाप्रियङ्गुनताधिकबलितोत्कालानलपलाशिकाकदलीवीरणमरुचेलवोत्सर्णवाके पार्ष्णीकाकला च दुष्टवानीकाशत्रपुत्रभासः(?) शतपर्वाचार्विणो पित्रा श्रीराः समप्रतिष्ठिताः(?) स्थिरोदग्रदीर्घोष्ठबालपीनन्द-

[1]....तामहोत्सङ्कमृक्तसमत्वचः(?) कमलगन्धिप्रभेदा ह्रस्वग्रीवाः पराश्चापवरचारु-
वंशाः श्यामदृषापदाः(?) शूरमानिनः सुनयनाः स्ववनरान्निणश्च ....[2] व्रतः(?)
सरस्वत्यन्तर्धानोद्देशं चाश्रिताः सरस्वतीं कशेरुमतीं न्यङ्कुमतीं नीलगुहां वृत्रघ्नीं
पार्ष्णिमतीं पूरिमह ....[3] रेवतकं दाशार्णमाणिचरं कोञ्जमर्बुदमूर्जयन्तः अन्याश्च
मरुभिरानिविष्ठपतस्यभावां तनुरोमचरणनखश्रवणत्वचस्तनुस्थिपरुष(?)....[4] पि दुष्प-
राजयाः सुविभक्ताः (खप्ले? सुपे)चकाश्चण्डा मृद(धो ? वो) मध्यमायामाः शिक्षा-
विपक्तिकारिणः कर्मनिष्पत्तिशोभिनः प्रायेणातिदीर्घायुषो मृ....[5] ञ्चनदारण्यसञ्चारिणो
रम्यह्रदामिरावतीं वि(वि ? पा)शां वितस्तां शतद्रुं चन्द्रभागां सिन्धुदेविक-
सरस्वतीं च भवतीं(?) हिमवतश्च पादाङ्कुरक्षेत्रोपकण्ठात् कालकावनं चाध्युषि-
तवन्तस्तदनु दशदगात्रापरबिन्दवः स्थिरचरणनखाः प्राणवता(?) बृहत्प्रोहाः
प्र(दु ? कु)ष्टपेचका विपुलांसा बहलत्वचो वलीतताः स्थूलरोमोत्कृष्टा दुर्मेधसो
दुराधारकर्माणः शूराः शूकलप्रायाः स्वल्पाधिका बहुश्रमाः सोत्कण्ठध्यानशीलाः
निग्रहेवकलद्विषस्तद्धनप्रकृष्टास्त्वत्प्रभावोत्कृष्टा(?) द्विरद(न?)गणाः ।

तत्रैके पित्तवातकफसमीरसंसर्गजन्मानो मदं(क ?) शरदि निदाघे
हेमन्ते प्रावृषि वसन्ते च सर्वदा विसृजन्ति । अद्यत्वनलत्रासादन्यगजानिर्मयाद्दायु-
धाभिघातात् परात्यभिध्रुवा(?)दतिगुरुभारावघाद्दण्डगजमदगण्डाभ्यर्दनावस्नेहेन
कर्मणा वातिपीडनाद्वशासु रागाभिसरणहरिणताद् (?)मदप्रकृतिमवबुध्य म(तो)देन
प्रयोगादन्यतो वारणादष्टभूत्यहस्ते स्वकृतमादभृद्दक्षिणश्च पञ्चमया(?) समक्षेपदक्षै-
र्योक्तृभिरुपचरिताः कवलीकृतैः पूतिकारखुसीरिर्गोत्यरिष्ट(?)सिन्दुवारतैरकस्फो-

1. L. about 5 letters.
2. „ „ 22 „
3. „ „ 25 „
4. L. about 18 letters.
5. „ „ 10 „

ताज(ति ? टि)गृध्रकर्णिकारवीरैः रसवञ्जुलनीपसौभाञ्जनाङ्कोलनक्तमालैः सौभाञ्जन-
मूलपूरिका(क?)कण्टालिकापटोलत्व(जि?ग्भिः) निम्बबिल्वरणपूति(का?क)र्णमूलसप्त-
पर्णत्व(जि ? ग्भि)र्वरणस्थगरळनक्तमा(लाः ? ल)कोष्ठुवञ्जुलशलकै(?)र्निम्बैरण्डपूतिकैः
श्लक्ष्णचूर्णितैश्चाश्वगन्धाविगन्ध(ग ? क)टुमत्स्यकैर्लवणमिश्रैर्निरूहणैश्च कटुतुम्बि-
लोणिकादन्त्यक्षिपीलत्नै(?)र्नक्तमालार्ककन्दजातरू(ष?प)कमदनफलैः पञ्चलवण-
समांशैर्दतिरम्यप्रतिनुभुण्डी(?)बृहतिकाफलैश्च क्षुण्णैः पिप्पलीशृङ्गिवेरहरिद्रावचा-
हिङ्गुभिश्च लवणैः पूतिकपिचुमन्दशिग्रुदीर्घवृन्तकैर्लोणिकालव(ल ? ली)दन्त्यर्क-
तरुणकैश्च पिण्डमोदकैः शोधितेषु कायेषु पुनः संवर्तनयकवलैर्जम्बूनिचुलारग्वधत्व-
ग्भिर्जम्बूकिसलयैश्च समूललामाब्दकैः(?) कृतसंवर्तने ततो बृंहणीयकवलैः काकोली-
क्षीरकाकोलीजीवकर्ष(विका ? भक)शृङ्गिविदारिकैरण्डकण्टकारिकामधुशि(ग्राः ? ग्रु)
समूलसहासहदेवाकच्छुरिमूलसारिबागलोचीमधुकशशबिन्दुकोपैर्जयन्तीशुकनसाका-
कजङ्घीचित्रकक्षीरकाशुभ्रगन्धान्धकबन्धुजीवककशोरुकविसमृणातिक्षपं(?) चित्र-
कबलहुलानि धान्ययसानीत्येभिः(?) क्षीणोपघातकैः क्रमप्रवेचिते प्रायां च
शोभावं चतुर्थ्यां व्याप्त्या(?) रमणीयकबलैश्च दंष्ट्राश्वेतपुष्पवर्षाभूतण्डुलीयकपिण्डा-
ल(लक ? लंका)मधुकमार्कवकाकमाचीप्रपचीवलङ्गलोचीसप्त(?)माषपर्णीमुद्गपर्णी
(भु ? मु)ञ्जा ....[1] मल्लिभल्लातकपत्राकमलेककरिक(?)वृश्चिकालीत्येवमादिभिरुपतम्यो-
पस्थिते मदे प्रापणीपकबलनास्फोतोत्तमकर्णिकागिरिकर्णमुञ्जावल्लीसमूलपल्लवो(?)
मधु ....[2] पिण्डालुकीगलोचीसप्तपर्णिकात्वचः सोञ्जटक(?)मूलमातुलुंगमात्मगुप्ताकि-
[3]....लतृणशूल्यलाङ्गलकीकिरासी(?) कन्दमर्कश्वेवर्षानिष्पावा:....[4] मामलकं भूकदम्ब-
मोरुपाटलीवापर्या(?)मूलमित्येतानन्यांश्च दत्त्वा....[5] र्णपुष्पिकपे....[6] कैः कदली-

1. Space for 4 letters left blank.
2. „ „ „
3. L. about 14 letters.
4. Space for 8 letters left blank.
5. L. about 24 letters.
6. Space for 5 letters left blank

मूलशतपर्वासभाससहसदोवादिः(?) प्रतिदिनप्रपीयमानैश्च लाङ्गलीमूलशुकनसा-सो[1].....नोपितासर्षपैश्च प्रस्थशः प्रत्तैः पत्तूरकुटजसप्तपर्णप्रचीवलैश्च मधुसम्मितैः सप्तपर्णगवे(धु ? घु)ककुटमत्स्यदार्दुर[2].... पूर्णक[3]...नलकदलीनक्तमाल मूलभू(त?) कदम्बकशोरुशृ[illegible]टकैः केतकमूल(कु ? गु)ञ्जाप्रस्थवृश्चिकालीभिश्च मधुरक्ताभि-रुशीरमल्लिकामूलोत्पलगुलैश्च सुरा[4]....तेर्यशः व्रतैर्यथोक्ताभिश्च का(?) शोधनगुलि-काभिश्चित्राभिश्च कटकवल्लीभिः कृतप्रभेदनाः पुनरभिकाशिममन्थार्कचित्रकैला-हस्तिपकर्पतीमूलसिरासीकन्दरमरीचिपणिर्जककपोतपङ्कासौभञ्जनकवलैरञ्जनैश्च (?) नानाविधैः प्रदीपिताः सलोकपालसकलभुवनसारसन्दोहसंभृतेन पितामहानुग्रहात् पवित्र[5]....लेनं पञ्चाशत्सिरापथान्तरविरहिणा गुणोद्रेकेण दोषाणां रसमण्डलेन महाभूतानां प्रसादोत्कर्षेण धातूनां विष्यन्देन वृक्षस्य स्वरूपेणौजसां बाहुल्येन बलस्य प्रमाणेन मनस्थितायाः प्रकर्षेण[6]....स्य संश्रयेण सोमस्य जन्मभुवा जवस्य स्थानेन रत्या लक्षणेन व्यञ्जनेन वीर्यस्य दर्पणेन दर्पस्य तेजनेन तेजसः प्रोत्साहनेनोत्साहस्य साधनेन सौम्यतायाः कारणेन कान्तेः संस्थेन[7].....र्यस्याकारेणाभिरूपतायास्संभवेन सहिष्णुभावस्य समुदयेन सौन्दर्यस्य सर्वस्वेन लक्ष्म्या गन्धगुणैश्चन्दनागरुजातिचूतके[8]... प्रियङ्गुचम्पकोशीरसप्तपर्ण-द्रमिलपद्मकुवलयोत्पलहीरतालीहिङ्गुलुकसिक्तभूमिपरिमलभरितं सक्तुमयमिव समा-पादयता म(दने ? देन) त्रिधा निब[9]...न देदीप्यमाना मृत्योरपि क[10].... स्त्र त्रासपरवशं पलायनशक्ति(म् , कि)मुतसपत्नपक्षस्य ।

1. L. about 24 letters.
2. Space for 4 letters left blank.
3. L. about 5 letters
4. Space for 5 letters left blank
5. " 8 "
6. Space for 4 letters left blank
7. " 7 "
8. " 4 "
9. " 3 "
10. " 3 "

एते पुनरम्बुकामा वप्रपांसु(भि)रा(गिर्णो ? कीर्णा) लक्ष्यमाणच्छविप्रसादाः फेनायमानरक्तलोचनाः सुरभिनिश्वासिनः सुसमुन्नद्धकटि(टो ? तटाः) प्राण-प्रगृह्यमाणहस्ता विजृम्भणव्यसनिनः पर्याप्तपूर्णदीप्तवक्त्रा रतिषु स्तंभक्रीडिनः शब्दादिषु बद्धभावा लिङ्गमुपस्थितानामुद्वहन्ति दन्तिनः ।

एते सजानिकलकाया(?) प्रमद एव प्रथमया मदावस्थया प्रवर्तित-प्रस(च ?)न्नचक्षूरागाः प्रसन्नसौमनस्याः करविवरगलदविरलसुरभिनिश्वासश्रेणयो गण्डदेशपरामर्शिनः कान्तबृंहिताश्च प्रविलसन्त्यनेकपाः ।

पुनरिमे द्वितीयायामारुद्रकलेवालिकानामावस्थामत्यर्थविजृम्भमाणाधिकामाः पूर्वण(?)बदनशोभां वाशितामिवातिहेतुमनुपतन्ति ।

एते तु तरुणमदाक्रान्तसमगदाः परेष्वविस्रंभिणोऽयोनिबन्धयावस्थया गर्वितविजृंभितैः प्रभ्रमन्ति हिमरूपाः किरणतथाते तत्प्रभृत्या(?) इव सर्वकर्मसु मूढत्वविज्ञानतया निःशङ्कादेश्याः क्रमत्वादिव सरागजृष्टयो भद्रतये(?) क्रोधेऽपि शासनमनतिवर्तमाना बलयोगादिव मदपाटवसुरतयो मानभा-नागत(?) ।

ए(वं ? ते) तेजोऽजस्रमुद्वमन्तो मेघा इव सगर्जितविजृंभमाणाः मारुता इव वेगेनोत्तमेन लाघवं प्रथयन्ते । भृङ्गमालामिव गण्डचारिणीं मदावस्था-मुद्वहन्ति ।

एते पुनरसुरा इव प्राणिदर्शं जिघांसन्तो मदमूढाः क्रोधनदशां दर्शयन्ति ।

अमी पुनराविष्टा इवोन्मादेन यत्र तत्र शब्दार[1].... दर्पधारामिव क्षरन्तः क्रोधवर्षमिवोत्सृजन्तो वृक्षैरपि युध्यमाना वृथैव नक्तंदिनं भ्रमन्तो विहायत्यत्र(?) वर्तिनीमवस्थाम् ।

1. L. about 6 letters.

एते पुनरभिजा ....[1] कुशा गणयन्ति, न संज्ञामाद्रियन्ते, नात्मानमभिजानन्ति केवलमविरलविस्तृतज्ञिता(?) जगदुत्त्रासयन्तः संभिन्नमर्यादानां सप्तमीमिव ...[2] ।

विभज्य सन्दर्शिते यथास्वं स्थानानि राजाज्ञया गजनिकाये[3] राज्यसरःपुण्डरीकमार्जुनेयो(?) हरवृष इवातिवर्ष्मा समसंस्थानस्तबकेसररोमस्थल....[4] फेनधवलेन धवलिम्ना क्षीरोदनोच्चैःश्रवशङ्कयानुबध्यमानः कटकलग्नाभ्यां कैलास इव यक्षाभ्यामभ्यधिकवल्गमाणाभ्यां पाणिभ्यामुभयतोच्छ्रित्वौ वेगरोधरोषदंश्यमानद(र्श ? श)नखणखणायितमापरदिव(?) रंहोवेगाकृष्टमिव च दीर्घीकृतदीर्घविशालस्निग्धयोरुद्धान्धवबन्धवैषम्यदोषमुक्तयोर्नेत्रयोरुत्कचचकर्णिकारप्रभेण पिङ्गलिम्ना जातरूपद्रवेणेव लिप्यमानमर्कपादस्पर्शरुषेव सन्ततस्फुरितवृत्तमध्योन्नतप्रौढपल्लवमुत्तानघटनकरालमुन्यञ्जनानां स्थिरमूलतयेव परिपूर्णानां मुखराजुनाभ्यन्तराननतानां(?) तद्वर्णानां च दंष्ट्राणां फेनपाण्डरेण प्रभाप्रवाहेण गगनलङ्घनसमयलग्नं शरदभ्रकुलमिवोद्गिरदुत्तानायतपृथुलसमतलेन शौर्यचङ्क्रमणाङ्कणेनेव ललाटतटेनेव तारुण्यामिव घालीनतराभ्यां क्षुद्रतयेव तीक्ष्णवृत्ताभ्यां रोमशाभ्यां दर्प....[5]कुम्भ्यामिव कर्णाभ्यां, विक्रमद्रुमप्रवालमञ्जर्येव दीर्घकोमलताम्रया जिह्वया, रक्तानुपदिग्धः शुद्धत्वादपूर्वया धूनया(?) समेतमायतानुवृत्तयुक्तोपचितहनुचक्रश्मश्रुचिबुकमालोहिततनुलेखं विपुलतालु समचतुरश्रवृत्तप्रवानमवलीनतलम्ब(?)पीनदशनच्छदमच्छिद्रविमुक्तश्लक्ष्णसृक्कसंवृतास्यमतिसुरभिमुखं दधानः शुभ्रराशितयेव दर्शितमू(र्ध्वो ? र्धो)न्नति कृतोद्बन्धनमध्य-

1. L. about 36 letters.
2. „ 20 „
3. The construction is unintelligible.
4. L about 6 letters
5. „ 1

पीडितसमाहितं शिरो बिभ्रदेकजमृदुविशदानुबालकोशकेसरमालया हरिशब्देनैव सहकेसरिणा गृहीतया विजयचिह्नचामरिकयेव राजमानो वृत्तयापि दीर्घबन्धया गळन्निगाले निर्मांसया शिरस्यभिपिण्डिताधमाहिताकुञ्चितैयाषाण्येवाहितविमानकारिग्रीवयोपपन्नः(?) श्लिष्टदृढप्रतिपूर्णमांसळांसांसफलस्कन्धस्थिरबहळोत्तानपूर्णविस्तीर्णवक्षा विमुक्तानुपूर्वशिष्टपीनबाहुन्नीमासेसमाहितप्रतिच्छन्नजानुमांसळासिराजारज्जुघनश्लिष्टजङ्घो(?) मृदुप्रतिस्तब्धवृत्तकूर्चश्च जात्यन्तरितश्चारम्भद उपात्येन चलितलीलाकरणश्च(?) वल्गद्धूर्जटिजटाचन्द्र इव दीर्घतीक्ष्णकचश्लिष्टकूषिकोपुरोगसंसर्गिगम्भीराभ्यन्तरतलै(?)रवलीनघनबहलतुङ्गवृत्तैर्वात्रारिनीलनिर्मितैरिव लक्ष्मीवासधूलिसमुद्गैस्सरोगानपूर्वमण्डूकान् वहद्भिरन्तःक्षीरिकम्पादिवातिस्निग्धवर्णैः प्रतिसामन्तमकुटमणिकरण्डनोचितैः खुरमण्डलैरुपेतः, शिवाकरत्वादिव वृत्तोर्ध्वघनपीनौ मेरौरुह(?)क्रोधवृत्तिरहीनत्वादिव वंशोनतावक्ष्याविनतापूर्णपृष्ठाश्लिष्टो ललितवल्गितलास्यस्थानत्वादिमृदङ्गारूपप्रतिच्छन्नाच्छिद्रपार्श्वौ जाठराग्निर्जगधौत्रजालजालजालत्वादिवात्युद्धन्धोदरश्चतुरश्रवृत्तया समत्वेनाच्छिद्रतया जघनमजघन्यं दधानः(?) संयतत्वादिवोच्चैर्वर्धितदीर्घवालमग्रावृत्तिकं च पुच्छमुद्वहन् त्रिवादिषु जवेषु चाधिकप्रमाणः प्रौढादिष्वामयेषु च हीनो जङ्घादिषु धृमत्वे चातिसन्मण्डलो(?) बलरिपुरिव गुरुनिर्दिष्टकारी नृप इव यत्नोपचार्यो भारसहश्च मुनिवान्निष्क्रोधः सुप्रसादो च पारमिव सत्त्वस्य जीवितमिव ....[1] सो विभ्रम इव समरलक्ष्म्याः साहस इव दर्पस्य सम्भव इव तेजसः सम्पत्तिरिव राज्यस्य जवोपदेशगुरुरिव मारुतस्य चारुतामूलमिव चन्द्रमसः शुचिरुदग्रहा ....[2] जननः

1. L. about 5 letters.
2. „ 22 „

प्रियदर्शनः प्रदक्षिणसमाचारस्तुरङ्गरत्नं भद्रवाहनो नाम जाह्नवीप्रवाह इव पुण्यावर्तः, वश्यतोऽपि वाचयन् भगीरथानुभावं(?) भूपाल[1]....हने विस्मयगरिष्ठा सुधादृष्टिरिव धवलयन्ती दिशः सबहुमानं पपात पत्युः ।

स च तुरगपतिरमानुषानुभावो भा(व इ ? वमि)वावबुध्य भर्तुः परि[2]....ननवरतखुरवलयविलिखितधरापृष्ठमाधूयमानेकशकेस(क? र)सटमवस्थितस्फुरितरन्ध्रोदरमामन्द्रस्निग्धगम्भीरानुनादमधुरम(भ ? हे)षत। येन सकलमेव भुवन(म)म्भसेव हरिविभ्रष्टेन कुचविवर(?)मापु(पू)रे ।

हर्यध्यक्षस्त्वभ्यधत्त—पश्य देव तवानुरूपं युद्धसहायं भद्रवाहनम् । अतिबलोऽयम(न ?)तिशूरोऽतिभीमोऽत्यरतरश्च तिरश्ची तुरङ्गजाति जातस्य सा भूमीति(?) । अहो नु चित्रमयमसावनेकमङ्गल्यनिर्मलप्रदक्षिणावर्तशुक्तिमुकुलसङ्घातशोभी दुग्धराशिरिव सर्वरत्नसारसञ्चयसम्मतो विनापि निर्मथनश्रमादिह देवं पुरुषोत्तमं लक्ष्म्या सहोपस्थितः । शक्यमनेनारूढेन मन्ये महेन्द्रोऽपि जेतुम् । अवजितो हि पुरासावारूढोच्चैःश्रवा (अ)पि बलिदानवेन्द्रेण । नह्यमुष्य मन्दरक्षुभितसिन्धुगर्भक्लेशितस्य जलप्रकृतेरीदृशास्तेजोवर्ण(त्व ? ब)लजवा भवितुमर्हन्ति । जवप्रस्तावे चास्य खञ्जजवः प्रभञ्जनो भग्नपक्ष इव पक्षिणां पतिर्निरुध्यमाना इव हरितो मन्दचारामिव च मानसं प्रतिभाति । वयस्थाश्चायं वासुदेवसबाणबालिशत्रुभक्षमञ्जनक्षम इति (?) ।

तस्मिंश्च राज्ञानुमते लोकलोचनानुगते क्रमेणापरेऽपि समुत्तस्थुरम्बरामिव रंहसा तरङ्गयन्तस्तुरङ्गमाः । तांश्च सविनयोद्धृताग्रतर्जनीकं नि(भि ? र्दि)शता बलाधिकृतेनोप(चक्रमे) क्रमेण वक्तुम् । इतो दृष्टिदानेनानुग्रहः क्रियताम् ।

1. L. about 25 letters.
2. „ 12 „

एते हि भवद्भुजशिखरसमग्रमत्रस्तसिन्धुवोगदू(?)[1]....भिमानेन त्वच्चरणाम्बुजरेणुचुम्बिचूडेन काम्बोजेश्वरेण विश्राणिता विद्रुमद्रुमोत्कीर्णा इव ताम्रकेसरलोमवालधित्वचः शोणाः ।

त इमे बाणा(व ? स)नसमानकालनामितेन वायुनाथेन(?) भयोपनीताः कालाञ्जनधातुगुहानिष्कृषिता इव कृष्णवालधित्वचः सर्वे रामां कालाः(?) ।

तानिमानलीकाहङ्कारगर्वदुर्विदग्धान् गान्धारपतेः प्राणतुल्यमाकृष्टा(न्) निष्टप्तसुवर्णनिर्मितानिवावगच्छ पीतकौशेयसन्निभबलामेरामत्वचो[2] हरितस्वैहृण्ड(?)द्विरदबृन्दद(च ? न्त)कुलिशोद्घाट्यमाननगरगोपुरार्गलैकप्रघटघाटितोत्सेकेनाध्वराजेनोपायनीकृता हरिन्मणिशिलाप्रसूता इव शुकपत्रहरितरोमकेशवालत्वचः पीताः ।

त एते त्वद्भुजदण्डमन्दरमथनसं(भूत)ज्वेरष्टसर्वस्वदानसन्धिना सिन्धुराजनोपहृताः क्रोडाङ्गारराशय इवाच्छाच्छहसितच्छन्ना धौतताम्रतमत्वचः श्वेताः श्वेतरोमवालके(व ? स)राः कर्काः । तमिताः तादृशा एव दर्पदलितोद्दामतैलोरःकवाटा विघटनाप्रावृतेन विक्रमद्वारेण निष्कृष्टाः कृष्णबिन्दुजालकनसम्बाधजठरसक्थिवक्रासक्तभृङ्गकलङ्कितोत्फुल्लशेफालिवनमहोराः कुक्कुटाः(?) ।

त एते त्वद्दण्डाभिपातचकितमेचकोपमेचकप्रतिप्रेषिताः तुषारवारिगर्भोषितगगनाभोगभासो भास्वन्मुक्ताफलधवलवालकेशरोमाणो बलभिन्नीलत्वचः । क्रौञ्चत्रस्तानेतान् भवद्गजकुलाकुलितकूलोपकूलकालितानाकलितानेकवर्णकेशकेसरवालधीनालोहिताह्वसंबाधत्वचो विक्रमाकारानुरक्तासिंहवर्णान् । एते त्वत्प्रतापतप्ताचमुन्मुक्ता दन्तशरकंसकुमुदवर्णा श्रीनदीपुलिनहारा गौराः(?) ।

1. L. about 4 letters.
2. We may read वालरोमत्वचो.

तानि ....[1] प्रकाशनकेशवालनीलिमोपपन्नानालक्ष्यानुकृतघनमधितमहिमाचलशिलापुञ्जानञ्जमूर्धजान् (?)।

त इमे भवत्प्रभाव ....[2] शोचिषो विकचमोचपुष्परोचिषः पाकरक्तकर्कन्धूफलरुचः प्रवालाताम्रवाला बलारिगोपलोहिताश्वणो(?) वर्णानुवर्णिनः कालव ....[3] कारा कल्पान्तानलशिखाकलापकल्पाः कालवालाः।

तेऽमी त्वद्यौधवीरविततायोधनावधूतयौधेयाधिपोज्झिताः मृष्टभालकशालिशूकचक्रवाकपद्मकेसरकुण्डनच्छवयो हरिवर्णानुवर्णाः(?) संवर्तपवनभग्नकनकशैलशिखरविभ्रमा बभ्रवः।

त इमे त्वदश्वबलरजोवश्यायरुद्धाकाशजनितयुद्धनैराश्ययवनेश्वरप्राभृतीकृता महेन्द्रचापचारवः शिरीषकुसुमदामश्यामळा हरिताळरजोराजिरोचिष्णवः सुवर्णयूथिकासवर्णाः कुफलाकान्तयो हारितवनहारिणश्च बालनळिनवर्णनिर्मितवेदिवसमापादयन्तः(?) पीतव(र्णाः ? र्णाः)।

त इमे तुमुलसम्प्रहारकातरतरळहारहरितानिलरोमानिहित(?)लोहितत्वचो मयूरगळवर्णाः।

तेऽमी त्वत्प्रता(प)विषाविषह्यवेगभेषजभावभीताभिषहविषश्च(?)नाथप्रेषिताः स्फुटितपाटलिकुसुमगर्भशुभ्रशोणरोमाणः पाटलाः।

तानिमानमलखड्गदारितामन्दरोषोद्दामकन्दरेशरुदत्परिग्रहानुगृहीता(इ ? न)वधारय पुण्याभिषेकलग्नप्रयागवारिकणकरालितानिव कृष्णश्वेततनुतनूरुहं हयमा(ना)न्।

---

1. L. about 26 letters.
2. " " "
3. L about 14 letters.

एते भवदनीकसंवेष्टनोपरुद्धापयानपार्वतेयागतिविकीर्णचित्रकृष्णरोमाणो नीलपदलाः(?)।

त एते त्वत्सैन्यचापकूस्पष्टनिश्चूतानुच्छेषगुच्छाच्छादिताबाच्योर्चिताः सिताल्पानल्परोमाणो(?) रक्तपाटलाः।

तथैते त्वत्पादनखरत्नादर्शदृश्याकारोरश्यकोपदीकृता विरलशोणबहुलधवलरोमाणः सुमनापाटलाः।

तानमूनतितिग्मरश्मितेजस्तैक्ष्ण्यदग्धद्रुतकश्मिारीभिरुतोद्घोषिणः श्वेतगौररोम्णो निर्माणाय दर्पपञ्जराद् गुञ्जपाटलान् (?)।

एते शरशलशल्यजालशकलितश(व्यु ? क्त्यु)सिक्तशतानीकेन त्वया स्वीकृताः सितबहुलकतिपयबभ्रुरोमाणस्तिमिशपाटलाः।

त इमे त्वत्कोपानलप्रसरनिर्वाणपार्वतेयवर्गदीर्घप्रयाणवार्जिता हरिधवळतनुतनूरुहा हरिपाटलाः सकलभारतवर्षमध्यवर्ति(क्षे ? क्ष)त्रवर्गनिर्व्याजनिर्जयार्जिताश्च।

एते निजवर्णोपायजनितनानानामानो विविधवर्णसारमिश्रकेसराश्चाङ्गरीतयश्च सिद्धार्थकाश्चाम्रवर्णाश्च पुष्पचित्राश्च पुण्ड्राश्च मण्डलचित्राश्च वारणमयूरमण्डूकतित्तिरिक्रौञ्चहंसटिट्टिभकलविङ्ककुक्कुटकृष्णहिरण्मयर्षभमल्लिकभैररैधेर(?)मूषिकोपमैरनुबन्धापबन्धवैषम्यवैरूप्यचापल्यापिङ्गलिमाभिराग्रामप्रसादस्नेहविस्तारोपपन्नैर्मणिप्रकाशैश्च लोचनैर्वीर्यस्रवन्तीरिव स्रवन्तो गुणसादृश्यानुपतन्तश्चातुर्वर्ण्य(?)मृजुतनुतुङ्गदीर्घनिर्मांसमुखास्तीक्ष्णाक्षिमण्डलास्त्रिगम्भीराः पञ्चमृदवः सप्तगगनदहनपवनलाघवातिरेकजनिततैक्ष्ण्याश्च(?) क्षितितलगौरवायत्तं मन्दिमानमन ....[1] वयन्तो गुणसामासमानीतभद्रभावाश्च(?) सात्त्विकप्राया अल्प-

---

1. Space for 4 letters left blank.

रजसोनिरस्ताम(य)त्वात् समरसबहुळा विषमरसविरळाः खररसविहिताश्च कसतसृकणो(?) द्वाभ्यां त्रिभिश्चतुर्भिः श्रेण्याश्च ललाटे स्तुवदानेनैकेन निम्न(?) देवमणिनाम्ना कण्ठे चैकेन रोचमानाख्येन बाह्वोर्द्वाभ्यामङ्गद[1] .... रन्ध्रयोः, मेखलासमाख्याभ्यां चतुर्भिश्च वक्षसि प्रदक्षिणे स्निग्धवर्णेन नोमैरमहद्भि(?)र्ध्रुवैश्चापरैः प्रपानादिसम्भवै[2] ....गशतपदीवीमि(?)श्चानन्दिताभिरानन्दितस्थानजन्मभिश्चालङ्कृताः स्थिरसुबहळबहुवर्णया चापार्थिव्या स्निग्धस्तया चोदक्या[3] . . . काश्याश्च रूक्षत्वितन्वी(?)मस्पृशन्तः शरीरसत्त्वगतिवर्णगन्धस्वरप्रभोपपन्नाः पञ्चषट्सप्ताष्टनववर्षाभ्यन्तराश्चतुरश्रा दिक्षु कर्मस्वनेकभेद[4] . . . नियुक्ता वनाभोगा इव श्रीवृक्षकाभिलाषिताः(?), सुरप्रासादा इव स्वस्तिकवर्धमाननन्द्यावर्त(मानाः ?) सङ्गताः, वर्णा इव स्वरव्यञ्जनलक्ष्याः, वर्षादिवसा इव दृश्यकाळिकाः, सरत्नीरभाभापीतिवारुणीचारुसन्दर्शभाजो च(?) बहुळपक्षा इवाशुक्लाः, सुनिमित्तोदया इव कल्याणवेदिनः, कल्याणवासा इव दर्शनीयाष्टमङ्गळाः, सिन्धुप्रमुखदेश्या अप्यदृश्यमुखाः, शुक्तयावर्ता लक्ष्मोचिता अप्यकृशविग्रहाः, सरन्ध्रा अप्यपेतसकलदोषाः प्रलयपवनवेगाभिष्यन्दवम(नि ? न)निर्मिता इव सर्वभोगभाजो वाजिन इति ।

अथ राजा यथानुरूपमूर्जिताभिः सहार्थपूजिकाभिः स्तम्बेरमान् तुरङ्गांश्च कुलपुत्रेभ्यः संविभेजे । ततश्च स्वामिप्रसादस्वीकृतप्रीतिषु प्रतिपालयत्सु समरमुत्सवं दिवसमिव प्रवीरेषु, दूतमुखश्रुतार्थेन द्विषताभ्युपेतयोद्धव्यसङ्ग्रामाद्दिग्देशकालयो(?)रुभयबलकुलपुत्रका(पा? प)दानघोषणपरेष्वितस्ततः प्रचरितेषु चामरग्रहणेष्वर्च्यमानेष्वायुधेषु पूज्यमानेषु वाहनेषु दीयमानेषु

1. L. about 12 letters.
2. " 28 "
3. L about 25 letters
4. " 14 "

द्रविणराशिषु सविशेषमाबध्यमानेषु वीरपानगोष्ठीमण्डलेषु प्रियप्रोत्साहनद्विगुणमण्डितास्वनुमरणकृतव्यवसायासु वीरपत्नीषु स्वयं राजा पूतपुरोहितो मन्त्रसंस्कृतैः (स ?)तीर्थप्रधानभूतैर्गङ्गायमुनयोः सङ्गमाम्बुभिः पञ्चरत्नगर्भैस्त्रिषवणाप्लुतः समभि(हुत्य ? हूय) समित्समिद्धं जातवेदसं सहात्मनातिसृज्य सर्वस्वं द्विजेभ्यो यथाविधि कृतोपवस्त्रः शस्त्रवाहनमर्चितमनुदिश्यैतदावससंरम्भं[1] संस्थितस्य समस्य(?) मुखे कुण्डलयुगळमिव ग्रहनक्षत्रदीप्तरत्नतरळं तदहोरात्रं विपरिवृत्तमासीत् । उदयकूटमुल्लिलङ्घयिषुरपर इव हेमकूटो लाक्षारसरक्तमूर्तिरुत्क्षिप्य त्रियाममयं नीलांशुकपटमुदजिहीत भगवानुदंशुरंशुमाली । सकलराजक्षयचिन्तयेव सञ्चुकुचुः कुमुदानि । समितिसन्दिदृक्षयेवोन्मि(मीषे ? मेष) कमलाकरेक्षणैः क्षोणी । तिग्मतेजःकामुकानां समीहितानीव सद्भटानां सञ्जघटिरे रथाङ्गनाम्नां मिथुनानि । रणरसादिव पटुतरमार(द ? ट)न्तः स्वयमितस्ततः पतितुमारेभिरे सज्जपत्राः[2] । प्राप्ते च प्रभातसमये सूर्यकालास्फाल(न)बोधितमिवोत्थाय सर्वमेव सैन्यं (सा ? सन्ना)हमकरोत् । तथाहि— दिनकरहारिहन्यमानतिमिरकुञ्जरानीक(फि ? पी)नफीट्कारानुकारिणां[3] जजृम्भे भैरवो रवः । पटुपटहानाञ्च पाटयतामिव श्रवणहृत् साटोपदर्पनिर्भरः सुभटपटुहुङ्कारपूराध्मातभुवनाण्डकोशस्फुटनाराटितविभ्रमो बभ्राम त्रिविष्टपे प्रदेशान् विचिकीषमाण इव वीरसैन्यसन्निवेशभूमिमनुगतशङ्खकांस्यकाहलविषाणवंशमद्दलानको मदकलमातङ्गरोषरभससन्धुक्षणक्षणेनैव युगमिवोपसंहरन्नतिमहान् निनादः(?) ।

दन्तिनश्च मुखसन्निहितान्तकप्रसारितोभयभुजदण्डकल्पैः कल्पितप्रतिमुक्तसुतीक्ष्णकार्ष्णायसकोशमुक्तैर्दन्तमुखैः प्रतिजिघृक्षन्त इव सर्वजगज्जीवसङ्घातमति-

1. It appears that some portion is missing here.
2, 3. The Visesya is missing.

बहुळविकटलोहकङ्कट(स्व ? सु)घटनाप्रकटकठिनमूर्तयो भयभङ्गुरभुजङ्गरा(ग ? ज)-भोगमण्डलनिबि [1] .... त्थितप्रचलितवैजयन्तीपताकाप्रक्षीणया केचिदपरे विकटया इतरे जालिन्या अन्ये अहंस्य तथा चापरे कौञ्चपत्र्या(?) पुनरपरे गुलि [2] .... कोर-कार्मुकधैरर्ब(द्ध)गोधाङ्गुलित्रैराबुक्तशिरस्त्राणकवचकञ्चुकैरत्रस्नुभिरागमज्ञैरज्ञातपृष्ठ-(दाने ? भागे)रनेकायुधव्यवहारकुश [3] .... मृत्युहस्तानिक्षिप्तजीवितैर्योधपुरुषैरधिष्ठिताः कर्णशङ्खकर्णशङ्कुकडिण्डिमघण्टाचामरायानहेमकक्ष्याग्रैवेयपट्टपर्याणर्वः(?) सर्व-प्रहरणपण्यपट्टनायमाना (प ? वं)दिभिरिव मुखधातिभिर्मदलोलैर्मधुकरकुलैर्गीयमाना वीरखेलं प्रचेरुः ।

वाजिन(श्याकि ? श्वाति)जवनतया क्रोडीकृतगगनतलेषु रभसलङ्घनेषु सहश्वासैः प्राणा (न ? नाम)प्यवपतनभयेनेव पातितखलीन(संवन्दि ?)संयत-मुखाः, पृष्ठदत्तप्रदिष्ठाद्विगुचर्मप्रतिष्ठापितमरसारचित्रसारपीठा दर्पनिर्भरभरितदेह-दळनशं(क)येवोरःपुच्छवाध्रचर्मपट्टगाढकक्ष्यावन्नद्वारपाळिका(?) चलाक्षिकसुपक्ष-चर्मच्छन्ना गुप्त [4] .... कलमर्षणा निर्मलकार्तस्वरपुलकपङ्क्तिभूषितेन जव-धुतघनघटाच्छतशतस्रादा शकलशारितेनैव(?) च्छादिताङ्गाः, पञ्चाशता शराणां भेदच्छेदयोग्यरूपसंस्थितमुखानामापूर्णैश्चतुष्केन चक्रतोमरकणयक [5] .... रसप्रासा-नामुभयपक्षयोपिकेन(?) द्विकेन कुन्तशरासनानां चतसृभिर्ज्योतिर्भिश्च खड्गाभ्यां च काष्ठापा [6] .... वर्तभिरगदोषधै(र)ञ्जनधूमवर्तिकाभिर्मात्रीहिमुखानामापूर्णैर्वृद्धिपत्र-सूचिपोत्रसूत्रतन्त्रीरज्जुशङ्खकोटरपालिभिश्चाध्यासिताः(?) शस्त्रपूर्णतया च समिति-

---

1. L. about 18 letters
2. „ 30 „
3. „ 18 „
4. Space for 4 letters left blank.
5. „ 2 „
6. „ 1 „

शतेषु कालप्रमुखप्रविष्टनिर्गतकायकार्कश्यभग्नाभिरिव तद्दंष्ट्राभिः कराळिताः शालि-होत्रनिकृत्तपक्षप्रातिनि(ध्वा?धी)निव प्रेङ्खयन्तश्चामरकलापानायोजितोहयका(?)-मणिकाञ्चनरजतप्रायमण्डनाः सक्तसक्तुहस्ता धृतजलभृतयो वध्रम्बिशररावर्णं मधुरसर्पिषाका(?) कृतकर्मभिरपिनद्धलोहजालैः सर्वायुधकुशलैरशिथिलभर्तृ-भक्तिभिराभिवरणापसरणोन्मथनादीनां देशकालाभिज्ञैर्जितश्रमैरभीरुभिः सादिभि-रधिष्ठिताः प्रातिष्ठन्त ।

रथाश्च रणितकिङ्किणीका रत्नखण्ड [1] .... विविधव्याळरूपरुचिरपर्यन्तफलक-भित्तयश्चित्रकूबराः, सुस्वामिन इव सुखापाश्रयाः, प्रभव इव प्रघटिता-क्षेपणाः, बलवन्त इव प्रवृत्तचक्राः, प्रलयमारुता इव सानुकर्षाः, केसरिण इव सहेषाः, सदारवैस्सुरभिख्यातपौरुषैः कृतवेदिभिरदृष्टपृष्ठैरिष्टकीर्तिभिर्वीर-व्रतानुवर्तिभिः सनाथीकृताः, सर्वसम्पत्समग्रधारिभिर्गृहीतरश्मयः प्रनृत्ता इव(?) प्रोल्लसत्पताकाः प्रावर्तन्त ।

पत्तयश्च पिनद्धपरिकराः केचिदरुणा रागवसन(वास ?)वासिनः क्रोधानलादि(व) विनिर्गताः, केचिन्मेचकांशुकपरिहिता मेघोदरादिवोल्लसन्तो महाशनयः, केचित् पीताम्बरपरिग्रहा ग्रहोपरक्तादित्यमण्डलप्रविष्टा(न्धा ?) इव देदीप्यमानाः, केचिदभिनवरम्भागर्भपत्रपाण्डरदुकूलभाजो मूर्तैरिव यशोभि-रुपगुह्यमानाः, केचिच्चित्रवस्त्रसंवस्त्रिकास्तेजोरागादिन्द्रायुधेभ्य इव पुनर्जायमानाः सर्वे च निबिडनिबद्धविकटकुटिलकुन्तलाः, कृतहस्ता, हस्तवलयवेष्टितप्रकोष्ठाः, ख(गी ? ग)वन्तो निषङ्गवन्तो धनुष्मन्तः सशक्तयः सतोमराः समुद्गराः सगदाः सा(र ?)सिधे(न)वश्चित्रकञ्चुकाश्चित्रमाल्याश्चित्रवाजाश्चित्रगतयश्चोत्सर्पयन्त

---

1. L. about 3 letters

इव दर्पमुद्दामयन्त इव मानमु(त्पे ? त्पाद)यन्त इव शौर्यमुद्दीपयन्त इव कोपमुत्थापयन्त इव पुरुषकारमुत्कृष्टक्ष्वेळितकाभिनविश्वमभ्यमित्रीणा(?)स्तृणायापि मन्यमानाः प्राणान् समन्ततः समुदातिष्ठन् ।

विशाम्पतिश्च निशां तामशान्तानिद्र एवातिनीय निजोष्णतापासहिष्णुतयेवोषस्येवाभिषिच्य पुण्याभिर(भीर्थ ? द्भिर्ज)प्यानि परिवर्तयन्नुपस्थाय च पूर्वसन्ध्यामु(द्वि ? त्थि)ताय च भगव[1]...स्थण्डिये(?) रक्तपङ्कजबलिमभिवन्दितानां च हरिहरहिरण्यगर्भवरुणवासव(म ?)यमघनेश्वराणां गुरुमन्त्रसमुद्यताः प्रतिगृह्याशिषः शेषेभ्योऽपि दै[2]....नामषभयहर निरसनव्यसनव्यसनिमधुकुलनिधनधूमकेतुलेखा चन्द्रलेखामुदग्राकृतिं कृतसपर्यामार्या(?)मनुष्ठिताग्निकार्यः स्वस्ति वाचयित्वा[3]....रेहि सूत्रस्यूतरक्षामणिरामुक्तमरतककटकरश्मिजालशाद्वलप्रकोष्ठः शुक्लमाल्याम्बराङ्गरागो जाम्बूनदकोशगूढश्रृङ्गकोटिखुरास्तरुणव(र्ण ? त्स)काः कलशदोग्ध्रीः कपिलाः स्पर्शयित्वा शतसहस्रशो नृपा(ना ?)नादाय कवचमायुधानि चाभिमन्त्रितानि जीमूतियेनाथर्वभिश्च जैत्रैरभिपरिहितवर्णव[4]....पाण्यो(?) हारकिरीटकेयूरकुण्डलप्रालम्बभोगभूषणमणिमरीचिसञ्छुरितदेहतयोद्धूयमानवाहनमयूरबर्हभाराच्छादिताङ्ग इव होतशनिरप्रतिरथं सौपर्णं शरासनं(?) शकुनसूक्तकमन्यानि च वैजयिकानि च पठद्भिर्ब्रह्मकल्पैर्ब्रह्मभिरनुष्ठीयमानसकलपास्थानिको निर्गत्य काञ्चनघटसहस्रगलिततीर्थाम्भःकृताभिषेकमग्रमाल्यसनाथमस्तकमग्रविलेपनप्रलिप्तगात्रमनुसञ्चारसुरभिधूपमार्दवानुरागयुक्तेन वंशत्राणकारिणा सपूरुषेण(?) महता शो(ण)चर्मत्व(ये ? चे)नाध्यासितमाजिसागरमथनमन्दरमायतेन द्विगुणवासुकि-

1. L. about 16 letters.
2. " 25 "
3. L. about 8 letters.
4. Space for 4 letters left blank

पन्नसत्त्वा बभूवुः। विन्ध्यसेना च गर्भं बभार। सुषुवे सूनुं सिंहदमनं नाम। अनया च वार्तयोर्व्याःपतिः पत्नी चाभ्यनन्दताम्। अदत्तां च प्रदेशकं प्रभूतम्। अथ कतिपयेष्वतीतेषु वासरेष्वसूत सुतं सुत्रामाणमिवादितिर्देवी च वसुमती। तस्य जन्मनि तत्तेजःप्रसरप्रोषभयादिवोच्चैःस्थान(भाव ?)भाजः सर्वे एव ग्रहा जज्ञिरे। तस्मिंश्च समये तत्संभवं कलये कलिनिधनकरं निवेदयितुकामा(ष्य ? ह्य)तिवातादयो दोषा दुद्रुवुः। तस्यापि त्रिभुवनविजिगीषोर्देवस्येव विष्टरश्रवणमेव जन्मदिनमुदयश्चास्य प्रथममेव तदनुरूपापरश्रीनिर्माणकामामनु(?) प्रतिर्निर्मथ्यमानसिन्धुनाथह्लादनानीव दिङ्मुखान् व्यापादयन्तो देवस्यावेदयन् देवदुन्दुभयः।

परिजनस्तु रभसव्याकुलं केवलं जहार पूर्णपात्रम्। प्रसरति च प्रतिभारिष्टभवनप्रदीपचक्रवाळे स्वयमेव काले त्रिभुवनदीपमालिकोल्लासिनि मङ्गळप्रदीपतामालम्बमाने गर्भरागानुबन्धिनि सन्ध्यायितरोचसि तस्य तेजसि त्र्यम्बकजटाकदम्बभ्रान्त्या पतन्तीवामरसरि(द् ? द)भ्राजिष्ट दिव्या पुष्पवृष्टिरूपा। जगाम च प्रभावज्ञातवृत्तान्तो द्रुतगतिचटुलजटाकलापः प्रहर्षक्रियमाणकिलिकिलारवेण स्वगणेनानुयातोऽवदातवृषाधिष्ठायी कारयितुकामः कुमा(रो ? र)जन्मोत्सवमुरुतमप्रमोदो भगवान् वामदेवः। सहोमश्चासावचीकरत् स्वयमधिष्ठाय कृत्स्नां पुरोधसां विधिम्। अनन्तरञ्च महर्षिणाभ्यनुज्ञातस्तेनैव समन्त्रजातैः पुत्रमप्यालम्बितबहुपुत्रकं सहलमुसलधरमप्यवनमालावारणमुरुक्रममप्यरिष्टसङ्गतं शक्तियुक्तमप्यपाधिष्ठितं भूपतिपरिहृतोद्देशमपि लक्ष्मीसमध्यसितदृश्यमानखमषावयवकञ्चुकित्वमप्यवितृप्तिकञ्चुकीयहर्षनृत्तशोभितं(?) बहुविधरक्षाधूपं दुर्दिनान्धकारमप्यविकलपुण्डरीकच्छविसनाथं स्थानस्थानं निखातचारुविटपमभ्यर्च्यमानषण्मुखप्रमुखदेवतं हरितपत्रपल्लवकुसुमदूर्वामिश्रसर्वौषधीसर्षपाङ्कमपासुलोलोभजयानलस्पर्शपूर्वमप्रविश्य(?) सूतिकागृहं क्षामक्षमाया मातुः

सन्निधावुदयरागलोहितायमानमूर्तिमंशुमालिनमिव बालमानन्दजननं जनयिता कुमारमद्राक्षीत्।

ईक्षमाणस्य चास्याकर्णसेतुदीर्घयोरक्षिदीर्घिकयोः कमलोत्पलकुमुदकान्तिशालिन्योः शीतलेऽम्भसि तरळतारके तारतरं ततारेव तनयाननदर्शनानन्दम्। अनेन च तारयित्रा दुस्तरमपूर्वपोतकेन तीर्णमेव वर्णात्रयत्रिखण्डं(?) संसारसागरस्य मेने। मन्त्रिणोऽपि महदि(नदन्मा?दमा)विर्भूतमभूतं भूतानां भू(त?ति)हेतुरित्यविरत(बा?ह)र्षबाष्पपूरप्लुतेक्षणाः क्षणे क्षणे कमलया इव कण्टकि(त)तनवः सस्मितमाचचक्षिरे। कुलपतिस्तु तपःप्रभावाध्यक्षेणाध्यक्ष(य)न्नमु(ह्य ? ष्य) महात्मनः परमाद्भुतं भाविचरितमीषत्स्मितो हर्षगद्गदिकाग्रथितकण्ठमब्रवीत्।

(वत्)स! राजहंस! पश्य तावदयं स कंसशत्रोरंशः। वंशस्तव चापि कान्तो यस्य राजकुञ्जरस्यातिभूतं चत्मिदमस्य करकमलतले चक्रमेव कथय चक्रवाळपरिकरधराधरायां समग्रस्य पुरुषसिंहशस्याशितंभवमात्रमाविषमष्टादशक्षेत्रवर्तिद्वीपजातं षण्मुखेनामुना पुत्रिणैकेन स्पृहयेत् प्रायः पितापि षण्मुखस्य(?)। धन्येयं वत्सा वसुमती यस्याः कुक्षिर्निधिरयमद्भुतः समुद्भूतः सद्गुणरत्नानाम्। भाग्यवत्य इ[1] ..... पापरपरनिर्वृतिद्वारमुत्थित इति ब्रुवाण एव तस्मिन् भगवतः पाकशासनस्य शासनात् तस्य च सर्वचक्रवर्तिनामग्रतःसरस्योपीभ[2] ...... प्रसर्पिणीस्वपव[3] ..... प्रभा-

1· L about 20 letters.

2, 3. The two lacunæ cover about 26 letters

प्रसरे पद्मरागरङ्गपीठ इव नटन्त्यश्चटुलतुलाकोटिमणिरणितानुपातिनीषु मन्दा-
किनीहंसमण्डलीपुण्डरीकमालास्विव लक्ष्मीविल[1] .... इव स्वभाव-
बद्धानेकरागवृत्तिभिरुद्वाहितनितम्बमण्डलानुपलितैः कल्पद्रुमकुलपल्लवैरुल्लसित-
कुचतटतरळपुरतकुमुकुळमुक्ताफलयर्षयो(!) हर्षनृत्त[2] .... शिखरकणकरालित-
कुमारयोग्यशक्रप्राभृतामृतकलशवाहिन्य इव लक्ष्यमाणानना मणिभूषणांशु-
मालिन्यो ह्रादिन्य इव राजसूनुरुपिध्वानजनितमेघगर्जिताशाः शक्र-
धनुस्सहस्रानुकर्षिण्योऽपकीर्णाश्चमयिमिवाननैश्चतुरहासचन्द्रातप(व)र्षिभिरभ्रमय-
मिव धम्मिल्लपल्लवैश्चलाकामलप्रलम्बमालोल्लासिभिर्दीप्यमानकामधूमरेखामयमिव(?)
भ्रूलताभिरूर्ध्वपलितवेल्लितचटुलकोटिभिर्विजृम्भमाणकुवलयसरस्सहस्रमयमिव लीला-
पाङ्गलास्यैरुन्मदभ्रमरमालोद्दामविभ्रमैः प्रचलरागपताकामयमिव भुजलताभिः
कमलकोमलतलप्रभासम्भारकौसुम्भांशुकपटपाटलाग्राभिराकुलाकुलरतिप्रवाळमयमिव
लोलपारिहार्यरवैरतनुरागजन्मभिर्बालातपच्छेदामिव तरळकर्णपारिजातकिसलयै-
र्भास्वन्मुखविलासिनीभिः कामराज्यमयमिवाम्बरद्युतिवितानैरनुरञ्जितसकलदिग्भि-
स्तमरण्योद्देशमादर्शयन्त्यो वर्षन्त्य इव लावण्यं समुद्गिरन्त्य इव रस-
सरित्प्रवाहं भ्रमयन्त्य इव विभ्रमं विक्षिपन्त्य इव विलासं दिव्यवीणावेणु-
तालमुरवमद्दलपणवादिभिस्तुम्बुरुनारदप्रभृतिभिरनवमैर्गन्धर्वराजैरभ्येत्य सुरस्त्रियो
नृत्तगीतरासकलास्यभल्लीसकलाप्रमोदैकतानमुत्सर्पं प्रचक्रुः । प्रोद्भिद्यन्त इव
भुवस्तलाद् महोत्साहदर्शिनिनामानना(नि ? नी)व नागसुन्दरीणां हिरण्मयाति-
तामरसानि कुमारदर्शनरागिण्या धरण्या स्वयमपावृतानि भवनद्वाराणीव
रत्नचामीकरमयान्याविरासन् महानिधानानि । कल्याणकर्मकर्णधार इव

1. L about 22 letters
2. „ 4 „

विकीर्यमाणविविधपुष्परेणुपिष्टातकप्रकरो बभ्राम सुरभिरितस्ततो मन्दमारुतः ।
प्रसन्नोज्ज्वलमुखीभिर्दिगङ्गनाभिः प्रमोदगी(ति?त)मिवो(द्गा ? दगा)यि प्रगीतिः ।
चारणगणगीतरागप्रतिरवेण दिव्यगान्धर्वतूर्यध्वनितपूरितैर्गुहामुखैर्विन्ध्योऽपि प्रहृष्ट
इव प्रततमुन्ननाद ।

किं बहुना, तन्मुहूर्तमकल्पत स्वर्गभूयाय तद्धर्मकाननं, यन्निशाम्य
व्यस्मेषत स्रया(द ? न)भिज्ञमनसोऽपि ते तपोनिधयः । स च समग्रो
देवतागणः प्रणिपातेन स्वागतेन मधुरव्याहृतेनासनदानेन च यथानुरूपं
भूपालेन सम्भावितस्तमामन्त्र्यान्तरिक्षं जगाहे । महर्षिरपि वामदेवः
कुमारानुभावसंबद्धयैव सत्कथया सुचिरं स्थित्वा प्रत्यासन्ननियमवेलः कर्त-
व्यान्युपदिश्य सह तपोधनैः स्वमेवाश्रमं जगाम । तावच्च कांस्य-
तालकाहळगोविषाणशङ्ख(म ?)मद्दळान(त ? क)तिमिलाशब्दैस्तदरण्यमापूरय(न् ?
ता) प्रतिपदस्खलितविह्वलं प्रनृत्यता वृद्धेन व्यालदमनेन, मधुमदहर्षोप-
विष्टेनापरेणैव नृत्तमार्गेणाधिकचतुरश्रचारिताक्षिभ्रुवमविरलचरणनिकुञ्चनक्वणित-
नूपरमाविद्धाकुलकुसुमदामधम्मिल्लबद्धबन्धमसकृदाकुञ्चितप्रसारिताञ्चितोत्क्षिप्तभुज-
लतावलम्बितोत्तरीयमारेचितनितम्बफलकाचालमेखलमान्दोलितकर्णपाशलोलकुण्ड-
लावघट्टितांसमनवधानस्खलितपादविषमितलयमायासस्वासभिन्नगीतरागमावर्जित-
पृथुपयोधरहारमारब्धानन्दनृत्तया प्रनृत्तशबरीसहस्रमध्यवर्तिन्या विन्ध्यसेनया,
निनर्तिषावारतरलितनितम्बभागमातामहीपतिपरिगृहीतेन(!) च त्रिमासजातेन
किमपि मुग्धमुखमुद्गर्जता सिंहदमनेन, नृत्य(तं ? ता) गायता क्ष्वेळतो-
न्नदता समास्फोटयता सङ्घट्टयता च सुमदोद्धतेनाश्लीलपदप्रबन्धोहारिणा(!)
तुम्बुरुतुमुरुपुर्मुखकिरातबर्बरपुळिन्दभिल्लमालमातङ्गप्रायेण महता वनचरसमूहेन

पुरस्क्रियमाणबहुळहर्षकोलाहलः स्वयञ्च नृत्य(न्) व्याघ्रदमनः समद्दश्य(ति ? त) । चिरादिव च प्रशान्तकलकले काननौकसामनीके सिंहदमनप्राणिपातप्रीणितः पृथिवीपतिरयमपि कुमारस्यानुरूपमेव मित्रमावयोरिवास्मत्पित्रोरिवानयो ....[1] र्योदाहार्यमस्त्विवसुलभप्रसादहारगौरवानम्रशिरसं व्याघ्रद(मन)मनुगृह्य सह पित्रा व्यसर्जयत् । विन्ध्यसेना तु गतेऽपि भर्तर्यपारय(ति?न्ती) कुमारा(दा ?)ननानन्द .....[2] पि सिंहदमनमपश्यन् पितास्य कथं सहेत याहि पुनरप्यागमिष्यसीति देव्या निर्बध्यमाना कथंकथमप्यवितृष्ण ....[3] पर्यणंसीत् । सञ्चायञ्च(?) मन्त्रिणां चतुर्णां भार्याः पत्नी च पुरोधसः पञ्चापि ताः पञ्चार्थानिव पञ्चेन्द्रियप्रवृत्तयः पञ्चदारकान् मनोनुकूलानलभन्त । पञ्चभिश्च तैः पञ्चपर्वा विद्रुमाङ्कुर इव कुमारः सुजातः स्ववंशलक्ष्म्याः पर्याप्तं भूषणमगण्यत । प्रहृष्टतमेन पित्रा तेषां च गृहेषु स्वजनवत् स्वयमाधिष्ठायोर्वीपतिः सर्वाः क्रियाः कारयामास । तथा समृद्धमनोर(थ)श्च म(न्त्री ? न्त्रि)परिषदि स्वयमिदं बभाषे । चित्रः खलु जीवलोकः । बहुरूपाणीव भवितव्यस्य विस्फूर्जितानि । को न्विमामस्य दशां पश्यन्नपि श्रद्दधीत । तिष्ठतु वा(व ? प)रः । स्वस्यैव मे स्वचरितमत्यन्तपरोक्षमिवालक्ष्यते । स किलैवायं संयुगेषु भ्रमितबद्धेनाबभ्रामाद्भुतभ्रमय इवासृग्धाराश्चाक्षमस्कर इव मधुकृद्भिराश्चर्याक्षिप्तोदैश्चित्रिताङ्गः पपानाथतलतप्रसुप्तश्च जने सुजनदुःखसागरमनभिसरस्सुदुस्तरं तारानुजग्रहे चाह्लाय स्वप्नसन्निहितेन भसि(नवना ? तवता)महाकालनिवासिना नृत्यमिदमनुभूयमानव्यसम्भाव्यसम्भाव्यतया नाभिप्रणयतिश्च यं(?) । क चायमष्टादशगणाभ्यर्च्यमानजन्मनश्चक्रपाणे-

---

1. L about 8 letters 3. L about 16 letters
2. „ 34 „

रिवात्मजज(न)नीत्स(वम ? वा)नुभवः । कश्चायं प्रकारो यदस्यैवमात्मनः शरीरान्तरितादस्यैव पु(न)रिमेऽपि पञ्चविकल्पाः पञ्चबालकाः समं समभूवन्निति हर्षभरेणातिमात्रं पीड्यमान इव तस्थौ । सु(गु ? म)तिस्त्व(म ?)ब्रवीत् । न(तु ? नु) देव प्रहतमेवेदं यथा सारवत्स्योशवाश्मस्विव तुहिनतेजसी सुखदुःखेति प्रीहीभवन्नो नेतरेषमहत्सु च प्रपतितान्यगेष्विव मृगशृङ्गाणि व्यसनान्येव व्यसनमापद्यन्ते(?) । व्यापद्यतश्च विरसाम्नानोऽपि व्यवसायवता विलङ्घ्यमाना नियतं पारावारोर्मय इवान्ते महान्तं लाभमावहन्ति भवादृशश्च तेजस्विनस्तिग्मगोरिवावसर्गादर्शनमात्रमप्रमत्तस्य जगतो न तु स्थास्नुक्षिप्तसर्वानुभावं भाजनमेव भवानीदृशस्य कल्याणप्र(प)ञ्चस्य(?) । न(नु) वसन्त एव स्वभावसुरभौ निपतन्ति जगदानन्दभूमयः कुसुमातिशयाः । क चायमन्यत्र चक्रवर्ती जन्मग्रहणं कर्तुमर्हति । तमन्तरेण क्षीरसिन्धुमस्ति क(श्च ?)श्चिदुद्भवः कौस्तुभमणेः । त्रिभुवनसुकृतमयानां च पार्थिवानामुत्पत्तौ नातिच्चित्रीयते नानुनिष्पादिनामुपकरणानां सामग्री ननुवकसन्तवोसरमनु विकसन्ति पङ्कजाकराः(?) । तदेतेऽपि पञ्च (बलकां ? बालकाः) कुसुमकोमलमूर्तयः शरा इव शरीरजन्मनस्तवोत्पतत इव स्वार्थसाधनाय हस्तेकृता इति । अपि च मन्त्रिणो हृद्यसम्भवं तमानन्दधुरमिवोद्गिरन्तस्तत्कालोचिताभिः सुचिरमासाञ्चक्रिरे । प्रौढे च प्रदोषसमये राज्ञाज्ञप्ता जुजुषुस्तोषवन्तो य(दा स्वा ? थास्व)मास्पदम् । नृपेन्द्रोऽपि निजे पर्णभवने शयनीयमभजत । प्रीत्या चोपगूढस्तं निशांशमप्यनीनयत् ।

अथ गुणिनि नक्षत्रे प्रशस्तायां तिथौ सम्पन्ने मुहूर्ते सह महर्षिणा संमन्त्र्य त्रिलोक्यामस्यां सर्वत एव राजनेम्पत्येनधिष्ठिता(?) यथास्वं भारमेतेषाञ्च वाहयितेति यथोदितेन विधिना राजवाहनं नाम राजसूनुं राजकीयो गुरुश्चकार ।

स्वं च तनयं सोमदत्त इति स्वजातिसमुचितेन नाम्ना समयोजयत् । सुमतेः सूनुः प्रमतिरासीत् । सुश्रुतस्य विश्रुतः सुगुप्तस्य [1] मित्रगुप्तः । तेषु चैवं कृतनामसु मातृस्तन्याशनेषु वर्धमानेष्वर्भकेषु कदाचिच्छबरसेना नाम जननी विन्ध्यसेनायाः पलितगौ(र)शिरसमनतिनृशंसाकृतिमार्यवेषं कमप्यारण्यकं पुरस्कृत्य परिवारजने स्वयमेवादरादर्पितश्रोणीपार्श्वां वर्षजातमपि द्विवर्षमिवोपलक्ष्यं लक्षणैर्दयार्द्रैरिवानहदशापन्नपरिगृहीतं(?) सिंहशावकमिव कञ्चिद्यदृच्छाधिगतं पृथुकं पृथुपल्लवगुच्छप्रतिषिद्धोष्णमुद्वहन्ती समुपसृत्य सभर्तृकां देवीमवन्दत । अभ्यधत्त च सदासी विन्ध्यसेना विज्ञापयति— बालोऽयं बालसेवके(ऽनु)रूप इव कुमारस्यास्यागममागमय्यास्मदाज्ञाक [2] .... परं भर्तृपादाः प्रमाणमिति ।

प्रीयमाणस्तु पृथिवीपतिः अङ्ग! आचक्ष्व । कुत इहास्य सम्भवः कच्चिदिह कानने कञ्चिदृषिमपि लोभयन्त्याः कस्याश्चिदप्सरसः कृतार्थतेयमन्यथास्मि दुग्धशिरीषकोरकुमारे [3] .... वेदवष्टम्भोऽयमीद इत्युद्भिन्नकुतूहलः स्वयमेव तं शबरमप्राक्षीत्(?) । स तु प्रणम्य विज्ञापयामास— देव! श्रूयताम् । इ [4] .... जन्मान्तरेऽस्यामेव विन्ध्याटव्यां [5] .... या मातृष्वसुः पतिरपर इवै(कु ? क)लव्यः कलेरिवांशावतारः कर्ता कोलाहलानां प्रहर्ष [6] .... प्रगृहीता पल्लीपतीनां लोप्ता जनपदानां गोप्ता मलिम्लुचानामनभिज्ञः क्षुत्पिपासयोरवसरज्ञः सम्प्रहाराणामित्यभि [7] .... प्लवङ्ग इव प्रांशुवृक्षारोहणेषु कौशिक

1. It seems that some words are missing here. The passage must read सुमन्त्रस्य मन्त्रगुप्तः सुमित्रस्य मित्रगुप्तः.
2. L. about 2 letters
3. „ 8 „
4. „ 10 „
5. L. about 10 letters
6. „ 32 „
7. „ 25 „

इव क्षणदाजागर्यासु मत्तगज इव प्रतिसंवेष्टनो मृगपतिरिव सर्वसन्दोहपाती प्रलपन्निरन्तु [1] .... शीतोष्णवर्षवातोपद्रवेष्वविकारी विमृश्यकारी शक्यारम्भशीलः मृगविहृतिविभागविदविसम्वादितनिमित्तजटाकः कर्तव्येष्वदीर्घसूत्रः कृच्छ्रेष्वप्रतिपत्तिः प्रथनेष्वनिव(त्ति ? र्ती) सर्वायुधेषु निष्णातो वपुषापि भयङ्करः किरातपतिर्यथार्थनामा सार्थमर्दनो नामास्ति । तस्य मामवेतु मातुलमलातचक्रनामानम् । (दवस्ते ? ते व)यमपसर्पमुखादुपलभ्य मैथिलमवलेपवशादशङ्कित(वे ? मेव) तरन्तमरण्यवरानायुग्मां प्रदापास्तम्भनिर्भयप्रवृत्तश्च बहुतमामिषत्वादाशापूरणसमर्थं सार्थं हस्तवर्तिनमेव तमवस्यन्तः प्रनर्दन्तः प्रनृत्यन्तश्च हर्षात् पुरुषमुपहृत्य देव्यै विन्ध्यवासिन्यै सिन्धो पतिरश्शतदेयमित्यवस्थाप्य सुनिशितासिधेनुस्यूतस्वप्रकोष्ठस्नावि(का ? ता)स्रवचयस्सरसत्त्वविसारसारतज्यासज्यकोदण्डयष्टयः सद्यः प्रतिमुक्तनूतनबर्हवाससामाश्यानशोणितप्रलेपप्रचलितकुण्ठयारण्यश्मसुमुखनिशाययित्वा शरणां सम्भृतशूल्यमांसवल्लूरवल्लूरिप्रमुखक्षेमाशनाः पशुपुरितदृतीधूता विश्वासोत्पा(त ? द)नाय कतिपयदिवसाप्रतिरुद्धाध्वनी(नां ? नाः) सुशकुनप्रपञ्चवर्धितोत्साहाः कृतस(ञ्जीयो ? ङ्केता) यथायथं सेनापतिप्रदिष्टेषु प्रतिरोधनस्थानेषु विपिनसत्त्वापाश्रया निभृतमिवातिष्ठामहि(?) । प्रावर्तत च प्रमत्तरूपो रूपाजीवानुरागदृष्टिवागुरितविधुरवीरतरुणस्तारवरताल शुङ्गभङ्ग लोभलम्बमानाङ्गनाजनः सासिचर्मैकहस्तद्विजितभटगृहीतपाकपाकस्वादुफलापचायप्रसृतप्रकृतो मार्गोत्थितमृगानुधावनच्छिदुरसंहतिरिहावियसौरभेयकरभरासभसर्दादिकार्यद्धोद्धुरप्रहरतपृथग्जनो निम्मिविम्लु[2] .... शङ्किनीभयमलिम्लुचामलायोगवत्पूर्यमानमान्यवेलञ्चलपटो काण्डदण्डपट्टन-

1. L about 22 letters
2. „ 2 „

रुष्टगोणिगोणिक्षेपक्षुभितक्षुद्रस्वामिदुश्श्राव्यक्रोशवर्धनो रभेरपिगर्भगः परवृद्ध-वैषम्यवार्यमाणलोकप्रणोदो नैमित्तिकदुर्निमित्तोद्घाहणप्रतिसमाधीयमानशस्त्रिवर्गो मार्गज्ञजनकथ्यमानचिह्नितभयस्थानः सावधानप्रस्थितः स राजसैन्य(?)सम्भृत-सार्थो महासार्थः(?)। प्राप्ते च स्वगोचरमाहतपटुपटहगोमुखान(न?)का मुख-षव(नो? ना)ध्मानशब्दायमानशङ्खषि(ञ्छाव? ञ्छोला)काहळाः क्ष्वेळोत्सृष्टकर्णी-रवक्षुभितकक्षमण्डला, मण्डलितप्रचण्डकोदण्डघनघटोत्सृष्टकाण्ड(द? वृ)ष्टयो हतहतेति ग्रथितमभिव्याहरन्तश्चलितप्रभूर्भोरथलघुदर्शनपरिवृत्तयो(?) व्याघ्रा इव विजृम्भितक्षुधः क्षुभिता इव प्रलयनिर्घातघोरवेगमेते वयमुग्रासिभुवा भक्षयन्त इव तद्बलं रभसमभ्यपताम। तनुशिबिरगर्भतया प्रस्थान(पर?)-परतया बहुसङ्कटतया विस्रब्धतयान्धतया च तस्योद्देशस्योन्मुक्तबहळ-हाहाकारमुद्भ्रान्तभीरुशिबिरचाराबला(बा? पा)लनाहीनसन्नद्धं नदत्सङ्कटमुद्भट-करिघटाभ्रमणभिन्नाशाटितशकटकोटिसङ्कटमुत्कटशरखण्डकण्टकितविकटकङ्कटि-कदण्डकचकितं चिटितपटुरभयहरणपरपुरुषकिरातकृतकपटा(व? प)सारमुत्सेक-प्रसृतनासीरचोरुभगभग्नभग्नपृष्ठ्यवलयजपजङ्कारवझटझटायमानगुल्मद्रुमैकमर्दनम-र्दितबलीवर्दवृन्दनिर्दयविमर्दकर्दमितरुधिररुद्धमार्गाज्ञवत्कान्दिशीकदेशिकायमान-शठशबरदर्शितात्मवलीपथमपहतद्रुमविलुप्तविध्वस्तं समर्थमेव सार्थचक्रमसत्त्रियां कामितशोच्यदर्शनं तत्क्षणादजायत(?)।

स तु नरपतिरमरतुल्यप्रभावः प्रभ(ने? श्रे)ऽपि सर्वसैन्ये सुयोधन इवाक्षताभिमानः स्वयमसक्तसारकासारवर्षवारिवाहायमानबाणासनो दारुणक्रोध-ताम्रेण चक्षुषा निर्दहन्निव ......[1] क्षिप(त्)। दर्पितात्मा च सार्थमर्दनो

1. L about 20 letters

महानुभावे तस्मिन्नशबरार्हे बहु पराक्रमत। स च महा(न्) सर्वैरेव सज्जधन्वभिरस्माभिरभ्रैरिव गिरिरभ्यव ....[1] सार्थवाहैरूर्ध्वदोर्दीर्शाक्रन्द्यमानो दुष्करप्रतिसमाधानं तद्बलमवगत्य दुर्गमत्वं चात्मनो विधुरतां च क्षेमस्थास्यग ....[2] भूयिष्ठ(?) ....[3] कृतः पार्श्ववर्तिनोऽन्वयुङ्क्त। सङ्कुले केनाप्यप्रस्थितं देवीवाद्यमित्यभिहितो गृहीतह रं वैदेहिकजनमभयगतञ्च सस्त्रीबालवृद्धं च ....[4] ध्यध्याधदर्शमानुगैराशुकारि शनैश्शनैः प्रातिष्ठत(?)। सार्थमर्दनस्तु माममुष्मिन् पातस्थाने महतः सारसञ्चयस्य रक्षाविधौ नियुज्य राजानमन्व-बध्नात्। आह्वामयन्नश्च मातङ्गपुळिन्ददुर्मुखानां सार्थलक्ष्म(?)समूलकार्षं कषन्तः कांश्चिदसिघातं घ्नन्तः कांश्चिद् जीवग्राहं गृह्णन्तः कांश्चित् पशुमारं मारयन्तः कांश्चिद् दण्डेन कालयन्तः कांश्चिज्जीवनाशं नश्यतोऽभिगृह्य पूषवाहं वाहयन्तो(स्त्रा? स्त्रा)णि कांश्चिद् गुल्मानुप्रवेशं लीनान्वेषमनस्सु चक्रबन्धं बद्ध्वा पार्श्वोपपीडं शाययन्तः कांश्चिदसहिष्णुतयोरस्पेषं युध्यमाना(न्) द्विजेषु-ग्रहमाकृष्य हेलयाक्षिनिकाणं प्रहसन्तः कांश्चित् पशूनिव यष्टुरघातं कालयित्वा व्रजावरोधं स्थापयन्तः कांश्चिदजकनाशं नष्टान् गुहान् गुहानंशेन प्रवि-वेशमाकर्षन्तः कांश्चिन्नीचैःकारमालपन्तः (व?)क्षुपलीनानुपलभ्य हर्षादन्योन्यं नामग्राहमाह्वयन्तः तथाच केचित् गुह्यकजनकथकानि कौतुकरावर्षमामुञ्चन्तः स्वादुङ्कारमासवसुरारिष्टसौवीरकतुषोदकानि यावद्वेदं शुल्यमांसोपदंशं पिबन्तः कर्पूरस्फटिकं पाषाणशुष्कपेषं पिष्ट्वा नरास्त्रविस्त्रेण वक्षसि क्षिपन्तो बन्दीजनं च नागाकारं कारणाभिगुप्तमरण्यं परिभ्रमन्तः परमहृष्यत्यजिकान् क्षुताग्न्ये

1. L. about 25 letters.
2. Space for 4 letters left blank
3. L. about 26 letters.
4. „ 20 „

मृगा इव शय्योत्थायमयमहरहरामिषान्वेषिणोपनान्वयं परिधावन्ति ते तथा धनपोषं पुष्टा हृष्टा इव च(?) । लुप्तांसोऽप्ययमुपलिप्तमिव (कु ? गु)रुचन्दनैरुपहृत(मिव) शिरःपङ्कजैरुप्तमिव बहुमुखरत्नभूषणैरुद्गन्धकमिव भाण्डकूटैः स्थगितमिव ताम्ररोमकुम्भैः पुष्पितमिव प्रकीर्णकप(व ?)करैः पल्लवितमिव रत्ना(?)वृन्दैस्तारकितमिवार्वपदपुलकजालैरत(न ? नु)वनदन्तिभग्नवार्यर्गळाभिरिव छिन्नाभिर्वीरबाहाभिः कीर्णं काळरात्रिस्वयंवरमञ्चैरिव काञ्चनदंससैः(?)वाजिगजकलेबरैराचितं मधुरापुलिनमिव कंसमण्डलाकीर्णं वनमिव जातरूपघटाकुलं बार्हद्रथमिव भग्नद्रावितमधुदण्डं राजकुलमिवोद्भ्रान्तावनिपलोकं वल्मीकमिव बहुमुखक्षरद्रक्तस्त्रीगणनिचितं गणिकाकुलमिव रत्नरक्तमुक्ताफलका(न्तोदा ? न्तमा)योधनस्थानं स्थापितरक्ष परिहृत्य रक्तचिकिल्ललीनशल्यं हल्लेखनमितस्ततोऽनुपचरन्(?) बहु-मेक्षतरुजाभिर्निर्मील्य चक्षुषी दीर्घमन्तः स्तनन्तीमन्तकखरकरकर्षणधावज्जीवितामिव क्षरत्क्षतजं क्षितौ विवेष्टमानां रुधिरपेषं पिष्यमाणामिवाङ्गरागीकर्तुं कालरात्र्या घर्मवनलतामिवाम्भसामलाभादूर्ध्वशोषं शुष्यन्तीमष्टादशवर्षदेशीयां युवतिमद्राक्षम् । अभ्यर्णे च तस्याः किम(प्य)र्भकस्येव रुदितशब्द(माचकर्ण ? कर्णयं) न त्वज्ञासिषम् (इ ? कु)तोऽस्य सम्भूतिरिति । अथ (ताता ? जात)दयः किञ्चिज्जीवसीत्यप्राक्षम् । अक्षमा तु सा वक्तुमक्षिणी मनागुन्मील्य दयमानं मामवेक्षमाणा यत्नादभाषत । आर्य ! किं मया मन्दभागया मृतया धृतया वा । (य)स्त्वसौ करिशव(र्णत ? क)र्णपल्लवान्तरितो भ(द्र ? र्तृ)दारकः सम्भावय तावत् स किं जीविष्य(ती ?)ति नवेति तस्याः श्रुत्वा जातकौतूहलः सहसोपसृत्य पतितस्य परासोः स्वपत इव मतङ्गजस्याङ्गमङ्गारकितमिव शी(नश ?)नैरसृग्भिरभ्याक्रम्य ग्रीवान्तरे तोमरेणाधःकीलितं परितः पङ्क्तिस्थितैरिषुभिरवगाढत्रिभागैः परिक्षिप्तं द्रक्षुपरीतिरुद्धपर्यन्तमिव पर्यशेषं धर्म-

पल्वलकमूर्ध्वदृष्टि मुलितक्षेपैरुच्छ्वास्यमानं सप्राणवृत्तिमिव तद्विरदमादर्शयन्तं श्रवणपल्लवमस्योपल(?)यम् (?) । उद्धृत्य प्रहरणान्युत्क्षिप्य च गजकर्णपञ्जरस्पृष्टमेव शल्यै [1] .... तोमरशरीरारूढिताम्रोल्लनसेवनीतां(?) विकटकण्ठरज्जूकर्षक्लिष्टपृष्ठकमिभरुधिरकुङ्कुमरसच्छटाच्छुरितोभयभुजमाश्चर्यायुषं राजसूनुमेनं [2] .... क्षिप्तचक्षुरक्षतशरीरतामस्योपलक्ष्य कर्मण एव वैचित्र्यं चिन्तयन् तामुपेत्य वरवर्णिनीमवादिषम् । भद्रे ! समाश्वसिहि [3] .... देवानां प्रियः कोऽस्य दुष्कृतिनौ पितरौ ययोरयमीदृशोऽपि शोकापनुदः शोका [4] .... मृगपतिकुमारकस्येव करिकुम्भस्थलदळनपातिनो बाल्यादस्फुटवः निवेशस्खलितभ्रष्टस्य(?) यदृच्छया श्रवणपञ्जररो [5] .... स्यखिल [6] .... ते मयासौ योषिदुष्णं दीर्घञ्च निःश्वस्योदश्रुणा मुखेन दैन्यमिव क्षरन्ती प्राणदायिनमिह भगवन्तं मुक्त्वा कोऽन्यः श्रोतुमर्हतीति बहुमान(तिगृहि ? निगृही) [7] .... वेदना शनैरवादीत् । आर्य ! [8] .... श्रवणपथमागता एव नूनमृद्धिमन्तः प्रयतां द्रोहदेहिनो(?) **विदेहाः** । तेषामधिपतिरवतंस इव जनकवंशस्य देवः **प्रहारवर्मा** नाम । सोऽयमासागरवसुन्धरैकवल्लभस्य **मगधानां** परिवृढस्य देवस्य **राजहंसस्य** दृढमसाधारणप्रेमपात्रं मित्रमासीत् । तदन्तःपुरललामभूता च जन्मभूमिर्गुणानां देवी **वसुमती** नामास्य प्रियायां(त् ?) **प्रियंवदायामा**तिमात्रप्रायजीवितेव द्वितीये(?) स्नेहवत्यभूत् । आपन्नसत्त्वां च तां सखीस्नेहात् दिदृक्षुर्देवी प्रियंवदा भर्त्रा सह मगधानयासीत् । अस्मिन्नेव चान्तरे **मानसारेण** नाम राज्ञा(ळवीं ?

1. L. about 12 letters.
2. " 20 "
3. " 32 "
4. " 44 "
5, 6. The two lacunæ cover about 36 letters
7. L. about 4 letters.
8. " 2 "

माळवेन) देवस्य मगधराजस्य गङ्गायमुनयोस्सङ्गमे तारकामयसमाम(न्द?)मति-महदमराणामपि रोमहर्षसञ्जननं जन्यमजनि । तत्रायं जनकराजः प्रहारवर्मा रश्मिरिव महसामसह्यप्रता(पं ? पः) कृत्वा सहस्रशः क्षत्रियाणामन्तमनन्तरं प्रियसखेन सिंहवर्मनाम्ना (व ? अ)ङ्गेश्वरेण साकमेकरथे(नेवा ? नैव)मृत इवात्यन्ततल्पमविशयानस्तेन राज्ञा म(ा)ग(धमा ? धेना)हवाव(वा ? पौ)ह्यत । स तु देवः क्षत्रजीवितध्वान्तशस्त्रपशुकुक्षिर्विपक्षहृदयुक्तेन केनापि दिव्यकृपाणेन खबाणश्रेणिचूर्णितेन रगलक्ष्मीदष्टिवृद्धिपिष्टातकरेणुनिकरेण (व्राप ? चाव)चूर्णिताङ्ग(स्त्व ? स्त)थासीद्यथा सदक्षिणस्थलस्य रथ्यस्य जनकस्य गात्राणां लगोपिकानां देवप्रत्यभिज्ञानवर्तिनीम् (?) । इमाञ्च वार्तामपास्तमकुटकुण्डलप्रलम्बहारादिभूषणः स्वयमुपेत्य माळवेन्द्रः सहाङ्गराजाय षट्स्वामिने स्वजनवदश्रूणि विमुञ्चन्नश्रावयदस्तम्भयच्च कथं कथमप्यनेकविधैर्वीरधर्माख्यानैः । अहर्निशं च स्वयमधिष्ठाय निजभिषक्प्रयुक्तैर्भेषजैः क्षतान्यरोपयत् । आत्मना च स देवः स एव निर्व्याजपौरुषो जितवान्, अहं तु दैवशरणः पराजित एव किं ममानेन क्लीबस्येति सर्वक्षत्रमध्ये शस्त्रं परित्यक्तवान् । ईदृश्या तु तत्र साधौ प्रतिरूपया प्रतिपत्त्या प्रकृतः प्रहारवर्मा प्रियसुहृत् प्रवासेऽपि प्राणान् न पर्यत्यजत् । प्रव्रज्योदन्तस्तु प्रबुद्धैर्नापुत्राणामयज्वनां च पानपत्स्य(?)मस्तीति सन्तानोत्पादने प्रयत्नम(गृ ? ग्रा)ह्यत । प्राप्तोपस्नामेकस्मिन्नेव गर्भो(?) माद्रेयसमौ देव्यां प्रियंवदायाम् । प्रीयमाणस्तु माळवेन्द्रो विश्वजितं नाम सर्ववेदसं यज्ञमाहृत्य तस्मिन् समाप्ते मगधेन्द्रवि(म)र्दलब्धं भद्रवाहनं नाम स्तैर्दत्तोत्तमाभिः सत्क्रियाभिः परिगृह्य(?) सहैव सिंहवर्मणा स्वदेशगमनाय जनकराजमन्वजानात् । अयं च राजा नगर्यां निर्गतक्रमेणाङ्गानागत्य सुहृत्प्रेम्णा कतिपयान्यहान्युषित्वा चम्पायामुच्चलितो-

ऽवन्मेपातमुखाद् दत्तैर्ज्येष्ठभ्रातुः संहारवर्मणः पुत्रैर्विक्रमवर्मप्रभृतिभिः रवष्टब्धान् विदेहानुपलभ्य(मान ?)मागधमाळवसमितिशान्तसर्वबलोऽपि रोषादभिषेणयन्नमात्यैर्न्यषिध्यत ।

स्वस्रीयन्तु सुहृन्नाथं प्रत्यन्तदमनायादशा(?) विन्ध्यपार्श्वसन्निकृष्टं श्रुत्वा ततो बलैकदेशेनात्मानमावार्य प्रत्यमित्रं जिगमिषुरवक्र इत्यध्वनानेनागणितकिरातचक्रः परिक्रान्तवान् । न च ज्ञायते कस्यामवस्थायां वर्तत इति । मम तु मन्दभाग्याया माता (मो?मा)तेव (शर्म ? सम्म)ता महिष्या राजसूनोर्भर्मने नियुक्ता ....[1] क(म ?)नीयांसमप्यग्रहीत् । अथाहमनतिक्षोभसुलभाया शिबिरकयैव न मूह्यमानमुल्लायन्त्यप्रापाविशं यस्त्वयमवचूलचामर ....[2] धारणयुवा ममात्रिमाक्रमिममनेन च मद्दर्शनस्फुरितरागेण वेगोपश्लेषितद्वीपेन किमपि कम(?) ....[3] ।

..................[4] ज्वरायानिवोच्चरितः कश्चिदच्छे निर्मलपयसि काननसुलभं कन्दमूलं प्राश्य परिणमति पतङ्गमण्डले नोणवेष्विव निष्पतत्सु निशीथिनीविहार ....[5] स्नुहिदलाररिपुटक(?)मार्यागृहा(यां वि ? त्रि)र्गतायां देवकुलिकायां तस्करवद(न ? नु)पदमलक्ष्यमाणः केनाप्यनुप्रविश्य बहु चिन्तयन्नुपाविशम् । अथैनमरुणमाल्यानुलेपनमुरणपोतकमिव पीतपयसमायसपाश्व निष्ठुरेण बाहुनैकेनोपगृह्यापरेण तदनुद्धौतान्धार्यां रचयन्न(य ?)सिधेनुकां विकोशामा(शा ?)काशदेशमुच्छ्रमाषकाशिश्यामतमे तमसि महिषस्कन्धकाषः(?) करतलस्फुरित(शा ? श)स्त्रिकाप्रकाशितः स्वरेण मे सुज्ञातः स एव जीर्णव्याधः

---

1. L about 30 letters.
2. „ 30 „
3. „ 44 „
4. 4 Folios are missing here.
5. L about 20 letters

सर्वग्रामाभ्यनुज्ञातो निर्भयविस्रब्धमभ्यागतः प्रदक्षिणं भ्रमित्वा प्रणिपत्य भगवतीं निपात्य निर्दयममुष्य दीर्घायुषो (देहं ?) देह(र ? म)वन्यामयमसौ तव विन्ध्यवासिनि ! वनचरकुलदेवते देवि ते नवन(पनि ? वनी)तकोमलो बालबलिरिति वासनावशाद् विचकर्तिषुः क्षुल्लकामुदयच्छत् । अहं तु दिव्यानु(वों ? भा)व(द?)दर्शनाय सावष्टम्भगम्भीरीकृतस्त्रीस्वरानुविद्धां च काकुं भावयन् गच्छ गतभयः हतं पापमिति ब्रुवन्नेवैनमक्षताङ्गमाक्षिपम् । असावप्यवसितप्रयोजनः पृष्ठमनवलोकयमानः प्रहृष्टरूपः प्राधावत् ।

अहमप्यात्मनस्तद्ग्रामीणैर्दर्शनं परिजिहीर्षुरस्य हेतोः (त्व ? स्तु)त्वा शुम्भसूदि(नि ? नीं) निष्क्रान्तस्तयैव यामवत्या महान्तमध्वानमत्यलङ्घयम् । अर्पयितुं च ते प्रजापालाय प्रजामिमां कृतमतिरुपस्थितः । यथायं वर्धते विनयमभ्युपैति पित्रोश्च प्रमदमन्ते सम्पादयिष्यति सर्वमिदं सर्वभूतैकबान्धवो भवानेव ज्ञास्यसीति विरराम ।

तत(स्त)मृ(ष्टि ? षि)मध्वक्लिष्टं कीलालस्रोतसी(वि ? व) चक्षुषोरतिविकासिनि प्रभाजले मज्जयन् जातप्रीतिः पृथिवीपतिः प्रणिजगाद । भगवन् ! पश्याम्यायुषः सति शेषे मृत्युकुक्षावविक्षे [1] .... त्रभाजमपि पश्य दुर्घटघटनक्रीडापटोः कृतान्तस्यानुभावम् । यत्तथोत्कृष्टधियः प्रियसखस्य नः प्रमत्तवद(न ? ट)वीपथावतरणमारण्यकैरत्यासादनं तत्रैतस्य राजदा [2] .... दस्रपञ्जरादमुना व्याधवृद्धेनोद्धरणम्, उपायनीकरणं, विन्ध्यसेनया चास्मदर्प(ण)मितरस्य हेतिकृच्छ्रादुत्थितस्य व्याघ्र [3] .... मृत्यु-

1. L about 5 letters
2. „ „ 9 „
3. L. about 4 letters

[1] .... करुणाकुलगृहेण शेमुषीबलादाकर्षणम्, उभाभ्याञ्च दारकाभ्यां तथा दूरविश्लिष्टाभ्यां पुनरिहैकत्र पित्रोरेवं मौ हस्तागमनमिति स्वप्नेऽपि कः (उमां सपत्नीसमभाव ? इमां सम्पत्तिं संभाव) [2] .... शुभूयमानैश्वर्यवृत्तान्तेन सख्युर्मे रत्नोद्भवस्य गुरुपुत्रयोरपि सत्यशर्मकालपालयोः प्रवृत्तिमाशंस इति प्रसङ्गेन प्रवृत्तवाचं भर्तारमन्तिकस्था जननी राजवाहनस्यापृच्छत् । आर्यपुत्र ! क इमेऽद्यापि नाम्ना विदितास्तवैवमाशंसनीयदर्शनाः । नूनमत्यासन्नबन्धवो गुणवन्तश्च भवितुमर्ह(न्ती)ति ।

आह(स्र ? स्म) च महीपतिः । आम वासु प्रसन्नस्ते तर्कः । प्रियाश्च गुणिनश्च ते न चासीत् सम्भवस्त(ल ? व) ज्ञातुमनूढायामेव खल्वत्रभवत्यां वृत्तो यश्चित्ररूपो वृत्तान्तः । कौ(तिकीति ? तुकिनी) चेदाकर्ण्यताम् । अस्य खलु मे जनयितुरखिलभूतभावनस्य मदनाजितो नयनभूता(स्या ? स्र)यो बभूवुर्मतिशर्मा धर्मपालः पद्मोद्भव इत्यमात्या(दि ?) दीप्ततेजसः । तेषामाद्यः शुचिरनूचानः प्रथितकीर्तिराहर्ता (तत्र ? क्रतू)नामसङ्ग्रहरुचिः प्रजानां पितेव सुशासिताङ्गिरसश्च गोत्रेणासीत् । इतरस्तु वैश्वामित्रो मैत्रिनिधिरनुद्धतो घृणावान् धीरधिषणः क्रियासु दक्षो लक्ष्मीं प्रत्यनुत्सुको यशसि गृध्नुर्यथार्थनामा धर्मपालो नाम । अपरस्य विस्तारिणी कथा । यस्स वि(स्मित ? व)स्वतस्सुतः स्थाणवेयो मनुः तस्य क्षवथोः क्षत्रमूलमिक्ष्वाकुरासीत् । अनुजस्तस्य नाभा(दे ? नेदि)ष्ठः स दिष्टबलात् कामचारः कचरंशमंशवे माणिभद्रस्य भद्रभावमद्रिसमुद्रद्वीपाटलिपुटभेदादिष्वभिनवा सरागमत्युदारव्यवहारमग्रे प्रावर्तय तस्य बहुं महात्मा मयार्जुनेषु मन्द्रतन्द्रो भलन्दनो भालन्दनायनेषु प्रवृत्तेषु पिवीतिषु स्वर्यावार्ता-

1. L. about 10 letters
2. L. about 6 letters

प्रजीविनां कीर्तिस्थितिः पोतपो नामासीत्(?)। स कदाचिदनुगङ्गरचितपट्टन-स्थली भारिपतरि तपोबलमा(सो ? सा)ऽनेकशतजीविते अस्यामरण्यभूमौ ....[1] रतेषु ....[2] नन्दराज्यमनुभव(न् ? न्तं) चन्द्रगुप्तमुद्धावयितारं मौर्यवंशस्योपस्थित-वान् । उपायनानि चोपनीय कृतोपचारः स्थितः परं प्रीतेन हृष्टः स्वभाण्ड-राशौ ....[3] देकावलीं च काञ्चिच्छतसहस्रमूल्येत्यदर्शयत् । मूल्यनिर्देशे परिभूताया बाष्पधाराभिरिव यस्या गभस्तिमालाभिराप्लाव्यत भवनान्तरम् । रत्नातिशयविस्मितोऽपि दारा गुरोः कौटल्यस्यानुज्ञ ....[4] काल्यमागम्य-तामिति वणिजं व्यसर्जयत् । स तु राजप्रसादलब्धं सुरभिताम्बूलं निर्गत्य नृपालयादुपयुञ्जानो वसुभिरप्यगुरुकरेण पदेनागृह्यत(?) । अपतच्च पथि पतङ्ग-वासैरिवाहतः । कृत्यक्लीबेषु च परिजनेषु कापि रूपाजीवा राजकुलाय प्रस्थिता कृपालुरे(वमेनंपतितं ? नमेवंगतं) स्वगृहमासन्नं निनाय । स्वकरपल्ल-वाकीर्णैश्च सान्द्रैश्चन्दनज(न ?)लबिन्दुभिर्मन्दमन्दस्पर्शिना च मणितालवृन्द-मारुतेन परिहृतैश्च भवनदीर्घिकाकमलकह्लारदलपुटैः प्राणानस्य प्रत्याजहार । मृदुनि च शयने समुच्छ्वसितं शाययाम्बभूव । पोतपस्तु प्राणोपकारिण्यै तस्यै प्रत्युपक्रियामपरामपश्यन्नपत्रपिष्णुः प्रकाशदाने शयनपर्यन्त एव तामेकावलीं निधाय विश्रान्तो गृहाण्यगाद् । विस्मृतेति तु मत्वकाशिस्या तया तां प्रेष्याहस्ते प्रेषितां तदनुरूपैरपरैर्प्यलङ्कारैरनुगतां शपथपूर्वं प्रतिप्राहिणोत् । आमुक्तवती च तामविशद(श ? ग)ना राजभवनम् । उत्पन्नप्रत्यभिज्ञो राजा तदागमं तस्याः समुपलभ्य (मा ? म)न्युस्पृष्टः (ता ? त)माहूय भवनयात्रिकं दर्शयैकावलीमित्यवादीत् ।

1. L. about 22 letters.
2. „ 3 „
3. L. about 8 letters.
4 „ 8 „

देव ! कुतोऽसौ प्रीतिदायः । प्रसीद, (स)न्ति मे रत्नान्तराणि, (विः य)चेषु जिघांसत [illegible] जात(गो ? को)प-श्चन्द्रगुप्तो यद् माम(न)नुमान्य मर्यादानुवर्तिना त्वया (प्री)तिदाया धन(म)देन दत्तस्तदसि (वि ? व)न्ध्य इत्यभर्त्सयत् । असम्भ्रान्त एव पोतपो-ऽतिसत्त्वतया स्मयमान इव प्रत्युवाच । राजन्नल्पमिदं प्राणदाय(प्र?प्री)तिदाय-मस्य वरो ममैवातिदाहो(?) यस्तत्पुनर्दत्तासङ्कीर्तनं सतां धर्मस्ततो(नु?न) कीर्त-यामीति । वि(स्मृ?स्मि)तनृपतिनिर्बद्धस्त्वभ्यधत्त । देव ! श्रूयताम् । एकदाहं महो-दधौ दये ....[1] पत्यन्धकच्छोत्तीर्णः कनकशृङ्खलानियमितकक्ष्यावर्गवस्त्रं कटी-घटितमहारत्नकोक्षेय(को ? कं) गाढोत्स(ङ्गी ? ङ्गि)तहस्तसा(रो ? रं) महेन्द्रगह्वरे ....[2] षमाधिक्लिष्टमष्टदंष्ट्रमुद्बन्धमुक्त .... श्वसितावशेषमद्राक्षम् । द्रागिवैनं जात-कृपः कृपाणेन विपा(ट्य ? श्य) (मि ? वि)श्रमय्य चोद्वेगहेतुमप्राक्षम् । उक्तश्च महात्मना तेन मन्निर्बन्धान्मरणमुत्सवो दारिद्र्यज्वरग्रस्तानामिति । ज्ञा(तो)-दन्तेन च मया निजोत्सङ्गान्निकृष्य वज्रमुक्तापद्मरागमरकतानामने(क)शत-सहस्रवसूना(म)र्धेनासौ शपथपूर्वं समं विभक्तो (मलदन ? भालन्दन)कुलसम्भूतं पोतपना(म ? मानं) मां मत्त एवोपलभ्य स(ज्जू इ ? जूरिव) सम्परिष्वज्य यथेप्सितं देशमगमत् । अहं पुनर्द्रमिलपत्तनं गत्वा ततःप्रभृत्यनेकयात्रा-सिद्धिसम्भृतार्थराशि(कं ह ? कः) त्वामुपातिष्ठम् । इदं तु सङ्कीर्तनमहापातकं त्वद्भयात् समाचरितं न तु श्लाघयेति । श्रुत्वैवातिहृष्टो जातलज्जश्चन्द्र-गुप्तः पोतपं परिष्वज्य स(त्पु ? पु)रुषोऽ(य ? ह)मित्यकथयत् । आत्मनिर्वि-शेषया च प्रतिपत्त्या तत्सङ्गतं कृतवदनुवर्तत । सर्वस्यामेव (वो ? चो)ऽर्यां

1. L about 2 letters
2. „ 3 „
3. L. about 3 letters.

सर्व(पा ? व)णिग्भ्यस्तदर्थमष्टादशवराना(मि?दि)देश । तद्यथा गृहीतर्वा सर्वसार्थ-सा्म्यप्रति [illegible] पुरस्य वा ।साद्धदशान्तगतार्थोस्वाम्यं सर्वत्र स्वयं स्वार्थदर्शनेष्वदण्ड्यता कालाकालयोः करणसिद्धिः स्वयमागतं गताभोगेष्वनभिग्रहः परगृहप्रवशोऽपि वा दिवा क्रयविक्रयार्थपारदारिक-चोरमामनुरिक्तायामपि सर्वस्वं स्वदेशाभ्यामिव विरहोनतिसुरभिरवयवैर्वा-तीयामप्यार्तौ हस्तशीर्षविकारसंज्ञामात्रेणाप्यन्ततः प्रेष्यासु बाह्याबलास्वपि चावतीर्णस्य सौकुल्यं तथा प्रेष्ठापराधे वा सर्वापराधेषु च राजपुरुषैर्वेह-द्रव्यानन्तिलङ्घनपुत्रस्य गोप्यापुत्रस्य वा पुत्रवदुपमानमरुष्यते च पुत्रवद्विसर्जन-मश्वयानं पत्तनेषु [1] .... त्यङ्गवधवर्जं च धूर्तकर्मकानीमहप्रकाराराजनिवेद-नोत्तरकालदुष्टवारणाकानुशिष्टिः प्रवराभरणभाजनादिपरिबर्हजातं पीतश्वेतमङ्गार-शङ्खदुन्दुभि [2] .... राजचिह्नानि मङ्गल्यासु क्रियासु परोक्षापरोक्षयोः पथिषु पत्तनेषु वा प्रेष्यभृतकानामिष्टितोऽनुजीव्य क्रियामृतधनस्य श्रेणीप्राण्येन-दायादप्रतिप [3] .... सर्वसांयात्रिकोपक्रियाश्लाघ्यजन्मा पोतपस्तपासि मतिं ससन्ततिरुत्कण्ठमानश्चकार(?) । सर्वस्वञ्च दातुमारेभे ।

तदवस्थं च तमेकदा कोऽपि विप्रच्छद्मा गुह्यक [4] .... चेतसा देवेन द्रविणेश्वरेण प्रेषितोऽस्मि । श्रूयतामिदम् । अद्य खलु कालपर्यया-दपास्तराज्ययशा बृहद्रथा(न्तरा ?)त्म(नो?जो) **रिपुञ्जयः** पतिरस्य **कुसुमपुरस्य** विधिमपि तपसा जिगीषुः [5] .... कृष्णाजिनी जलपवित्री कलिकन्दर्प-दर्पम(न्दी ? न्थी) च भूत्वा तपोवने तपस्यति । तस्मिंश्च तदवस्थे **विशालायाः**

1. L. about 5 letters.
2. „ 6 „
3. „ 24 „
4. L about 16 letters
5. „ 8 „

पतिर्वीतिहोत्रं हत्वा (म ? भ)र्तारमर्थलोभात् पुत्रमात्मनः **प्रद्योत**मभ्यषेचयत्(?) । यः स षोडशसहस्रान्तःपुरः पुष्पारामविभ्रमभ्रमरचण्ड इति दण्डरौक्ष्याद-रक्ष्यत प्रजाभिः । यस्य च सा दुहिता सकललोकसुन्दरीसर्गसम्भा(ग ? र)-योग्यसौ(म्य ? भा)ग्या **वत्सराज**वक्षःस्थलकमलवासलक्ष्मी**र्वासवदत्ता** । तस्मिंश्च त्रयोविंशतेः शरदामन्ते संत्यक्तवति मर्त्यलोकमब्दानष्टाविंशतिकं तदात्मजं प्रजा **पालक**मलञ्चकार । ततः पञ्चाशतं **विशाखयूपः** । पश्चादेकविंशतिं **माल्यकः** । पुनस्त्रिंशत**मन्तिवर्धनः** । तं च पुनः पूतिकान्वयं निरस्य सूनुं वारणस्यामध्यास्य स्वयं गिरिव्रज(मा?म)रिव्रजा(सह्य ?)सह्यसत्त्वश्चत्वारिंशत्तिसमाः क्षमामिमां समानसेवी **शिशुनाभः**, षट्त्रिंशतं **शैशुनाभिः** काकवर्णः, **क्षेमवर्मा** षड्विंशतिं, चत्वारिंशतं **क्ष(त्रोजातः ? तौजाः), बिम्बसारो**ऽष्टत्रिंशतं, सप्तत्रिंशत-**मजातशत्रुः**, पञ्चविंशतिं **द(र्श)कः**, त्रयस्त्रिंशत**मुदायी**, त्रिचत्वारिंशतं **नन्दिवर्धनः**, तावदेव नान्दिवर्धनो **महानन्दि**स्तदन्वयश्रियं बुभुजे ।

भुञ्जाने च तस्मिन्निह नगरे रसभावसमृद्धमृद्धिरम्यं महानाटकनृत्तं प्रावर्तत । प्रैक्षेतां च तद् यदृच्छागतौ रसान्मनु(ष्यकृत्यया ? ष्याकृती) दत्त-सान्निधी निधी शङ्खपद्मौ । पद्मस्तयोरबध्यत विदित्वा महाप्रभावेण केनापि मन्त्रवादिना मन्त्रपाशैः । अमुच्यत प्रतिज्ञातया प्रतिदिशं पुरा-दायोजनाज्जसुबन्धनाभ्यां चन्द्रावृष्ट्या प्रष्टा च(?) । तथा च तप्यमानस्तनुशेषं प्रतिसञ्जिहीर्षुरमुष्मादव नरदेवान्नन्दो **महापद्म** इत्यवरवर्णिन्यां वर-वर्णिन्यामजायतासौ निधिः । स च सर्वक्षत्रियाणामायुषैव सह सञ्जहार हेमजातम् ।

तस्मिन्नेव च काले **कलापिना(मा)** द्विजातिरुत्कलेष्वनपत्यः कात्यायनीप्रसादात् **कात्यायनीं** नाम काम्याकारां कन्यकामवाप्याग्निहोत्र-**परिचर्यायां** न्ययुङ्क्त । कृ(त्वा ? ता) चासौ दे(वान ? वेना)सितवर्त्मनैवा-न्तर्व(र्ति ? त्नी) । (विचि ? पि)त्रा तु मुह्यता त्य(क्ता ? क्ता) विन्ध्याटव्यां

दैवामर्षेण दावं (वि)विक्षुः साक्षाद्भूयाग्निदेवेन गोदावरीनिवासायादिश्यत । जगाम चासौ तमग्रहारं महाग्रकारिकाश्वपुरस्सर इव प्रविश्य वैश्वानरान्तवर्तीत्वमात्मत्रत्याद्विजन्मसमानभागिनीह(?) भुवनभूषणं वररुचिं नाम सुतमसूत ।

पञ्चवर्षदेशीये च वररुचौ तद्गृहमुपजग्मतुरुभौ परिव्राजकौ । एकस्तयोर्व्यालिरित(रो रुद्रदत्तः ? र इन्द्रदत्तः) । तयोस्तु [1] कात्यायनीम् । भगवति ! सावधानमाकर्ण्यताम् । अहं परान्तकस्य भार्गवस्य भानुभर्तस्य ना(म्न ? म) पुत्रः । मामेकपुत्र इति मात्रा ला(भ्य ? ल्य)मानं मिगृ(ह्या ? ह्य ना)ध्यापितवान् पिता । परिणीय च ब्राह्मणीं ब्रह्मदां नाम कामोन्मादिनीं पादरञ्जनेन (बा ? ला)लयति मस्करी कोऽपि भिक्षार्थं प्रविष्टो मनागस्म(प ? य)त । स्मयमानयैव तयोत्थाय प्रणम्य तस्मै भिक्षा दत्ता । सा तु कौतुकान्मया स्मितहेतुं पृष्टा प्रष्टव्यपक्षे तमेव मुनिम(धि ?)क्षिपत् । तत्तु ह्रीवशादशक्यमिति सैव निर्ब(न्धा ? द्धा) कृच्छ्रादभ्यधत्त । मू(ष्टिता ? षिका)हं मुनिनामुना (बन्धि ? वर्धि)ता तीर्थयात्रोन्मुखस्यास्य मात्रा भाण्डं वारितापि विरहविह्वलत्वादज्ञातं प्रविष्टा दृष्टा च तौ [2].... शिष्य स्नानायारब्धे तिर्यक्कापलोदिरिति शिरश्श्येनमुखे निपत्य पुनरसम्पल्वने पयसि भागीरथ्याः (?) । तेन च तीर्थमरणेन तया च भगवद्भक्त्या जातमुत्तमं [3]........ र्थ्यश्च भर्तृवाल्लभ्यमस्यामेवमनुपश्यतो मुनेः स्मितमजनिष्ट । ममापि जन्मान्तरं स्मरन्त्याः इत्येवं ध्रुवं सत्यं तस्या निर्याणक्रमो यदसौ

1. The trend of the story is broken. See Kathasara, p. 28.
2. L about 14 letters.
3 " 20 "

जातमूर्छया मदय [1]... स्तु मे संमोहं भगवानथ निनीषुः त(त्का ? त्क)लेवरमनुप्रविश्य धर्मोपदेशै(र्वे ? र्वि)रञ्जयन्मां प्रव्रज्यां चाग्राहयत् । अनिर्गमात् पुनरक्षराणामास्यादपास्य शास्त्रविस्तर [2]........ ते च तस्मिन्नुन्मनाः क्वचित् परिव्राजकसमाजे नैकशास्त्राणां सव्यसनिनी(?) मूढयोगीत्युपहास्यमानः स्वामिगृहमुद्वेगादुपेत्य धारामधारयम् । आदिष्टश्च स्वामिना श्रुतधरमादायोपव(र्ष) भज(स्वे)ति । सोऽयमसुन्दैकसन्ध्य(?)श्चिरेणाद्य दृष्टः । यथा चास्या(दि ? भि)गमस्तदित एव श्रूयतामिति द्वितीयन्निरदिक्षत ।

सोऽप्याचचक्षे । काम्पिल्यनाम्नि नगरे गुरोर्गोपालकस्येन्द्रदत्तो नामाहमासं शिष्यः । तस्य विरूपेति विपरीतनामधेया कन्या । तां च गुरुश्चतुर्भिर्वेदैरङ्गैश्च षड्भिर्विनानुपलभ्यामकल्पयत् । सा तु (त ? म)द्रूपोत्पन्नमदनरागा मदन्येन किल परिणये मरणाय स्थिता । अ(स्यो ? स्या)श्चासिताक्ष्या यौवनमयातया(मि ? मं) निर्वि(व ? वि)क्षुः स्वामिगृहे सुब्रह्मण्यं ब्रह्मविद्याहेतोरभ्यधारयम् । आज्ञप्तं च देवेनैनमेतत्सखं पुरस्कृत्य बोधायनपार्श्वमगमत् अनन्भावी चायमर्थः(?) । भाजनं च दिव्याध्ययनस्यैष दीर्घायुः । अतो विसृज्येतरप्रमदासुलभं स्नेहकातरत्वमिदमस्मासु पुरुषरत्नं निक्षिप्यताम् । कृते चार्थे हस्त एव ते प्रत्यर्पयिष्याम इति । सा तु प्रागेवै(व ? न)मर्थं भगवताग्निना प्रतिबोध्य स्थापिता प्रियतनयविरहविह्वलत्वात् परं विषण्णा मुनिप्रयत्नेनात्मना चोत्पादितसमाधिः कथंकथम(प्य)भ्युपागमत् । कृतोपनयनं च तं स्कन्धेनादाय तावुभौ विदर्भेषु कुटुम्बिनं प्र(ति स्थाने ? तस्थाते)। पृ(ष्ठ ? ष्टे) चोपवर्षगृहे प्रहसता महाजनेन त्वसौ भद्वर्षभग्नभवनबहिर्भित्तिभावदत्तपटलकः प्रतिश्रयो यथोद्गतगुरोरुपवर्षस्य(?) । चित्रमिदं तेनापि कश्चिदर्थीति निर्दिष्टेन वर्त्मनोपेत्य तत्

1. L. about 16 letters.
2. " 12 "

तृणशरणमुपाध्यायः केति पृष्टयाचार्या(ण्या ? न्या) च सरुदितमुपहास इत्युपक्रुश्यमाने सोऽसासक्तहलयुगयोक्त्रः क्षेत्रादुपावर्ततोपवर्षः । प्रत्यभिवादेनानुगृह्याभिवादितवतस्तान् स विद्वान् वत्साः कतमो वः श्रुतधर इति पप्रच्छ । निर्दिष्टे च वररुचौ परं तुतोष । विश्रान्तश्च स तैर्विविक्त एनानभाषत । नगरेऽस्मिन् वर्षोपव(र्षिम्मामि ? र्षावि)ति द्वौ भट्टपुत्रौ । वर्षस्तयोः कृतमतिः । इतरो नातृण्याकर्णः । कदाचिदसौ ज्येष्ठभार्ययान्यजन्मन्यपि मा भूवं मूर्खजायेति मूर्खस्य कस्यचित् कशिपुदानपारणीये मूर्खव्रते निमन्त्रितो भुक्त्वाध्वावनमहतवस्त्रमतुष्टिमान् (?) स्वभार्यया रुदत्या बहुकदर्थितो लज्जापहृतः स्वामिगृहे प्रिय(स्य ? ङ्गु)प्त्वा या(वान् ? वत्)पाकमुपावसन् पक्केषु हव्यं देवाय द(मो ? त्वो)पयुयुक्षमाणः केनापि गोवृषभेण भक्षितं त(त्) सस्यमद्राक्षीत् । भूयश्चायमेव क्रमो द्विरावर्तत । तावदस्य लुप्त(स्य ? धृ)ते(स्तुष्टा ? स्तष्ट्वा) टङ्केन रसनामुदस्तस्तुतावास्ये स्वास्येन किमपि देवः प्रक्षिप्तवान् । आज्ञप्तवांश्च न तावदलब्ध एकसन्धे ब्रह्मोद्गारः कार्य इति । सोऽहमुपवर्षः । लब्धश्चायं ब्रह्मदारभरगः(?) किमन्यदारभ्यतामिति । क्रमात् प्रणुत्य दिव्यमव्ययमुञ्जमालकृपणैवेकेन(?) कात्यायनो द्वाभ्यां व्यालिस्त्रिभिरिन्द्रद(त्तः) कृत्स्नं वाङ्मयमध्यगीषत । स तैः समाज्ञापितो गुरुदक्षिणार्थं विज्ञापितो दुहितृदानहेतोरणीयसीं सुवर्णमात्रामाहृतामियेष । (तिःनिः)सुवर्णतया तु सर्वस्याः पृथिव्याः पृथिवीश्वरं महापद्मं सर्वे एव समुपतस्थुः । अपूजयच्चैनानन्यांश्च श्रुतमहिम्नो (महा ?)महापद्मः । तेष्वेवाह — स्वदुहितरं सदस्यवस्थाप्य लवमात्रमपि हेमं ददत एषा दत्तेति । राज्ञा व्याहृते कोऽपि वटुर्जवेन गत्वा कयाचित् कनकमात्रया प्रत्यागत्य कन्यामयाचत ।

(ह ? पृ)ष्टश्च तदाग(तं ? तिं) नृपायाचष्ट कन्यालोभान्मया निर्ब(न्ध ? द्ध)या मात्रा चिरं रुदित्वाभिहितम् । उन्मत्त किं न जानासि निधिदर्शी

निरुक्तो नृपेण तत्रैव ते पिता प्रियान् प्राणानत्यजत् । ततः करणमात्रस्यापि काञ्चनस्य कः सम्भव इति । प्राणत्यागभीषितया पितुश्चिताभस्मानि प्रगाहय लब्धोऽयं हिरण्यशकल इति श्रुत्वैव नि(स्सपत्नीकृत्वा ? स्सुवर्णीकृता) क्षितिर्मयेति हर्षमूर्च्छयोपक्रान्तासुरासी(त्) । व्याळिशिक्षितयोगस्त्विन्द्रदत्तस्तच्छरीरं प्रविश्य स एव राजा प्रकृतिसे[1] .... गुर्वर्थं सुवर्णकोटिं कात्यायनं प्रत्यग्राहयत् । अनुमितपरमार्थकेनार्यकाख्येन प्रजोपकारहेतोः कल्पितस्वकायस्तेनैव वररुचिमुखेन मन्त्रिवर्गेणाधिष्ठित[2] .... स्थाय तेष्वेव राजान्तःपुरेष्वरमत । विरूपया च स्मरतापक्षपितरूपया यक्षीभूयोपतस्थे । तां तु सुवर्णकोटिं शरपुञ्जप्ररोहाशङ्कितस्वशिष्यो[3] .... तन शिरकपालकन[4] .... प्रयोजनं कोट्येति प्रत्याख्याय कृतकोटिशब्दमलभतोपवर्षः । स तथैव द्रविणराशिर्जगाम (गोवर ? कुबे)रम् । उपस्थितं तु पद्मं निधिपतिरनुव्याहृत(वान्) । य(त्) त्वया ब्रह्मर्षेः कात्यायनस्य कामो न सम्पादिता[5] .... न्यायेनार्जितं धनम् । अतस्त्वं भूयोऽप्यमुष्मिन्नेव नगरे समाप्तेषु सर्वोपपा(द:त)केषु पोतपस्य वणिक्पतेः पुत्रः पद्मोद्भवो नाम भूत्वा वनान्निवृत्तस्य राजराजर्षे रिपुञ्जयस्य कृत्वा धर्मसाचिव्यं प्रतिविसृष्टवसुधारः प्राक्पुरेषु भर्त्रैव सह मर्त्यलोकं त्यक्त्वासितस्त्वया चिरमिति ह सुरलोकनिस्पृहेण वस्तव्यम् (?) । एष खल्विदानीमष्टाशीतिमब्दानतीत्य निष्ठिते महापद्मे तत्पुत्रा(व ? न)ष्टावप्यलाभिर्दशभिर्वत्सरैरेकैकमुद्धृत्यार्याकाप्योवापकोपितेन मनस्विना **चाणक्येन मौर्यचन्द्रगुप्तः** प्रतिष्ठापितः तस्यास्य मत्से(?) वत्स्यति चतुर्विंशतिवर्षाणि मौर्ये लक्ष्मीः ।

---

1. L. about 5 letters.
2. „ 12 „
3. „ 2 „
4. L. about 8 letters.
5. „ 2 „

परं पञ्चविंशतिमचिन्त्यबुद्धिसारो बिन्दुसारः कारयिता राज्यम्। पुनरशोकः शोकमुद्धर्ता षट्त्रिंशतं शरदः शरीरिणाम्। (आदेशोनः (?) (सुयशाः) समास्सप्त गोप्ता पृथ्वी(म्)। नव दशरथः। अष्टौ समाः (संयुतः)। शालिशूकस्त्रयोदश। द्वे देवशर्मा। दशधन्वा षट्। बृहद्रथस्तु सप्त। पुनः समुद्धृत्य पुष्यमित्रो नाम शुङ्गस्तस्यैव सेनापतिर्ब्राह्मणायनो भर्तृलक्ष्मीरागदुर्मदुर्मन्त्री वीतभयभञ्जनो ज्वलितमौर्यवंशश्च(?) मूलदेवं युधि निहत्य षट्त्रिंशतिं समाः स्थास्यति क्षितिम्। अथाष्टाव(नि ? ग्नि)मित्रः। विशाखः सप्त। वसुमित्रो दश। द्वे पृथुकः। पुलिन्दस्तिस्रः। तिस्र एव घोषवसुः। एकां वज्रमित्रः। द्वात्रिंशतं महाभोगः। दश देवभूतिः। तं त्वमात्यः काण्वायनो वसुदेवः समुत्साद्य व्य(स)निनमवनिमब्दा(न्ना ? न्नवा)धिष्ठिता। भूमिमित्रश्चतुर्दश। नारायणः सुमित्रो (द्वादश)। दश सुवर्मा। तं च वंशं शुङ्गशे(षिश्चो ? षं चो)च्छिद्य सुमुखो नाम[1] प्रभविष्यति वर्षाणि त्रयोदश। अष्टादश तदवरजः कृष्णः। सातकण्टकिः। अष्टाद(श) लम्बोदरः। द्वादशापि(ल)कः। अष्टादशैव मेघस्वातिः। (शात) स्वातिश्च तावदेव। स्कन्दस्वातिः सप्त। मृगेन्द्रसा(त)कण्ठिस्त्रीणि। कुन्तलसातकण्ठिरष्टौ। (वे ? ए)कं स्वातिसेनः। षट्त्रिंशतं पुलोमापिः। पञ्चविंशतिं गरिकृष्णः, पञ्च हालः, पञ्च मा(न्तेल्ल ? न्तल)कः, एकविंशतिं पुलिन्दसेनः। (एकं) सुन्दरसातकण्ठिः, अष्टाविंशतिं शिवस्वातिः, एकत्रिंशतं गौतमेयः, रुजा (?) पुलोमापिः, अष्टत्रिंशतं शिवश्रीः। चारि(?)-शिवस्कन्दसातकण्ठिः, एकान्नत्रिंशतं यज्ञश्रीः सातकण्ठिः, षट् विजयः, त्रीणि चण्डश्रीसातकण्ठिः, पु(रु ? लो)मापिः सप्त। तदेवं

1. A few words seem to be missing here. See Vishnupurana p. 199, printed at the Sri Venkateswara Steam Press, Bombay.

षट्सु पुटिकेषु दशसु (शि ? शै)शुना(गे ? भे)षु नवसु नन्देषु दशसु मौर्येषु दशस्वेव शुङ्गेषु चतुर्षु काण्वायनेष्वेकान्नत्रिंशति चान्ध्रेषु सातवाहनाख्येष्वतिक्रान्तेषु पुनरुत्पन्नेष्वेवापरेषु तद्भृत्येषु सप्तस्वान्ध्रेष्वाभीरेषु दशसु गर्भिषु सप्तसु शकेष्वष्टादशसु य(व)नेष्वष्टसु (तहारे ? तुरुष्के)षु चतुर्दशसु मु(कु ?)ण्डेषु त्रयोदशसु (पौते ? मौने)षु चैकादशसु बह(ल)कलिकलङ्कक्षाळनाय नारायणप्रसादप्राप्त(स्तानो ? सन्ताने) निवृत्याश्रमान्मगधानधितिष्ठति नृपे रिपुञ्जये तं तव तनयं महानिधिं निधाय पद्मोद्भवं भविष्यसि भगवतो (वर्त ? वित्त)भर्तुः पार्श्ववर्ती। सोऽयमायुष्करो मरकतमणिरङ्गुलीयकनिबद्धो (धा)र्यः। कार्यश्चास्य वारिणि विसर्गो विसृष्णा क्षेत्रमिति*।

(मति)शर्मधर्मपालपद्मोद्भवास्त्रयस्ते श्वशुरस्य मन्त्रिणः। तेषु मां परिदाय जातमात्रं तातः प्रात्रा(जि ? जीत्)। ततश्च पद्मोद्भवः कुलधर्मानुपालनाय रत्नोद्भवं नाम ज्येष्ठमात्मजं वाणिज्ये नियुज्यापरौ सुताविमौ सुश्रुतसुमन्त्रौ सखित्वे मे समर्प्य समाप्य कर्माणि पारलौकिकानि प्रायासंन्यस्तभृत्यग्रामः स्वदैवतं ध्यात्वा समग्रीबभूव(?)। मतिशर्मा च सुमतिमेनमन्यं च पुत्रं सत्यशर्माणं मम सहायौ सम्पाद्य चिरोपासनासम्प्रीतेन जातवेदसेव महता दाहज्वरेणोपगृह्य स्वर्गमारोप्यत। अपरस्तु(तो ?) धर्मपालः सुतेनामुना सुमित्रेणान्यैश्च म ....[1] रकैरमैव मा सम्बद्धयन्न मम मन्त्रशक्त्यैव च क्षुभितं राजमण्डलमशप्युदरन्नेषु(?) चास्मासु न्यस्य भारमुपसन्नया ज्येष्ठपत्न्या सहोज्झितानि रत्यर्थं ....[2] तायां कनीयस्यामन्तर्वत्न्यां ....[3] सा धर्मपालपत्नी सापि सुतमसूत कामपालम्।

* It appears that a portion of the text is missing here, for in the Kathasara the birth of a son to Potavan and other allied matters are described following the description of the conversation between Potavan and Yaksha.

1. L. about 2 letters.
2. " 2 "
3. L. about 4 letters

सोऽसौ सुन्दरसुभटस्थूललक्षो दक्षिणः प्रकृत्या कृतविद्योऽपि दैवात् कामविद्याजैषु(?) व्यस[1] .... सङ्गवानभूत् । निर्भर्त्सितश्चामुना पितृवद् वर्तमानेन भ्रात्रा सुमित्रेण त्रपया त्याजितस्वदेशो दीर्घदुःख(भावितया!) भागितया ममाद्यापि वार्ताऽपि नोपलभ्यत इत्यास्रायमाणचक्षुषि ब्रुवत्येव तस्मिन् कोऽपि वैखानसकुमारकः कुमारमे(नं ? कं) तामरसवर्णं बिभ्राणस्तमेव देशमाजगाम । प्रत्युत्थानप्रणामादिना सम्भावितश्च दम्पतिभ्यां सुखनिषण्णः प्रणिजगाद— जानात्येव मां महाराजो वामदेवस्य भगवतोऽन्तेवासिनामन्यतमं **सोमशर्माणम्** । अयमहमासेव्य दक्षिणापथे रामतीर्थं निवर्तमानो व(र्ति ? र्त)न्यामनुकलिङ्गं तुङ्गदारुणि महत्यरण्ये रमणीयं किमपि शङ्करायतनं निवार्य तदुपर्यायाघ(?) पुष्पैर्मे पुष्पभाजनं पूरयित्वा तरुतले निधाय स्नानाय नवघनतोयधाराप्यायितं कमप्यद्रिनिर्झरमुपस्युपाश्लिष्टवान् । अश्रौषं च कश्चिदिहा(निमातर्दे ? श्निमान् दे)शो भगवतोपलब्ध इत्यारसितम् । अद्राक्षं तदनुसा(द ?)रदत्तदृष्टिरमुना दारकेण हस्तवर्तिना कामप्यार्तरूपां स्त्रियम् । तस्यां च दयमानोऽहमब्रवम् । समाश्वसिहि मातः । अस्त्यरणिद्रव्यमुत्पाद्याग्निं दास्यामि[2] । एषापि त्वदनुरोधात् संहृत्यार्थमात्रमावेदयामि । **कालयवनद्वीपवासिनः कालगुप्तश्रेणीमुख्यस्यास्म्यहं** दुहितृधर्षनी । तस्यास्तु कन्यकायाः प्रथमयौवने पुरुषद्वेषमुत्पन्नं प्रतिचिकीर्षुभिरस्माभिरुद्याने कश्चिदुपासितासीदार्या । तत्र सा किमपि दिनदृष्टं दृष्ट्वा मुहुरमुह्यत्, उत्थिता च (क्रि ? प्रि)य समुद्रदत्त क्वासीति । सर्वं च जनमपास्य पृष्टा मया कथंकथमप्यभाषत । साहमत्रैव द्वीपे **कृष्णगुप्तनाम्नो** दरिद्रवणिजः सुता **सुव्रता** नामासम् । अथ तातो (भि)त्त्य(स्त ?.)न्तरितायां शृण्वत्यामेव मयि केना-

1. L about 8 letters
2. Seems few lines are missing after this.

(भ्यु ? प्यु)पगह्वरे समाभाष्यत । सोऽहमुज्जयिन्यां (स ?)**समुद्रदत्तो** नाम सार्थवाहपुत्रः । तस्य मे दसत्कान्तकर्दकाष्ठापतेन(?) कर्णीपुत्रेण **मूलदेवेन** सख्यमासीत् । आसीच्च वि(विध ? धि)वशादमुष्य सङ्गहे **मदनसेनायां** नाम गणिकादारिकायामप्रतिसंहार्यो मनःप्रसङ्गः । सिद्धश्चायम(र्थैः ? र्थः) । क्रुद्धेनास्मि तेनैवमभिहितः पापस्या(मि?पि) ते मित्रशब्दप्रसादात् क्षेमं (मे?) जीवितस्य । यदि त्वाहरिष्यसि कुलल[1] .... न्त न स्या(दीनि ? दिति) । तद्भयादकृतदारः सन्ततिमि(च्छोद्भी ? च्छुर्भी)रुश्च स गूढं निर्वेष्टुमिच्छामि त्वद्दत्तां दुहितरम् । (मे ? ए)ष वो हिरण्यस्कन्ध इति(!) । दत्तां च पित्रा छन्नमेव मञ्जूषायां निक्षिप्य सारभाण्डमित्युत्तीय स्वगृहमन्तः स(ज्ञने ? ज्जिते) सर्वोपकरणवत्यप्रकाशमेव न्यस्य व्यवहृतवान् । अथैकदाहमन्यत्रा(न्येदैव ? न्य)पुरुषेण कृताञ्जलि(मु ? नो)पस्थीयमानमात्मानमभ्यजानाम् । किमिदमित्यसौ (द ? पृ)ष्टः प्राब्रवीत्— भद्रे ! सोऽस्मि कर्णीपुत्रः । समुद्र(प ?)दत्ते ममाप(क)र्तरि प्रतिज्ञातं तद्दाराभिमर्शनं मया । त्वां चापसर्पैर(त्र)छन्नवर्तिनीं परिछिद्य कृतसुरुङ्गस्त्वद्गृहमगाम् । दृष्ट्वा च त्वामसाध्यां साध्वीलक्षणैः कयाचिद् व्यामोह्य मन्त्रदेवतया वशवर्तिनीमकरवम् । अपहृत्य चात्र वैदेशिकवणिक्च्छद्मनः सदारस्याक्षधूर्तस्य कन्यां नाम कृत्वा सर्वपौरप्रत्यक्षमग्रहीषम् । सार्थवाहावस्थानक[2] .... यथास्थानमेवास्थापयम् । अदर्शयं च तस्मै सुहृत्समक्षं प्रतिसंहृतो नाम भूत्वा पश्य ते सखीमिति । शङ्कितश्च स गत्वा स्वगृह एव यथापुरस्थानमपश्यन्तमेवं व्यामोह्यात्मनैव पुनरवरुद्धव्यवहाराय तेनान्वयुज्ये जितश्चासौ विभाव्यमविवाहमसाक्षिकोद्वाहो विहितप्रतिदण्डश्च भूयः स्वगृहमेव गमिता[3] .... जातनुत्माय[4] ....र्थं प्रत्या[5] ....यस्त्वयि सुरुङ्गां प्रविश्य राजपुरुषेभ्यो

1. Space for 3 letters left blank.
2. L about 4 letters
3, 4, 5. The three lacunæ cover about 20 letters.

दर्शितायां परदारचोर इति स्वत्महरणपूर्वं देशमत्याज्य(ता ?)त(?)। त्वं तु मया परामृष्टं ज्ञात्वात्मानं (न) जीविष्यसीत्यधर्म ....[1] त्वा मर्तुकामा निपत्य गङ्गाम्भसि स्रोतसो(तस्यो ?)ह्यमाना केनापि तीरमुदतार्थे। स मे भर्ता समुद्रदत्तो जातः। तस्य च दर्शनाद् भूय एव मरणमभिलषन्ती व्रीळया निगृह्य तेनाभिहिता। समाश्वसिहि भद्रे! जानामि जालि(को ? के) न त्वा किमप्यावेशिताम्। अन्यथा कथमात्मशीलमुत्क्रम्य तथातिनृशंसमाचरेः। प्राप्तासि प्राणमिदानीम्। पुरा तु त्वदनवाप्तिपीडया ग्रीवाबद्धवालुका(प ? घ)टो (ऽ?) निपत्यापगायां घटे काष्ठभग्ने कथञ्चित् कच्छामिच्छयापि दैवौघेनोत्तारितोऽपि मर्तुमेव स्थितः(?)। तदेहि गच्छा(म ? व) इति। अहं तु सत्रपा यदि मा दा(स्व ? स्य)मेवाचरन्तीमिच्छस्यवस्थितास्मि त्वदादेश इत्यनुमान्य(त ?) तदनुगता मदाभरणमूल्यवर्धितार्थराशिनात्रैव कालयवनद्वीपे ज्ञातिकुलमानीतासम्। अत्र च(त् ?) प्रयत्नारो(चि ? पि)तगृ(हि)णीशब्दा तदत्ययश्रवणेनैव त्यजितासुरत्रेदानीमुद्भवमुदीर्णपुरुषद्रोहा यतिमप्यस्पष्टया(?) तदुत्कण्ठयैव वर्तमाना पुनरिह तदुपभुक्तमुक्तमुपवनमुपनिध्याय प्रत्यभिज्ञातपूर्वजातिर्जीवितं जहामीति ब्रुवाणैव मूर्च्छया मदुत्सङ्गमगमत्। आर्तासु चाक्रन्दन्तीष्वस्मासु तरुणः कोऽपि वनलतागृहान्निर्विशङ्कमात्मजा(या)(म ? मे)वोपसृत्य नळिनीपर्णसम्पुटधृतैर्दीर्घिकाम्बुभिर्नयनपङ्कजपुटावर्जितैश्चाश्रुभिस्तदङ्गानि म्लायन्मृणाळकोमलानि कमलिनीकमलमीनम(र ? राल)लाञ्छितोदरेण पाणिना परिमृशन्नसिञ्चत्। उच्चतापस्पर्शामृतपानरागिणेव(?) रोमाङ्कुरनि(क)रेणोन्मिषन्ती नूतनवर्षह्लादितेव धर्मकन्दळी दळदञ्चितपक्ष्मसम्पुटविवरमन्दमन्दनिश्चरन्मधुरदृष्टिः देवकुमारकल्पं युवानमद्राक्षीत्। उत्पन्नहर्षसाध्वसाञ्च तां समाश्वासयन्नसावब्रवीत् — अयि! वरतनु! विसृज विह्वलताम्। अयमहं समुद्रदत्तो यस्यासि

1. L about 20 letters

उत्तानशयो यः कलप्रवावीर्यौ कुधावत्साश्रमहरिणपोतकाय आषाढी मोखलीरश्चेदानीं विदितवेदितव्यो वर्तसे सर्वावर्तस्थः सम एवासि स्नेहमपास्य निर्विवेकस्य स्त्रीहृदयस्य [1]....... नेदानीमभिहृतममृतमिवाभ्यवहार्यं प्रवासे त्वा प्रीणयिष्यति [2]... चिन्तयति सत्यप्येव श्रुत्वापि तथा तसवचोभिः प्रवासः प्रवासमिवासुभिस्त्वमग्रजविरहमविषह्यं विषह्यदत्त [3]....... यस्याः स्फुटन्तं पुटपाकमिव शोकशापवत्यकस्मादङ्ग [4]..... तो त्वया च त्वत्सुहृद्भिश्च परस्परसुखबलात्काराकृष्टपीतौ तदनुवृत्तद्रावितहृदयानापकारपयोधराणि दृश्यपि [5]....... सानमभ्युदनुजाने पुनर्दर्शनाश [6]....... बलानां चासूनां न कथञ्चन खण्डनीया मनोरथा इति पर्यश्रुणा मुखेन पादयोः पिपतिषन्तीं मातरमतिसमग्रं गृहीतहस्तद्वयो यन्त्रित इव किञ्चिदं [7]....... स्तोयव [8]....... व्याजहार(?) । किं फलमम्ब ! वैक्लव्यमेष धर्मः प्राकृतप्रकादानां यदेवंविधेषु वैधुर्यमाया खलु धैर्यमेवावकाशेऽपि शोकस्याश्रयति, स्मर पृथा सा प्रस्थितेष्वपि वन [9]....... योदश समाः समाधिमास्थायास्थितारातिनगराय, अलमत्राप्य(त्य ?)पायशङ्कया वयस्यवर्गपरिवृतस्य हि मम सेयमुद्यानविहारवर्णपुष्पोद्भवानाम पितरो मातरश्च कियति कियति [10].... स्ववर्तन्तमा [11]....... कथयतामवो मुहुरस्याभिरागमितास्तदग्रे सर्वक्रतानामद्विष्या भव पत्नीरपारावचरापारपातिनो

1. Space for 12 letters left blank
2. L. about 2 letters.
3. Space for 12 letters left blank.
4. L. about 4 letters.
5, Space for 12 letters left blank.
6, L. about 4 letters.
7, Space for 8 letters left blank.
8. L about 4 letters.
9. Space for 14 letters left blank.
10. L. about 2 letters.
11. Space for 8 letters left blank.

गुरुजनस्य(?) । यस्य ममाग्रगश्छन्नहंसापनीतः तस्यापि (कि)ल दर्शनोत्सवश्चरतोऽस्म ....[1] तया यद्येतदेवमेनमर्थमभिसन्धायसि प्रवसतोऽस्मान् भगवत्पादाराधनसुखं ऋषिपुत्रकुशास्त्रगोष्ठीविनोदितस्तातस्य च तव च पादशुश्रूषारसस्तातसुतामात्यादीनां दिवानिशमुपदेशाम्.....[2], नाव्याघ्रदमनयोरसकृदालोक(ले ? ने) प्रीतिरिति कतिपयदिनदुर्लभायमानमपि नैतत्सर्वमुत्सुकयति । अस्मद्वियोगौत्सुक्यप्रतिक्रियार्थं चोपास्थित एवैष सिंहदमन इति .....[3] मन्यत्र सपुत्रदारोऽध्यगच्छद् व्याघ्रदमनः । सोऽब्रवीच्च । देवपादपङ्कजयुगळमृते न मातरं पितरमन्यमन्यं वा बन्धुमपरं वा दैवतमनुजानाति जन्मनः प्रभृति सिंहदमनः । तस्यैव च पादवनादनुग्रहाज्जलवृत्ति तिविसर्गनिष्कलङ्को जलधर इव धवलीभूतः सोसवनादिष्टेऽपि यत्र यत्र भवदीया पतीति पादपद्ममात्रे तत्र प्रथमसन्निहिता सिंहदमनमधुकरोपवारणीयो यदि तपोवनपरिपालनाय यदुक्तमस्त्येव कश्चित् कन्दमूलकखननकण्टके ....[4] विनतिक(ति ?)मिष्यतीत्यनवसितवचन एव भर्तरि संरब्धेव किञ्चिदभ्यधत्त विन्ध्यसेना(?) । कच यातमद्य देवस्य दशकुलकुटुम्बपक्षपातित्वं कच ....[5] तावद्यमनुग्राह्यपक्षं देवस्य दैवह ....[6] केन जितमजान्यवृत्तिभिः पुष्करैरित्युदश्रुमुखीं मातरमुवाच सिंहदमनः । किमम्ब रोदिषि ....[7] स्तमनुपतन्ति चास्वामिनमर्थानर्थं चिन्ताविक्लबा खलु तिर्यग्धर्माणि नो जातिरात्र(?) ....[8] भोरग्रगमनायेति क्षुभितेषु च तेषु लज्जास्पृष्ट इव किञ्चित् क्षणं तूष्णीं

1. Space for 12 letters left blank.
2. „ 8 „
3 „ 12 „
4. L. about 13 letters.
5. L. about 20 letters
6. Space for 6 letters left blank,
7. L. about 16 letters.
8. Space for 7 letters left blank.

स्थित्वा प्रीतिस्निग्धेन चक्षुषा क्षाळयन्निव सिंहदमनस्याननं प्रण(य)कोपकालुष्यमाललाप देवो राजवाहनः । सखे ! मा स्म त्विदमन्यथा श्रुतं (रु ? कु)तश्चिद ....[1] च चित्रां कथां कथयन्ति वृद्धाः त्रिकाद्यसहत(?) पितामहेन मे चण्डकृष्णः । तस्य सूनुरपर इव कालः कालदण्डनामा मालवेषु चण्डवर्माणमाश्रित्य तदनुजानामेकादशानामुग्रबलमुग्रवर्माणमटवीमर्दनाय लब्धवायनिर्गमिव ......[2] ति न हि बुभूषवो द्विषोऽवजानते तच्चेदरिबलमुपनंस्यति उपनतयायुधस्पर्शतयानुगुरुपानामोकस्यै तातव्याघ्रदमनस्योपरिभवो भविष्यति(?) । स्थितेषु चास्मास्वीदृशेऽर्थे यदि वृद्धा व्याप्रियन्ते किमेभिर्लोहस्तम्भदीर्घस्तम्बै(र्बाहु ?)र्बाहुभिः बलिनो धन्वि(नेना?नो)ऽप्र(म)त्ताः सत्त्ववन्तश्च न सन्त्येवान्यभूमौ प्रायशो भवादृशाः । त्वयि स्थिते निश्शङ्कं शक्यते गन्तुम् । गतस्यापि न मे सुहृद्गणभुजवज्रपञ्जरगतस्याशिवाशङ्का तदप्रियेऽपि मद्वचस्यधिस्व पुनस्त्वमेव मा ....[3] वां चानुनेष्यसीत्यनुत्तरं तमकरोत् । एवं तैस्तैः प्राप्तकालैरालापैः पूर्वमर्थं प्रतिशय्य शर्वर्यां सर्व एव शयनमन्वतिष्ठन् ।

अपरेद्यु(रान्वि ? रुन्मि)षति मत्तपीनचीरण्डिग ....[4] कलत्विषि त्रं च ....[5] क्रवालचामलत्विषि(?) ध्वान्तदुर्विलासमुषि कुमुदवनप्रभासद्रोहिणीरदोत्थितमुक्तपङ्कजव्याकृतमुखपीतकोमलोष्माणि मौमौत्सुकचक्रवाकपूक ....[6] षि भुवनभूषणे पूषाणि पुरुषसिंहः पुरोहितस्तम्बेरमरोहिणीविषाणकोणावर्जिताभिराज्यबिन्दुचन्द्रकिणीभिः क्षौद्रवेशलाञ्छिताभिरद्भिरभ्युक्षितमौलिर्थ ....[7] समुपस्थाय

1. Space for 5 letters left blank
2. „ 5 „
3. L. about 2 letters.
4. „ 4 „
5. Space for 4 letters left blank
6. L. about 6 letters.
7. „ „ „

देवं सवितारमभ्यर्च्य भगवन्तं भामापातिमितराश्च परिवसित्वा देवता जप्त्वा बहूनि जप्याभिहुतमतिसमाहितेनाथर्वणोऽनुपद्रुताभिराज्याहुतिभि(?) ...[1] ज्वालमिव प्रदक्षिणावर्तितशिखाकलापजटिलाग्नं धूमोद्गारितयैव सूचितसुकृतपाकं राज्यचिह्नसन्तर्पणायेव हयगजध्वजातपत्राकृतिं दर्शयन्तमविस्फुलिङ्गजर्जरमवदात ....[2] र्णं हिरण्यरेतसमतुलभक्तिः प्रदक्षिणीकृत्य शुक्लमाल्याङ्गरागवासास्सह समानवेषैः सुहृद्भिरिन्दुगभस्तिभङ्गसिद्धमिवामृतसुरभि सौरभेयीक्षीरेणानुभूयमानबहुलमनवगीत ....[3]....... व्यञ्जितमावर्जितरसनेन्द्रियमक्लिष्टशुद्धिकर्णकं पयोऽखण्डपाण्डुसिकतक्षरूपं पररसम(न ?)भ्यवहृत्य पीतधूमवर्तिराचान्तो गृहीतवासताम्बूलोऽभिवन्द्य भगवन्तं वामदेवमन्यानपि तपोधना(ना)श्रमाधिदैवतान्यात्मनश्च गुरुजनमागामिसम्पत्सम्पादिनीराशिषः प्रतिगृह्णन् अप्रतिरथं जपद्भिर्देवरक्षितप्रमतिमित्रगुप्तादिभिः सवयोभिश्च मुनिपुत्रैः परीतः पावयन्निवान्यदुर्नृपोपभोगपांसुलामिळां (भव ? इभ)पतियातलीलाविलम्बिभिः पादकमलन्यासैः स्निग्धगम्भीरपुण्याह(पो ? घो)षनिर्हारिणो निजमन्दिरान्महेन्द्रद्वारेण उपद्वारनिहितरत्नगर्भमिथुनकुम्भपूर्णां नि(र्जि ? र्ग)त्य जायमानसौमनस्यः सौम्यां दिशमभिप्रातिष्ठत(?) ।

अथ प्रस्थितानां च तेषां दक्षिणतः कोऽपि ब्रह्मचारी ब्राह्मणकुमारः कुमुदोत्पलकल्हारहारिणि हरिन्मणिभङ्गवर्णवारिणि सरसि सारसावतंसे हंसपोताय स्वहस्तदत्तवन्यवर्धिताय शिखरस्तप्रपीडितेनाङ्गुष्ठमुखालपातिना बिसक्षीरेणानुतीरविरूढचरपद्मपत्रपुटं तमापूरयन् त्रिभुव(न)वैशव्यशालिन्या शरद्विभूत्या समावर्जमानदृष्टिरियं(?) वसन्ततिलकमुच्चैरुज्जहार —

---

1. L. about 6 letters.
2. ,, ,, ,,
3. ,, 3 ,,

सप्तच्छदस्तबकचामर(धूननोऽयं
जातो मरुद्वन)सितं वियदातपत्रम् ।
हारप्रसादिसरिदम्बुसरोजलीलः
कालोऽयमुद्भवति नन्दितराजहंसः ॥

इति । लब्ध्वेदं पादानिमित्तवृषभं चक्रमविरेपातटखननलग्नरक्तमृ ....[1] रोपविषाणया सहेलमुद्गर्जन्तं सौराज्यारम्भहृद्धर्ममिव जातिधवळनिर्यायवन्दिमङ्गळगीति(रि ? मि)व विजयशंसिनीं वल्गुमञ्जुळविहङ्गमविरुतिमाकर्णयन्तो गव्यूतिमात्रमिव गत्वा समे सद्मे सारपति ......[2] णोदके पुष्पफलसमृद्धसौम्यवृक्षमालिनि वानप्रस्थानां सपत्नीकानां प्रतिश्रये त्रिफलपाणिभिः ......[3] लिकाकुसुमदामभिः पूर्णकलशपाणिभिः पुरस्कृतप्रदीपैरैन्द्रीणामृचां माङ्गल्यानाञ्च साम्नां जैत्राणां च यजुषां पुण्यानां चाथर्वणामुदीरयद्भिः घोषाद् द्विजातिभिः प्रतिगृहीतप्रवेशः प्रीतपेशलाभिस्तापसानां ...[4] नामात्मनश्च सुहृदां विचित्राभिः कथाभिः विनोद्यमानस्तत्र तद्दिनमुवास देवोऽपि राजवाहनः । तस्मिंश्च वासरे सुमतिरि(द्ध ? त्थ)मात्मसुतौ प्रमतिदेवरक्षितावुपह्वरे समनुशशास— वत्सौ राजा नाम जम्भारिजलेशजीविताधिपमनुष्यधर्ममार्ताण्डरोहिणीश्वररोहिदश्वश्वसनानां विश्वजनीनजन्मा सध्रीचीनो मात्रासमूहः । तथा हि स्थाने वर्षति सीमानं रक्षति शासनीयाननुशास्ति स्वानामीष्टे काले तपति तप्तानाह्लादयत्यपकं पावयति कर्मारम्भेषु प्रेरयति । असत्यस्मिन् न समर्येत धर्मो ...[5] वेदा नारभ्येरन् ईश्वरा नाराध्येरन्

---

1. L. about 15 letters.
2. ,, 5 ,,
3. Space for 6 letters left blank.
4. Space for 6 letters left blank.
5. L. about 4 letters.

देवता न प्रीणीयेरन् वर्णा नाद्रियेरन् आश्र(मा ? मो) न वर्तेत चातानपत्यवतीन् परिचरेयुः(?) न भृत्याः स्वामिनोऽनुवर्तेरन् न पुत्राः पितॄन् पे[1]... गुरूनुपासीरन् न करदाः करान् प्रयच्छेयुः, न च कालेनौषधिवनस्पतयः फलेयुः। अस्य हि दण्डभयादखण्डवाहिनी लोकयात्रा। यदयं प्रातरुत्थाय धर्मा[2].... वृत्त्या समः शत्रुपुत्रयोरादानमृणस्य निक्षेपोऽर्थानामस्वामिभिर्विक्रयः (सम्भूय?) सम्भूय समुत्था-नमन[3]... तां व्यतिक्रमः क्रयविक्रययोरनुशयमस्वामिपालयोर्विक्रयः सम्भूययो-रनुशयदस्वामिपालयोर्विवाद(?)[4] .... सुविप्रतिपत्तिर्वाग्दण्डयोः पारुष्य[5] .... स्त्रीपुंसधर्मो दायविभागो द्यूत(स)माह्वानमित्यष्टादशसु विवादपदेषु (शु?)देशदैवादि-भिर्यथाभूतदर्शनादकृतं धर्मानु[6] .... प्रजाः[7] .... तत्प्रत्यनन्तरं पद[8] .... म यत्र वयं वर्तामहे। तेन चानेन मन्त्रिणा त्रयी वार्ता दण्डनीतिरान्वीक्षिकीति चतसृषु विद्यास्वभिविनीतेन समग्रेण सर्वैः प्रजागुणैरनल्प[9] .... भीरुणा स्वभावधीतप्रवादवल्गुवाचिस्तम्भचापलालस्यानां कदाचिदप्यदत्तावकाशेन मैत्रेण शुचिना महोत्साहेन सत्यप्रियेण सत्त्ववता कृच्छ्रेषु प्रत्युत्पन्नबुद्धिना द्व[10].... गेणो वैसयकेण(?) वशिना भर्तुरात्मनश्च धर्मार्थयोः प्र(य)तितव्यम्। अपि चादिष्टायां भूमावनुज्ञयो वश्ये समुदितासनस्थेन प्रश्नानुरूपं प्रियहितप्राय-मश्वीकृताक्षिभ्रुवो धर्ममपि ग्रहो ह[11] .... सम्भाव्यमर्थधर्मानपेतमतिपरि-

1. L. about 10 letters.
2. Space for 28 letters left blank
3. L. about 17 letters.
4. Space for 5 letters left blank
5. L about 10 letters.
6. Space for 4 letters left blank
7. Space for 8 letters left blank
8. L about 5 letters.
9. Space for 8 letters left blank
10. Space for 8 letters left blank
11. ,, ,, ,,

स्फुटं च कार्याणि कथयता सम्यग् वृत्तमनुप्रविश्य प्रोत्साहयता प्रमादेषु मितं[1] प्रतिषेधयता संवादमन्यैर्भेदं वानुपयता द्वेष्यादिभिरसंवर्जिनी .... नन्याभ्यर्थिना सर्वदा सर्वत्र प्रेक्षाकारिणा दैवतवदमाययोपस्थेयः स्वा(मि ? मी) सर्वैश्च गुणैः सम[2] .... गता भावसमुदेतारश्च यूयं यस्तु स दोषः सह-पांसुक्रीडया बालभावाहत्वेन च महेत्वोत्कण्ठादवगृह्य प्रचारबुद्धिरिति तदुभयं भयङ्करमाबयमिव(?)[3] .... ह्यासेवनीयः कुमारः सर्वैश्चायं महा-कुलीनतादिभिरागामिकगुणैः समग्रया चात्मसंपदादितस्वामीत्येवमेव चापरेऽस्या-मात्याः स्वान् सुतान् सन्तोषाद्गुणेषु[4] .... त्रण कथं[5] .... कुमारः प्रथम एव वासरे पितृपरिजनं द्वितीये परिचितान् मुनिपुत्रकान् तृती(ये) संहार्यं व्याघ्रदमनं चतुर्थे सहानुयात्रं सिंहदमनं निवर्तयितुमशकन्मासं चक्र-[6] .... एव पार्श्वजाम्ब[7] .... तभासो हिंगुरुकपुण्डरीकलक्ष्मीमुषः क्षौद्रहरिद्राभङ्गहरितालपत्रांसवर्णाभिरोषधीभिरुदकैश्चाशून्यपर्यन्तान् सहस्रवेधिनो रसांस्ताम्रपीतकांश्च र(सो ? स)धातून् कृसरमुद्गमाषप[8] .... तानप्यपलाशशैवल-निशाहयानवर्धयकृत्प्लीहाभ्यांश्च दर्वीबिन्दुच्युति[9] .... कपान् कनकधातून् पद्मपाटलीस्फटिकपारावतवह्निकण्ठमत्स्यण्डिकाद्यनेकवर्णान् रूप्यधातूनन्यनरेन्द्र-प्रार्थनीयानभिज्ञोऽपि सकौतुकमवलोकमानो धृतिसंस्थिताविकटवंशपाङ्क्तिप्रांशु-

1. Space for 9 letters left blank.
2. L. about 2 letters.
3. ,, 12 ,,
4. ,, 26 ,,
5. Space for 8 letters left blank.
6. Space for 10 letters left blank.
7. ,, 8 ,,
8. ,, 6 ,,
9. L. 1 letter.

रनुवर्तिभिरनोकहैर्मनोज्ञमाधीज्ञानजीवञ्जीवकां कूजत्कोकिलामाघुष्टमुखरकोयष्टिकामागुञ्जद्भृङ्गजालामचलगुहामतिविशालामभितस्तटशिलातलरङ्कितपुष्पलिङ्गया(?) तुङ्गशृङ्गपतनरत्नोद्भिन्नप्रस्तरोच्चलितबिन्दुमालतारकितमूलया शैलकन्दरप्रतिरवोपबृंहितमातङ्गनिर्घोषानिर्झरिण्या परिगृहीतं कमपि सुचिरशून्याभोगमेकस्मिंश्च सिकतिले वनस्पतिमूले प्राङ्मुखमासीनमक्षमालिकागणनया किमपि जपन्तमनेकव्रणकिण(कने?)कर्कशका[1] .... त्तराजिनवाक्षितेक्षणापाङ्गमनस्संस्कारपरुषं नीलकालमूर्धजमुग्रतपश्चरणरूक्षकालवर्णमुन्नतमुखपालितानुमेयद्विजातिभावं कमपि चीरवाससं ददर्श ।

स च दृष्ट्वै[2] .... त्थाय पाद्यमर्घ्यञ्च पद्मपत्रपुटेन स्वागताभिधानोपक्रममुपजहार । फलमूलेन वनसुलभेन स्वादुना निमन्त्रयाञ्चक्रे । तस्य च प्रणयमनुरूपमखण्डयन्तोऽपि[3] ...... भर्तृभावाः सुचिरमैक्षन्त देवरक्षितं विधृताकृतयः कुमाराः । स चैवमूचे— भोस्तपोधन ! सोऽयं प्रभावो यस्तिरश्चो(प ? पि)विस्रंस[4] ...... तां परामुत्पादयति चिरदर्शनमपि नेतरत्र भुज्यते हि क्षणदृष्टोऽपि निर्विशङ्कमार्गद्रुमो नाम ग्रामसीमानिन्योपवीरस्थानं वृक्षस्तथा च दुराधर्षम[5] .... पुमांसमापादयति स्वैरनियोज्यं जगतस्तत्क्रमस्यानुयोगा हि मार्षमार्द्रकौतुकस्य हृदयस्य वपुरिदमद्यापि विप्रजातो जातिशुक्लया यक्षादिसुलभमनुपलब्धपूर्वमस्य(?) चै[6] .... शङ्कचस्याश्चर्यमिव प्रतिसन्धानं तावदवस्थानं च कारणं नाम

1. L about 7 letters.
2. " 10 "
3. " 18 "
4. L about 20 letters.
5. " 11 "
6. " 4 "

यदेव किञ्चिन्निमित्तीकृत्य गत्वराणां विस्मयस्थानमपि च विष(य)भोगप्राग्भागे भरसहेऽस्मिन् वयसि स्मृतिविहितगार्हस्थ्यय[1] .... स्थाय वन इह वानप्रस्थमेकाकी चरन् गुरुणा निर्वेदकारणेनोपतप्तो भवितुमर्हसि । न च तद्विचार्यमाणमनवसानं मरणमगतिः स्फुटं वा कः शरीरपालप्रतीक्षं नरकदुःखं मन्त्रौषधिविद्वेषणम् अनूष्मदाहजपरोक्षरं मलमुपावृत्यमवमानकोशं प्रसारितमधिपस्यमुपचरितनिन्दामन्दिरमूर्च्छितो विषादध्वजः सलम्नं प्राणशल्यं सुनिहितो जुगुप्सानिधिमाकलितमलक्ष्मीहस्तसारमलच्छन्नदैन्यसर्वस्वमखिलदैत्यकरतन्तुतारविस्मृतोपदेशो घोरतमः पापरोगः सकललोककुलीकरणरन्ध्रान्वेषणैकच्छापाकजागरूकं दारिद्र्यं तस्य हि सन्निहितैव प्रतिक्रिया यदिमे विशदविकरणविशदैादुम्बराणां शतवेधिनां सहस्रवेधिनां चात्यन्त एव दृश्यन्ते काञ्चनिकारसानवनीतकपोतगोमेदकवमशुल्यकन्धायक्षौमोमाकुसुमवर्णाश्च ताम्राशीलानैकलोकप्रभागर्भ धावतः(?)। तदेवम(यंनो?यत्नो)पनतेष्वप्युभयलोकसाधनक्षेमेष्वदत्तदृष्टिरर्थेषु कमर्थमभिसन्धाय निष्ठुरेण तपसा कर्श[2] ... त्वा तु स विप्रः प्रत्युवाच— सौम्य सन्तोऽपि सम्पश्यन्ति गरिमाणमपरमार्थं परेषु चित्रमार्याणां भावास्तथा मयि प्रश्नानुग्रहो मुखमप्यपराध्यतात्मानं भवानप्यु[3] .... क्षरेष्वस्मृतस्मृतिवेदेषु अश्रुतयज्ञ(पार्थे?वार्ते)ष्वनाघ्रातधर्मगन्धेष्वप्रसिद्धद्रव्यशुद्धिष्वनवेक्षितभक्ष्याभक्ष्यचिन्तेष्वनवगते[4] ....र्यमात्रपण्डिते(ष्व?षु) काण्डपृष्ठेषु यत्नाधिगतजातिमात्रस्मरणसम्प्रदायेषु वनचरतुल्यवृत्तिषु व्रात्येषु विन्ध्यपार्श्ववासिषु

1. L about 2 letters.
2. " 12 "
3. , 24 "
4. , 20

शबरश्राद्धपिण्डास्वादरसानुसारिभिरिव शाबरैरेव भावैराका(रैर्वध्वः? रैः प)रिगृहीतेषु ब्राह्मणब्रुवेषु जातो मा(तः न ? तङ्गः) कृत्रिमग्रामग्रामणीभूतजरत्किरातनामधारो द्विजोऽस्मि । अहमेकदा कोदण्डपाणिरारण्यकैरमा चरन् परिपथं पान्थमेकं पलित-पाण्डरमात्मप्राणानुरूपयष्टचवष्टम्भसर्पिणं कर्पटान्तःपिनद्धनीवारकणमुष्टिमूटिका-भरपरिक्रान्तमन्दविक्र(मा ? मम)शीतिवर्षदेशीयं द्विजातिमासादयम्। अस्मदीयस्तु कश्चित् तेन दृष्टेन रैपोषं पु(ट ? ष्ट) इव हृष्टो लकुटमुद्यम्याभिहन्तुमभ्यधावत् । आर्तः सविषयानुभयकरनिरुद्धयष्टिशिखरावष्टब्धशिथिलम्बचर्मवक्षास्त्रासोत्तान-तारकत्वात् प्रत्युन्म(न?)ग्नदृष्टिः प्रयत्नोन्नमितमूर्धा निनिहिरिहचीनाङ्गहारवृतजङ्घो विष्टभ्य कथञ्चिदेव पद्भ्यां तिष्ठन् पुत्र मा स्म हन्तुं गृहाणेमं स्वयमुन्मुच्याभिलक्षालग्नं वन्यमुष्टिमिति श्वासच्छिन्नवाग् ब्रुवाण एव निर्दयाभिघातपातितः प्रसभाकृष्यमाण-कर्पटो व्यवेष्टनर(?) जातदयः पुनरवारयम् । अपसर किमनया धान्य . . .[1] त्रकया कर्पटिकया वरजरद्विजान् गृहीतवान् यतः प्रभूतमन्विच्छाम इति । स मां निर्भर्त्स्याभ्यधत्त सत्यं सर्वावस्थमप्यकर्मण्यमेव ब्राह्मण्यं यदयमपि नाम मातङ्गको हस्तो घृणोपहत(?) . . . .[2] भ्रंशयितुमिच्छति । तन्मूले च कलहे (ए)नमन्यां-श्चातता(यीं ? यिन)श्चतुरोऽहमवधिषम् । हतशेषाः पुनरवयवशः सामर्षा विकृत्य मामगमन् । नागामहमभ्रंलिहदुत्ततोरणं है(म)प्राकारमालमुज्ज्वल . . .[3] न्मणिभवन-पङ्क्ति हृश्याहृश्यं दिव्यपुष्पं पुष्पोदकद्वारिनीरविहारचरितपुण्यतारुण्यसुन्दरीवृन्द-मनन्तभोगीयम् (?)। पुनरद(र्शयं?र्शं) च महति सिंहासने निषण्णमेकतो दिव्याकृति-

1. L about 2 letters.
2. „ 5 „
3. „ 8 „

. . . . .[1] पैरुपास्यमानं धर्माधर्मदर्शनमिव कुर्वन्तं भगवन्तं धर्मराजम् । स मां सन्त्रासेन जानुशिरःस्पृष्टभूमिं वेपथुशिथिलाञ्जलियोगं श्लक्ष्णया गिरोत्थाप्य स एष सर्वयातनापार . . . . .[2] कृष्णो (यस्य?यः स) पुरा राजर्षिणा रिपुञ्जयेन यथोक्तं शासितः क्षपितकल्मषाणां राशिः ससान्धिदानिमाशीतिकस्य(?) साधोर्वसन्तयाजिनः शान्तिपालस्यार्थे मुक्तजीवितो मत्समीपमायातवान् ....[3] हार्हो यत्र दुष्कृतिनः कुटुम्बिनः । तानिमान् (धर्म ? पद्म)महापद्मरौरवमहारौरव-सप्ततालकालसूत्रान्धकाराह्वया(मय?न्)महानरकान् विभागेन दर्शयित्वा विसृजैन नित्योग्रमित्युग्रकर्मनित्यो ....[4] चित्रगुप्तवानीत्वाञ्चाहमित्थं चित्रगुप्तेन पात्यै-तान्(?) परिचितं तव निरुपमानं दुःखसम्भारसम्भारमात्मम्भरिणामधीरचेतसां प्रेत्यभावप्रत्याख्यायिनां भगवतो धर्मराजस्य यातनास्थानम् । अत्र हि जहि जहीति जातकु(द्धात् ? धां) किङ्कराणां प्रलयमे(व ? घ)निर्घातवातभैरवैकभर्त्सितेन यान्यशस्त्रपात्यमनानारर्जकाशानां वज्रकुञ्जकमष्टदष्टत्रदग्धादस्थिसाच्छेदनादु-च्छूनेन चूत्कृतेन बन्धनयन्त्रसंवेष्ट्यमानाविग्रहाणामङ्गभङ्गविरावबृंहितेन हाहा-रवेण आमस्तकजघनसन्धब्रह्मसूत्रानुसारपाट्यमानानां पट्टसधाराद्विधाकृतेन, ईक्षणोद्धरणसंरब्धदक्षिणकररक्षःपादावष्टब्धवक्षसां सव्यकरनिकृतमनुवलीकृतगल-घट्टितनिवृत्तेन निर्भज्यमानपरशुकास्थिपञ्जरझरझराशब्दसामान्यनिर्गमेन निष्ट-नितेन शिशिरजलप्रपाप्रनालीयाचनाञ्जलिहरपुलितचलितमस्तकानां पर्यस्तदृष्टि-पातकोपितखरदुरुष्परिघमुद्गरमुसलगुलिक्षेपमुण्डागण्डपिण्डितप्रविसृतेन विक्रन्दि-तेन शुद्धगन्धशालिसिद्धवर्धितकपवमानगन्धाभिद्रवणरुद्धनिर्धारितानां जङ्घा-

1. L. about 7 letters.
2. „ 10 „
3. „ 7 „
4 „ 4 „

जानुभङ्गझटझटारटितपटुतरेण पतनकोलाहलेन, अलीकपाककर्कशाजिह्मजिह्वोद्धरण-
प्रकटकण्ठमार्गनिर्बाधनिर्गमानां रक्षःकटिरुद्धदुष्कृतिहतिसहस्रत्रसिक्षोभक्षुभितानां
प्राणपञ्चमानां निष्पीतध्वनितेन, हस्तदत्तसिकथपिण्डप्रत्याक्षेपरौक्ष्य सन्धुक्षिता-
क्षुद्रक्षुधालुब्धानां ....[1] नमिव च न ....[2] लम्भिताध्वना रु(मि?दि)तध्वाने-
नाप्राणिवैरूप्यदानदर्पिता(नोन्ने?नां नै)कशतवर्षानुबन्धिनां सन्ध्यस्थिकठोरकाषाय-
कुण्ड ....[3] पार्श्वपाणिपादक्षोदनादेन, परिष्व(गे?ङ्ग)गेभयपलायमानपारदारिकानु-
धावतीनां छन्नकळत्राकारदीप्तलोहपुत्रिकाणामुद्घाटितपूर्ववृत्तचित्रकन्दर्पचर्चरविस्ता-
रेण प्रकटीकृतप्रणयकोपप्रसादनप्रक्रमेण मर्मच्छिदा कदर्थिना प्रलपितेन
तप्ताम्रद्रवानुपातदीप्तायोगुलुकफलभक्षितोत्थितानां परमर्मस्पर्शदुर्भाषितपुरुषबहु-
भाष्यभाषिणो मोषाद्वारप्रकारकलतल्पवामपार्श्वशयनविजृम्भितेन वसामेदस्नेहम-
सैकोद्दामधूमळसम्भारगर्भोद्यतेन दीर्घशूत्कृतेन वृकवराहसिंहव्याघ्रवर्मि(ह?)महिष-
कुरुकोष्णिकावलुप्यमानसर्वावयवानां मृगवनविहारसिंहिकानामसह्येनारम्भितेन
वनदहनविसर्गशीलानाम् अनलजालगर्भाशयचिबृत्तिविष्फूर्जितरवेण चारतविविध-
चतुराणां वर्षसहस्रान्धकारकुहरमासदुःखनिस्सहविसृष्टेन विपरतापनपण्डितानां
उच्चोत्सर्पसर्पहरितमज्जनावर्जितनिमज्जितोन्मज्जितानाम् अरुन्धकरणभङ्गलिचविला-
लिखया खजमथनगोरसचोरघोरारञ्जरकलकलेनासितालवनपत्रपात्रोत्कृत्यमान-
चैत्यच्छेदकाङ्क्षच्छिकृतेन धर्मकृततटाकनाशकनरशनभीमतैलिकयन्त्रान्ति-
चित्कृतेन शौचाशौचविचारमशून्यदुर्मानुषममलससरित्तरणास्फावाचालपाल-
शैवालजालजटिलपूगवीचीपूगवेग ....[4] भशब्देन क्षुत्सन्धुक्षितप्रकाचि-

1. L about 20 letters.
2. Space for 8 letters left blank.
3. L. about 18 letters.
4. „ 6 „

भक्ष्यमाणसर्वभक्षकुक्षिद्रव्येन्धनसमवसारवोदुरान्धवदिधक्षुक्षः सहस्रतालपटह-
ध्वानेसनसनस्याद्भशनप्रागृनासक्तसूचीगळ ....[1] रोक्षाभिहन्यमानोदर-
मृदङ्गनिस्वनेन च ब्रह्मस्तम्भसीमस्पृशा भिद्यन्त इव नित्यश्रवणकर्कशान्यस्माकमपि
नाम श्रवणरन्ध्राणि(?) । अपि च प्रतीतान्येव ब्राह्मणवधः सुरापान .....[2]
स्तेयं गुरुतल्पगमनं पतितसंप्रयोग इति पञ्च महापातकानि त(त्रै ? त्र) ब्रह्महणो
(न?)वनकुटीग्रामसीमशून्यगोव्रजवृक्षमूलानामन्य(तम)वासिनो वापितशिरसः शव-
शिरोध्वजा ....[3] शचरितवन्तो भैक्षान्नं गोसवेन स्व(ज्जित?र्जिद)भिजिद्विश्व-
जिद्भिरश्वमे(ध ? धे)न (तृव?त्रिवृ)त्स्तोमेन वा निष्ठु(ते?रेणे)ष्टवन्तो गृ(हवो?हं वा)
सपरिबर्हं धनं वा जीवनक्षमं सर्वमेव वा स्वं विप्राय विदु ...[4] ननाभिभुजः सरस्वत्या
प्रतिस्रोतोनुसारिणो न त्रिरधीतवेदसंहिता नतिचित्रभानौ समिन्धत्यावाचीनशिरसः
पतिताः न विधिवल्लक्षभूताः शस्त्रिणां न गोब्राह्मणकृते विक्रम्य सि ....[5]
बहुप्रकारमोहिता मृता वा न च ब्रह्मक्षत्रसंसदुद्घोषितापार्वा नोऽश्वमेधावभृथ-
स्नाता यान्त्यन्ते तु सर्वयातना हि दुर्मतयः । तथा हि दहनजिह्मणदंश-
जालजजर्जरास्तीक्ष्णोन्मुखरोहकर्णस्थलाक्रष्टिपृष्ठकशेलुरुशार्कराः कर्करकरतलोच्चल-
च्छिलाङ्गारपूर्णवरुग्णदुर्दलितैः मरुमरुद्भिरप्यसहिष्णुभिरेवोष्णमावेगावतीर्य-
माणोष्ममांसतकुलधूलधूलयो निर्वृक्षक्षुपप्रच्छायवार्ता निष्प्रतिक्रियक्षुत्पिपासाश्लेषा-
माकर्णपथात् क्वचित्फुल्लोत्पलकमलकल्हारहारिण्यो वारिदीर्घिका इव प्रतिहायः
पुनरमीषामभिष्यणद्विषणह्यतृष्णाबलप्रधाविताः तामसाविभूतय इवानुपयोग-
क्षमाणारक्षारा दूरोद्वेजनीयाश्च जायन्ते(?) । तासु च नरकपालबलात्कारा-

1. L about 6 letters.
2. „ 4 „
3. „ 4
4. L about 6 letters
5. „ 4 „

वतारिताः कुलिशदशनमीनकोटिलुण्टमानकायाः कतिपयकठोरास्थिशेषाः-गज-
ऌना इव जरठमृणाळभङ्गा रोधसि खरतरङ्गघातैः प्रक्षिप्यन्ते । स्फीतपातक-
ज्वरोपिताश्च गम्भीरेषु करीषगर्तेषु कुम्भीपाकं पच्यन्ते । पाकोत्कर्षोष्ठकोमलाचल-
वंलवंलधुजिह्वैर्विलुप्यन्ते, जन्तुभिरापृष्ठोरःकपाटपाटनपटीयःकण्टका कूटशाल्मलीव
मदश्वदशनकुलिशसन्दंशे लुञ्छितश्रोणीवेशया पेशलप्रभारमारोप्यन्ते
भक्ष्यन्ते भक्ष्याकारैः तरङ्गभङ्गमुखरचञ्चूचिताश्च शुष्कचूषितपक्वजाम्बवबीज-
कल्पैरस्थिशल्कै[1] .... पापैर्बद्धविग्रहा ग्राहसहस्रग्रस्तापर्याप्तदन्तकोलाहल-
मौसलीं मलसरितमवतरन्ति च योजनशतमायतामनलज्वालामालाविलम्बिनीं
कदम्बवन[2] .... जनायतामुग्रग्राहसङ्कुलां कूलङ्कषकलुषपूतिपूयस्रोतसस्व-
भावयोरविरहमवगाहन्ते क्षणविश्रमणीयं च धर्मराजकीर्तनं दशयोजनायामिनं
सदेशकाह्वयं महापदमतीतः सरसि दारुणे चर्ममांससिरास्थिमेदच्छेदटङ्कपङ्के
विंशतियोजनविशाले दंशातिथ्यं ददति(?) । सितकुठारकूटवज्रशृङ्गाः कुलीरा
जलौकसश्च सूचिमुखाः खलानां ततो महारेश्रेण शून्यशरणदायिना शात-
यन्ति कलहशरीरं शिशिरसमीरणस्पर्शपर्यानीतमांसमेदःश्रोणितानि चाङ्गानि
प्रगे गतानामगव्यूतिमात्रं महाकाकपदे काकोञ्चूकमुल्लुञ्छति तेन च
त्रिसन्ध्योप्लुप्यमानमूर्चमूर्च्छयः तत्र नीत्वा किञ्चिदिव कालं तु न्यग्रोध-
दक्षिणेन त्रियोजनायामां त्रिंशद्योजनायामिनीं दशयोजनविस्तृतां विवृतवडवा-
मुखकुहरभूषणामशेषभुवनदुर्विधानव्याधव्यूहवासपल्लीयमपुल्लिमभिलीयन्ते(?) ।
तत्र च ज्वालाहेममालिनो भीमधूमश्यामस्थासकाः स्फुलिङ्गसङ्घातकुङ्कुमरसपङ्क-
बिन्दुसङ्गभङ्गिमन्तो मासमारभटीनटा इव कोटितविकटमानाविकटविप्रवृद्धगात्रा

1. L. about 16 letters.
" 14 "

नृत्यन्ति । पुनः स्ववसामेदोमयीं नदीं शकुनिकामनुसरन्तः शक्नुवन्ति निष्प-
तितुम् । भूयो दशायासार्धमूषापाकं त्रयोदश कुम्भीपाकान् कन्दूपाकान् विंशतिं
विंशतिमेव श्रेणीपाकान् दशोदपानपाकान् दश करीषदत्तपाकान् कपालपाकांश्च
विंशतिं लभन्ते । पुनर[1] .... (ष्वगोऽषु घो)रेषु राक्षसैः पाकदक्षैः शतशूलप्रोताः
पच्यन्ते चोदपानधूमेष्ववधशिरसः, क्वाथ्यन्ते च तीक्ष्णतैलकपालीषु, तप्यन्ते मन्द-
वह्निकाकरीषगर्तेषु । ततस्तरन्ति तप्त[2] ...रुषोदकां (यद?यादो)नदीम् । आरोहन्ति
दशयोजनतुङ्गमेकग्रावाणं गि(री?रि)गृहम् । तत्र विलीयमानत्रपुरसासारधारावर्षिभि-
र्वृष्यन्ते (मी?भी)माशनिभिश्चण्डमे(कै?घैः) । भूयो भृङ्गारकवदनेदंशर[3] ... चैन्नील-
मक्षिकाकुलैरिमा त्रिमासीमासते, तत उत्थाय विविधबन्धक्लिष्टमाक्रोशन्तमा(प्य?स)-
वर्गमालोकन्ते तिला इव तैलमूलकूपे पाद्रीकिललिलयोद्धायाङ्घ्रिभिरिगुरु[4]...हामपार्ष्णि
कुट्टितपति तलभ्रमणबद्धचीत्कृति ज्वरितकर्णमुत्पीड्यन्ते किङ्करैरुत्तरान्ति चोत्तरङ्गाम-
स्थिचूर्णावचूर्णितोपमालामागतरुधिरनिम्नगामाभिश्च कारणाभिरभ्याव्यत्यायात्यमा(!)
[5]..सन्त्यत्र वर्षपूगान् यातनोत्थिताश्च स्थावरीभवन्ति । भूयः कृमिकीटपतङ्गजा-
(ति?दि)दुःखपर्यवसाने मानुष्यकं लभन्ते । तत्रापि दशगर्भव्याधचघदः(!) पुनरुग्र-
क्षुत्पिपासाक्लिष्टमपि योगानिष्ट[6] .... योगविरसमनेकपापरोगपीडापेशलमविरल-
शीतोष्णवर्षवातोपद्रवप्रसरमसह्यदुर्जनावज्ञान(धा?वा)ग्वज्रपातपाटितहृदयमार्यमार्ग
वर्जिता(निन?विष)ह्यानेकदुर्जीविकावलम्बदुःखस्तम्भितदुष्कुडुंबतन्त्रं धारयति प्रा-
णान् । ईदृश्य एव ब्रह्महत्यासमानामसत्येनात्मोत्कर्षणमवनिपालगामिनः पिशुनवादा

1. L. about 4 letters.
2. " " "
3. " 3 "
4. L. about 3 letters
5. " 4 "
6. " 2 "

गुर्वलीकनिर्बन्धाश्चेत्येषामपि यथोदितव्रतानिष्कृतिकलुषाणां व्युष्टयः। तथा तु गुरुप्रतिरम्भणादविज्ञातगर्भ(गा ? शा)तनादात्रेयीवधादग्रजराजन्यवैश्यप्रवि(श)सनादनृतवादात् साक्ष्ये च निक्षेपहरणादङ्गनावधाद् दुःखायन्त एते दुर्मतयः। सुरापाः पुनरेते न तामेवाग्निवर्णां पीतवन्तो न तथा (स ? त)प्तगोमूत्रं गोमयरसं पयो घृतमुदकमेव वा परिपीय प्रवितानज(गा?टा)धरा ध्वजवन्तो बाल(साससं ? वाससः) कणेन पिण्याकेन वा निशि सकृदुपयुक्तेन नीतवन्तो वर्षं ब्रह्म(ह)ण इवोपक्रमन्ते। सुरापकरपाश्च निकृतयः कूटसाक्षिणः सुहृद्घातिनो वेदनिन्दका दुष्टाभक्ष्यभु(ज)श्च दुश्चरितैश्चिरमिहैव जायन्ते। ते चैते सुवर्णतस्करा नरवाजिरजतवज्रमणिमहीमन्दिराश्वजनिषु शल्यमानमकृतवन्तो ब्रह्महत्यानृतं वा अनुपोता उत्पश्य यदनुभवन्ति(?)। गुरुदारान् मित्रदारान् पुत्रदारानन्त्यजाः कुमारीमात्मयो(न्या?नी)श्च ग(त्वात?त्वा) स्वयमुत्कृत्तलिङ्गबीजरञ्जिताञ्जलयो नैर्ऋतीं दिशमाशरीरपातादजिह्म-[1] .... तप्तायोमय[2] ..... नशायिनो मूर्तिमर्चिर्मयीं प्रियामिवाशिथिलमाश्लिष्टवन्तो न चीरवासिनः खट्वाङ्गिनश्च प्रलापप्राया वन्यैर्निर्जने वने वर्षमेकमुषितवन्तो न यवैर्भवि[3] .... मासत्रय[4]. .. श्चान्द्रायणं पशव एते परिपतन्ति घोरासु कारणासु। गोघ्ना इमे न मण्डगोमूत्रेणपायिणो(?) हतगोचर्मसंवृतावयवा (सामा?मासं)यव(य?)म(का?क्षा)रलवणासितमश्नन्तो गोष्ठशायिनः शयानाः प्रस्थितास्तिष्ठन्तीश्चरन्तीः सर्वशक्त्या सौरभेयीः शुश्रूषमाणा मास(तुला ? त्रया)न्ते च वृषभैकादशाभिः (शो?गो)भिराराध्य द्विजानात्मानं पावयितुमैच्छन्त्येव रमणीयानि कर्माणि। तदेवेदं गोहत्याव्रतमपारयन्तश्चरितुं चान्द्रायणं वा। सर्वे पङ्क्तिदूषकाः स्वानुरूपैः कर्मभिरत्र संविभज्यते। त इमेऽव(तिणी?कीर्णि)नो न का(रं?ण)-

1. 2. The two lacunae cover about 12 letters.
3, 4. ,, ,, 44 ,,

गर्द(भोष्ठ?भेष्ट)निर्ऋतयो मरुदिन्द्रबृहस्पतिपावकेभ्यश्चाज्याहुतितर्पितेभ्यो न प्रत्यानीततेजसः त्रिषव(णाय?णोप)स्पर्शिनश्च न गर्दभा(भिज?जि)नवा(मि?सि)नः स्वकर्मकीर्तनोपक्रमं सप्तागाराचरितभै(क्षान् ? क्षाः) कर्तॄणामपि भयङ्करीभवन्ति ताराणाम्(?)। तथा च द्विजरुजाकरणम(स्ते प्रवयप्रा ? घ्रेयघ्रा)तिरङ्गनावत् पुंसि वृषिर्नित्यजिह्मतेति जातिभ्रंशकरेषु सान्तपनप्राजापत्ययोरनाचर(णां ? णाद्) (वा ? खगा)दिवधे च मलिनीकरणनामसु त्र्यहं तप्तयावकानुपयोगादिमे महत्यामापदि परिभ्रमन्ति। सुवृत्तक्षत्रविट्च्छूद्रवधेषु च वृषभोत्तरं सहस्रं शतं दशेत्यशक्त्या गाः प्रदातुं ब्रह्म(ह)व्रतं वाप्येकमब्दं षण्मा(सानती ? सांश्ची)र्णवन्तः तरन्ति तानि तानि। चाषविडालनकुलभेककुररीकाकोलूकगोधावधेषु शूद्रहव्र(तं त्रि)रात्रं वा पयःपानमुपस्पृश्य वा स्रवन्तीषु चाप्सूक्तजपं योजनं वा गतिं कृत्वा, षण्डस्य वधे (समीसमाषं ? सीसकं माषं) पलाल(गा ? भा)रम्, उर(व?ग)स्याभ्रिं कार्ष्णायसीम्, उरणं छागमनड्वाह(मेकहा)यनं रासभस्य क्रव्या(द)मृगाणां धेनुम्, अक्रव्यादानां वत्सतरीं, (कले?क्रमेल)कस्य कृष्णलं, सर्पिष्कुम्भं सूकरस्य, तित्तिरेस्तिलद्रोणं, (किल?कीर)स्य द्विवर्षं वत्सं, क्रौञ्चस्य त्रिवर्षं[1] .... बर्हिभासश्येनवानराणां रोहिणीं, वासो वा(हि?जि)नः, कुञ्जरस्य पञ्च नीलवृषाणीति विप्रेभ्यः पापनिर्णाशाय दत्त्वा कृच्छ्राणि चाचरित्वा। अस्थि(ति?)मतां सहस्रे (शकट?)शकटपूरणक्ष[2] .... तरेषां हते समूहे शूद्रहत्याशुद्धिमननुष्ठाय निष्ठुराणां किङ्कराणामस्त्रहस्ते पतिता बहुच्छलप्रकाराश्च कारवो रज(क)रुक्मकरकर्मारमेत(?)कुलालकुट्टाकप्रमुखाः सर्वे च तन्त्राध्य(क्षा)स्तदन्तेवासिनश्च पशुपालवत्स(ल?)पालासि(न्धार?धाव)क-

1. L. about 7 letters.
2. ,, 3 ,,

दोहकघृतमन्थका द्रोणमायगाढग्राहकघटिकाच्छेदकपेयालमालेयकशलाग्राहका उद्ग्राहकलक्षकाशासकनिर्यामकादर्शनावीरकाः कार्तिकतरुककारतन्त्रचापदेवतट-कौशेयवायकदुकूलवायकाः शौण्डकासविकापयातकरिणान्यकराः कनकधमक ....[1] रकपूतकव्याघातकधातुदर्शका विशिखोत्पथिकशुष्कादायकमायकोमायका इत्य-सङ्ख्येया नृशंसव्यापृतका यथायथमनुभवन्ति स्वदुर्नयानां जनिविशेषतः पुनः पानविक्रयिणो विजितसौम्या बहुरसोऽयं फलासवः पुष्कलोऽयं पुष्पासवः सुरभिरयं सुरासवो मधुरोऽयं मध्वासवः काम्य एष कषायासवः कल्यता-करण एष काशमय्यासवो सुधायुरिमं मूलासवं पिबतां भग्नोऽयं भग्नकुण्ठ-भयो भल्लास्वातकाकुथ्यामितश्रेयः कपित्थशकलिकयादमृतमेनमाहुः स्थूमलक-शकलीय एष राजपेयः कदम्बशकलीयो बलकरोऽयं पुष्पासवः सुरभिनभ्रंबाः पातीयः परिपन्थ्येष सर्वामयानां पलाशभङ्गनिष्कपाटीयः कः क्षमोऽस्य गुणकथने कपित्थभङ्गनिष्कपाटीयस्येति बहु बहु प्रलोभ्य पाप ....[2] पितवन्त [3]........ इह पर्याकुलाः प्रक्वथन्ति का पुष्पाणि(?)। ये पुनरखिल-काळीयविकारकोशकालायसकरण्डकाः क्षत्रशब्दविडम्बका विषयविषग्रासलेश-लोभो ....[4] दूरमोहिता हितैषिभिः कर्णजप्यं मौनमाकर्णयन्तो मन्त्रभूयःप्रबोध-दीर्घनिद्रयाश्लिष्टा घटाभिषेकक्षालितमूर्तयोऽपि जनिताशौचाः शोचनीयभूतयो दारुणपटहघोषोद्वेजितश्रवणा लोकाक्रोशहेतवः प्रबुद्धजननिर्वेददा(लि ? यि)नः प्रतिभयदर्शनाः पृथजागानुगमनोचिताः पुरस्कृतात्मदहनतेजसः कृतकपटाव

1. L. about 2 letters.
2, 3. The two lacunae cover about 12 letters
4. L. about 18 letters.

गुण्ठनाः कठिनकमकरबद्धसङ्कोचितप्रकृतयः प्रतिपन्नचेष्टात्रिषयाः काष्ठाधिरूढ-स्तम्भदूषितकरणाहरणमात्रवृत्तरीतयोऽत्यन्तपरप्रणेयाः पतितमप्यात्मानमपि न जानन्तः परिचितानप्यनवेक्षमाणा दुः(ख)परम्पराधीनमातापितृप्रधानमपि स्वजन-(मा?मना)श्वासयन्तोऽसहन्तो देहिवाचमहमपि त्वत्प्रसादयोग्यः सकृदपि दृष्टिदाने-नानुगृह्यतामयमनन्यशर(णेण?णो) जन(न?) इति पर्यस्तशिखे शिरसि निष्कारण-विरचिताञ्जलेराक्रान्तोऽपि हतकप्रत्याशात् पारोधिनो भृत्यवर्गस्य शृण्वन्तः क्षाम-मलिनवर्णाः कदाचिदप्यनुपजातवृत्त्यावृत्तयोद्वीरस्थानापविद्धविग्रहा विपन्न-सत्त्वयोगा विदाहरूढमिथ्योष्माणस्त्वन्वयधूमकेतवः कतिपयप्रोक्षणावस्थायिनः प्रतापेन प्रज्वलन्तः त्रीनपि स्वानुरागिणीरनुव्रतामरयन्तो(?) विलोमतां गता विघटमानसन्धयो भिद्यमानान्तरङ्गा निरर्गळप्रवृत्ताङ्गजन्मनिस्सारीभूता भूतिमात्रभाविनः प्रत्यासन्नजनाञ्जलिप्रतिग्रहाभिलाषिणः प्ररुदितप्रजादुःखोपहृत-बलिपिण्डलब्धवृत्तयो जीवदवस्थायामप्यनात्मवृत्तयः प्रेतनिर्विशेषाः क्षत्र-बन्धवस्तेऽमी यथोक्तगुणिनो दुःखपूरेष्वपार ....[1] षु महानरकेषु सह सर्वदुष्करकपटोपदेशनिर्घृणैरसङ्ख्येयसमुद्रशङ्खपद्मशङ्कुपर्वनिखर्वन्यर्बुदार्बुदानि सङ्ख्यावच्छिन्नानि सहस्राण्युषित्वा पुनरस्मिन् पद्मनरके जन्म मानुष्यकप्र-[2]........ नतिभिन्नं मन्यन्ते। यमपुरुषाश्चात्र कासवमधुप्रतिश्यायदयकपास्तां मम कनकप्रतामनाद्यश्चापायुजाः पानरोगमुखाश्च पायुमूलामहाः सर्वप्राणिसंहारिणा ज्वरेण ....[3] लोलयन्ति रक्षांसि च दारुणानि च(?)। त्वयाप्येता

1. L. about 5 letters.
2. „ 4 „
3. L about 10 letters

यातनाः सहस्रशोऽनुभूताः तथेदानीमाचर यथेह पुनर्न पतिष्यसीत्यभिहितश्च भीतो हृषितरोमा (हंदयम ? हन्ताया)हमनुगृहीतश्चास्मि यदेवं प्रभवतानुकं [1] .... पुनरहमपदिष्टो नित्योग्र इति भगवता धर्मराजेन तन्मे भगवत्प्रसादादवजिगमिष्यासुलभानुक्रोशदत्ताश्वासं हृदयमित्यञ्जलिमुपरचयतो स(मा ? मे) समभ्यधात् ।

अस्त्येतदभूद् विदर्भो(दत्त?पान्त)वासिनः पुलिन्दानामीश्वरस्य हालभलि(का ?कना)म्नः कोलाहलिकना(म्नः?मा) चौर्यापहृतः सुतः । स जातु सगणः स्वधर्मानुष्ठायी सह वध्वा काञ्चिदार्यविधवामध्वनि प्रत्यरुन्धत् । सा त्वनाथा हा ना(थ!) दीर्घद(र्शी ? र्शिना) देवेन सता कथं न दृश्यते कलत्रमित्थमापद्गतम्। हा पुत्र! (नीत्वो ? नित्यो)ग्र! ईदृशमप्यपत्यं लब्ध्वा किमीदृशी न हीमनुभवनीया(?) हा पुत्रक! महोग्र! मात्रा सह परित्रायस्व भार्यामि(त्रा ? त्या)र्तनादं व्यसृजत् । अनन्तरं च व्याघ्र इव कोऽपि कोपात् प्रज्वलन् अधिज्यधन्वा युवा तज्जनसमूहमभ्यद्रवत् । तं च कोलाहलिकं च रूपतो विवेक्तुमक्षमा मुह्य(न्त इ?न्ती)व क्षणम(ब्दुम् ?भूत्)। पुलिन्दपतिस्तु तां स्त्रियं सपुत्रस्नुषां समाश्वास्य कोऽसौ दीर्घदर्शी नाम कश्च स नित्योग्रः का (स चसिक्तत्थ ? चासि कथ)ञ्चे(दां ?मां) दशामारूढेत्यवशक्लिन्नचेताः सदयमन्वपृच्छत्। सा किमपि प्रस्नुतस्तनी पिब(न्ति?न्ती)व तमतृप्त(त?)या दृशा प्रत्यवोचत्। जात! जा(ले धन?लन्धर)स्य नाम कुण्डिनपतेरुत्तमामात्यः स यथार्थनामा दीर्घदर्शी। तस्य महाभागस्य मामवेहि मन्दभागां गृहिणी(यमार्य ? मू । मय्य)भूतां सुतौ यमौ नित्योग्रो महोग्र इति। आद्यः कश्चिदाजीवकश्रवणस्वतन्त्रोऽयं प्रभुः भाविताविष्टवान् नष्टश्च सो(ष?ऽष्ट)वर्षस्तेष्वहस्सु रक्षादोषादारब्धाक्रन्दानि च

1. L about 5 letters,
2. ,, 2 ,,

निगृह्यैवं बोधितास्मि भर्त्रा भद्रे ! मा स्म नः कृत्स्नं कुलमेकस्य कृते समूलमुत्कृत्तं सन्निवापा पार्थिवस्य ग्राहयितारः पुत्रैश्वर्यमादेशप्रत्ययादाशंसमानस्त्वद्भयादमुं गोपायति नाशनादेनेति(?) । तद्भवेदभावाय महतो नः कुटुम्बस्य तस्य ... [1] महकुलं महोग्रमद्यैव नेतुम् । ततः पातयेम वालौ द्वौ चापि दारकौ कल्याणकृतेन मातामहेन स्नेहान्नीताविति । कृच्छ्राच्च मामभ्युपगमय्यं (तु ? कृ)त्वा चैव स्थितो [2] ... णामयसुन्दरो मत्तहस्ति महस्करो पुरकं दशनमिति(?) सम्भ्रमावेदितस्त्वरया निर्गतस्तं चिरेण ग्राहयित्वोपावृत्तो विमनायमानः शयने मदनुयोगादभाषत। गत इदानीं तमसि मत्तगजविद्रावितानुयात्रः किमप्यगारं भयादुपश्लिष्टो निशीथनिर्भारिणं भित्त्यन्तरितं प्रवाचमश्रौषम् । भद्रे भामिनि! मा मां विलम्बितागमनमन्यथासम्भवविभवं श्रुत्वैतत् सत्येव कारणे रुदिभि(?)नृपतिनाहमद्य रात्रावित्युपह्वरेऽभिहितः जाने त्वा कृतात्मानं मनस्विनं मयि च भक्तिमन्तम्। मातुलस्तु दीर्घदर्शीत्वद्गुणवत् तवैहिनो विवर्धनातिमे त्वयि समीचीं वृत्तिम्(?)। उद्वृत्तश्च स (बाहा?बहू)नपि वञ्चयित्वा पुत्रः किल भविता राजेति तमिदानीं गोपायितुं प्रवृ(त्त)स्स यदि मन्यसे विजहि तस्या(ज्यं?)शा(मु)त्सादयन्नुपां(पा?)शु नित्योग्रम्। अतश्च प्रीतिरुत्तमा वैरिनिर्यातनाच्च धर्मार्थौ च पुष्कलौ स्वाम्यर्थसाधनाद् भवन्तमभ्यावर्तेरन्निति । हृष्ट इव तन्निदेशमाश्रुत्यागतोऽस्मीति । ननु तदनुष्ठेयमेव देवादिष्टमपि निहत्य शीलम्। असुलभा एवार्थं स्वेष्वपि चापहृत्य श्लाघन्त एव सत्पुरुषाः। पीतं हि रुधिरमुष्णं भीमेन भ्रातुर्दुश्शासनस्य। एवंभाषिणीं भार्यां सोद्वेगमवोचदच्युतकः । कितं परिक्षिप्यसे, किमपायमहावशंसि शीलविपर्ययः किं वापि क्षमाचरिता चित्प्रियानुरूपेण मां

1. L. about 10 letters.
2. ,, 20 ,,

मोहयसि(?)। क इवापकर्तारो नाम गु(रवो?रुषु) यत्तत्किल्बिषमयेषु नैकप्राणापहारिषु क्षुद्रेषु धार्तराष्ट्रेषु क्षत्रियेण भीमेनाचरितं तत् किल मातृकल्पे मातुले शुक्ले शुक्लवृत्ते विश्वोपगम्यसम्पदिमभ्यवहितेनेव केनापि हेतुना मयि किञ्चिद्दूरोपक्रमेऽदुष्कुलीने देवोपहत्य लोकद्वयं मा चेष्टितमिति निर्भर्त्सिता च भर्त्रा वेपथुविषमगद्गदं वधूरभाषिष्ट प्रियप्रसर[1] ...... नैव निर्घृणे पापकर्मणि भर्तारं नियोजयेत्, अपि तु हृष्ट इवागतोऽसीति त्वत् निरन्तर्वेपमाना त्वत्क्रोधनाय जिज्ञासार्थं ततोऽनुपन्यस्तविनीत्यपतदस्य पादयोः(?)। प्रविष्टश्चाहं पदस्थानोत्थस्तेनशङ्केन कस्त्वित्यात्तशस्त्रेण तेन पृष्टो वत्स! योऽसावदीर्घदर्शिनो बालस्य ते वृद्धस्यापरपार्श्वपापः त्वामभ्यानुनेतुमायात इति सव्रीळमवादिषम्। अ(न्ध?न्व)नैषदिथो स्वराभिज्ञानाभ्यां? पादयोर्निपत्य। भागिनेयतया मया चैवं बोधितः— ते न जातु कोपनीयाः (सु?क्षि)प्रकोपादुस्सन्तोषं सद्यःपाकानल्पकोपफला दूरपतीत्य भीत्युदर्का राजानः स यथो(क्त)कारीनाम तत्र गत्वा प्रत्यागच्छद् यत्र ते भ्राता प्रत्यागतश्चमत्कारितजनपर्युषितमिव नित्योग्रशिरःपूर्तमयत्रपाय केनचिदप्यनुपलक्षितो नेष्यसि तदियमाप समन्ततो नेर्थाः प्रतिकृतः स्यादिति(?)। प्रतिपन्ने च तेन तमनुयातं निवर्त्य निर्गतो गजमप्यालानयित्वाहमागतोऽस्मि। सर्वथानेन दुर्न्यस्तजीवितमित्यस्मिन् निन्दया च नकपशंसया च कृतोपचितया च जाग्रतोरेव नो विभाता. सा विभावरी। तथैव च तदर्थमहीनकालं निर्वर्त्य कुलधर्मं यशोऽस्मानीश्वरं च स साधुराराधयत्। अविश्वस्तवर्णं च मे भर्ता(र)(म?मा)कारचेष्टितैरवधाय प्रायो (म)स्कृतमनेनाबुद्धमिति बुद्ध्युत्साहप्रभावाजितो भूपती रा(जानो?ज्ञो)ऽसियष्टि-

1. L about 10 letters

मभिज्ञानं दत्त्वा कञ्चित् कञ्चुकिनमन्तरङ्गं विकाले प्रेषितवान्। वेषेण क्षणदाचरक्षमेण सम्प्रत्येवागन्तव्यमस्ति कार्यं तादृशमिति। बात्येव खलु तृण्यामाक्षिपन्ति कृतधियोऽपि मतिमन्तोऽपि[1] .... तायः स महान् मैवमयमर्थो भावीति मद्यमुक्त्वा मान्निषेधनिबद्धोऽपि न विचारयोग्या भृत्यैः पिण्डदानामादेशा इति नीलनिवसनार्धोरुकपरि[2] .... ।

[3]............... साविभ्रमविलम्बितनितम्बिनीनिकायस्तस्य मध्ये तनुतपनीयनिर्मितग्रीवसूत्रैकतरळमाणिकं[4] .... तिलग्नबालातपेव लक्ष्यमाणा वेणीभूतनीलशिखण्डिहारतया मुखजनितचन्द्रसन्देहसन्निहितराहुरिव सम्भाव्यमाना [5]....... र्ध्वभागं संसर्पिभिर्लोचनद्युतिभिरम्बु(ज)वनचुम्बनाशाविभ्रमभ्रमद्भ्रमरसैन्यपुरस्सरेव सलिलमध्यसञ्चारिणी वारिदेवानां तथा हडेनाप्यू[6] .... षदपि मध्ययष्टिकामया मणिरज्वा गुरुपयोधरभा(नु?र)बन्धमुद्वहन्ती पारिहार्यकेयूरप्रभृतिभूषणपरित्यागेत्यनुपगृहीतमरकताङ्गुली[7] .... पाधिकारसन्निहितं घर्मसमयमिव दर्शयन्ती चरणारविन्दलोभेन किं नखमणिकिरणक्षीरधाराभिलाषेण किमारमकुलमञ्जुशिञ्जितो[8] .... गेण न जाने कुतोऽप्यनुबध्नन्तं भवनहंस(को?)पोतक(प्र?)माप्रपदीनशुक्लांशुकदशावलम्बबद्धचरमबधसस्खलं निशशिम(?)[9] .... मव काचिदुत्तमाङ्गना प्रत्यदृश्यत। सा च गत्वा तमेहि

1. L. about 10 letters.
2. „ 26 „
3. 5 Folios are missing here
4. L. about 38 letters
5. „ 26 „
6. L. about 18 letters.
7. „ 16 „
8. „ 18 „
9. „ 16 „

नाथ सनाथीभवत्वयमिदानीमानाथ्यचारनिर्विण्णो जन इत्यञ्जलिमुकुळ-[1]................ तिहशं निर्वर्त्य स्वागतं महाभागाय त्वत्प्रसादादियमस्माकिंनोकि नावैमचुल्लभो(?)[2] .... पलबन्धशाली संवृत्तो मनोरथः । तदनुभवतु महाभागः सम्भव[3] ....त्य क्षरदमृतधारयाभिभाष्य देवं राजवाहनं सह ताभ्यां तमेवाभिव[4] .... प्रेसरकनकवेत्रहस्तकाञ्चुकीयहुङ्कारदू(रीकृत)जनसं[5] ... . न मणिमयेन वर्त्मना नगरमाविवेश । आससाद च विविधमङ्गलविधानव्य[6] .... नागणमङ्गणरणद्वाङ्गतूर्यायमाणगणतिथवार[7] .... रणं भवनम् । तत्रच महति वैदूर्यमण्डपे ससखीजनसम्भ्रा[8] .... योर्वासताम्बूलच[9] ... . पार-दत्तविस्रम्भापराशयोस्तयोः स्वयं च मन्त्रियद्धप्रपन्नहीनविष्टरा(?)[10] .... मपि ध्यात्वा भूयो राजवाहन(वाहन?)मुखे निधाय ह .... रप्राणदक्ष मम बधान दानमभ्यर्थयते त्वत्प्रसादं च वर्धितः प्रणयो यदिदमिन्द्रनीलमणिमयधरणीपृष्ठ-मम्बरतलगोलमूलाभोगाविभ्रमं समालक्ष्य[12] .... त्रामव(?) । यश्च स विक्रमो-द्यतत्रिविक्रमचरणविक्षेपलक्षभूतोऽर्थि(त?)ज(न)प्रणयाखण्डनप्रति(ज्ञो) नमुचिर्नाम दानवेन्द्रस्तस्येदं पुरम् । अनु[13] .... स्य मन्दाकिनी नाम दुहिता । हते पितरि त्रिभुवनविजिगीषुणा कल्पादिमहीवराहसम्पर्करागसम्भूतेन त्रिदशपतिसुन्दरीवृन्द-

1. L. about 20 letters.
2. 4 „
3. 20 „
4. 8 „
5. 18 „
6. 9 „
7. 16 „
8. L. about 26 letters
9. „ 18 „
10. „ 8 „
11. „ 8 „
12. „ 6 „
13. „ 20 „

सान्द्र[1] ...... त्रासोदीर्णश्वासपवनसेवितेन सकलमहासुरेन्द्रवृन्दवन्दिते(न) नरकेणास्मि संवर्धिता । तस्य च दुहितुर्यज्ञवत्या[2] .... ति परं मैत्रमासीत् । आसीच्च पुनरावयोरपि सखी सुन्दोपसुन्दसौभ्रात्रग्रावभेदमदनकुटाकटङ्कधारा शङ्कराननपङ्क[3] .... त्रिदशलोकलोचनभ्रम(र)कदम्बकाहम्पूर्विकावलुप्त-यौवनकुसुमोद्गमा तिलोत्तमा नाम । तिलस्स[4] .... न्दरी यज्ञवती तु मन्मथमनोधिरोहिणि प्रथमसोपानपर्वणि वयसि वर्तमाना मया तिलोत्तमया[5] .... रिसानुकाननानि समनुभूय प्रतिनिवृत्ता भवनमेकाकिनी शयनमेत्य निस्सहे[6] .... ।

[7]............ थ तदवधारणो जीवितुं न शक्यमिति दयमानेव तस्या रतिर(चर? प)जहार हृदयं सत्यं न वेति दूतीव्यावर्णितमात्रेणैव गत्वा दिक्षु(रु?उ)ज्झनिव देहं मुमोह (?) । निपुणया पुनः पत्रलेखया कादम्बरीशिखण्डभूषण-श्रीवत्समुद्राङ्कितान्माणिसमुद्गादुद्धृत्य तत्करकिसलयसं(क्रृ? स्क्र)तेन (रक्तो?) रक्तचन्द(नो? नेना)नुलिप्य प्रत्याश्वसीत् । अथ कटकादागतः प्रज्ञातत(पो?रो) मनोजवो नाम दूतो व्यज्ञापयत् । स च सह मेघनादेनाग्रतः पत्र-लेखामितः प्रेष्य प्रयाणदुन्दुभिमादिश्याच्छोदतटे महाश्वेताश्रमान्तिकमणि-गृहागतं हरमभिप्रणम्य निर्यातमात्रः किमप्यस्पृश्यत ज्वररूपेणामयेन मन्त्रिकुमारो वैशम्पायनः । तदासीत् कतिपयदिवसावस्थायि सैन्यम् ।

अथ यः स देवेन जित्वा सुवर्णपुरान्निरस्तः किरातानां हेमजटानां

1. L. about 20 letters.
2. „ 23 „
3. „ 25 „
4. „ 30 „
5. L. about 30 letters.
6. „ 36 „
7. 7 folios are missing here

पतिर्महाबलः स किम्पुरुषैः संभूयाभ्यषेणयत् । अयुध्यतोभं दरिद्रं राजन्यमाकलय्याकलय्य शमितः संरम्भेण मन्त्रिपुत्रस्य तेन चासौ हेम(कू ? ज)टेश्वरः किंपुरुषाङ्गं किंपुरुष एवासन्निलि(?) । तच्च सर्वं पित्रे निवेद्य किंपुरुषवर्षाभियोगमिष्टजनदर्शनोत्सुकोऽभ्यर्थयाम्बभूव । स्नेहविक्लवेवाश्वस्यत्येव राजनि विस्मयपरम्परोद्वेषक्षीतः(?) क्षितिमवततार तारापथात् कोऽपि रत्नमाली रथः, ततोऽवतीर्य पुरुषस्तरुणादित्यदीप्तो हेमचित्रमौलिमानमय्य ...[1] जनं सव्य ...[2] पदिकं चक्रवर्तिगुरवे सन्दिशति गन्धर्वराजश्चित्ररथः प्रस्तुतोऽत्र मद्दुहितुः कादम्बर्याः स्वयंवराविधिः सन्निपतितश्च देव ....[3] पार्थिवो देव इव कार्तवीर्यो हेहयानां ललामभूतो वर्तते यदि ....[4] जानन्नपि क्षोभपर्यन्ततां प्रायः स्वयंवराणां धर्मोऽयं क्षत्रिय ......[5] तः सर्व एते परिजनास्तमेव रथमिन्द्रायुधञ्च स्वयमास्थाय कैलास(नि)कटवर्तिकटकमापेदे । सह ......[6] गणैः गन्धर्वराजेन सत्क्ट(तान्त ? तस्तन्नि)र्दिष्टं रक्ताविमालिभवनमध्यतिष्ठत । तथातिहृष्टं कुमारमुद्यानचित्रशालागतमनेकै(पयधरः?रुपचारैः) पर्यचारयत् केयूरकतम ....[7] प्रमुखं कादम्बरीपरिजनः । सायञ्च सारप्राभृतभारहस्तपरिजनानुयाते महाश्वेतामदलेखे समासेदतुः । ते तमनङ्गक्षीणमापाण्डुरं च दृष्ट्वा स(म्भाया? मभावय)ताम् । सोऽपि तयोर्दर्शनेन जात्यन्ध इव लब्धचक्षु(र्न)नन्द । ताभ्याञ्च ससम्भ्रमोत्थितचरणप्रणामकण्ठग्रहोप(रि ?)चरिताभ्यां यथार्हं सम्भाव्य कच्चित् कुशलाभ्यामनार्ये विजने पराङ्मुखीभवतुर्दुर्दामहृदयविरहदाहज्वरव्यसनमूढ-

1, 2. The two lacunæ cover about 6 letters.
3. L. about 32 letters.
4. " 40 "
5. L. about 40 letters,
6. " 25 "
7. " 2 "

हृदयाह्लादनासु स्मरणसान्निधिभ्यां देवपादपङ्कजाभ्यामिति मदलेखाप्यवेक्ष्य पप्रछ(?) । सा चाद्य कुशलमिति सस्मितं महाश्वेतामवेक्षाञ्चक्रे । तेषाञ्च यथार्हप्रतिपन्नासनानामागमनदर्शनौत्सुक्यभा ... लघुषु लोचनेषु निर्यन्त्रणप्रचरितासु विसृतमधुलवासु विस्रम्भिणीषु स्फुटोपजातप्रत्ययैः प्रसीद(प्र?)त्यन्तरात्मनि महाश्वेता राजपुत्रमित्युवाच । कुमार ! त्वयि गते (स?) राजधानीं त्वद्दर्शनप्रत्या(शैल? शयै)व गन्धर्वराजकन्यामधारयकारणे पुनरभिमानसखीजनोपदेशानाम् । अथ क्रमेण क्षीयमाणे वपुषि पीयमानेषु प्रतिक्षणमनेन रक्षसा देहभारधारणेषु रसादिष्वन्त(र?क)पुरमार्गादेशनचाटुकारिणीष्विव बहुशः परिमुखीषु मूर्च्छासूतरोत्तरविल ....तस्थितागमेष्वनन्यशरणा सखि प्रसीद नातः परं पारयामि धारयितुं हतशरीर? ज(र?)व्यथातुरं शरीर(व्यथ?)मतिदक्षिणः कुमारः स मेऽशक्यः प्रत्यानेतुमालम्बय पाणिमनु एवायमर्थो मातुस्ततोऽपि न तन्मतिमनुवर्तिष्यत इति शिशपिष्टमनुनाध्यमानापि स यदा नाजहादेव तं हतप्रतिज्ञातं(?) तदा पर्यासमश्रु मुक्त्वा सर्वदुःखविषांकुरक्षेत्रमिदमुत्सिसृक्षुः ज्योतिष्मती(ती)रमन्दारषण्डमेत्य तीर्थस्नाता पुण्डरीकैर्धान्यधामभिरम्बिकारमणमभ्यर्च्यास्ति किमपि हतो(?) भवितव्यमिति एधांस्याहार्य हव्यवाहनमवर्धयम् । अथ तस्याः पुण्या(स्तातो?त् तत उ)त्तीर्णो देवर्षिर्नारदः तन्मे भावमार्षेण चक्षुषोपलभ्य वत्से महाश्वेते ! विमुक्तस्सर्वदुर्विकल्पाकारायाः कादम्बर्याः स्वयंवरमित्येव दिवमगाहत(?) । महर्षिवचनप्रत्ययाच्च मद्वचस्यतिष्ठदंश्चातन्मते च राजा चित्ररथो न तु जाने कथंभावीत्यस्मिन्नेव क्षणे राजादिष्टः प्रमादं कथयितुकामः तदेवोद्देशं वैशम्पायनः प्राविशत् । कतिपयक्षणादर्शनाच्च तं परं प्रोषितागतमिव गाढमाश्लिष्यातिष्ठत । तदनन्तरे रक्तविष्टरे राजपुत्रः तस्य किल दर्शने यथापुरमवर्तन्त पुण्डरीकदर्शनसमयानुभूतानि महाश्वेतान्तरितानि दिगन्त-

राणि(?)। सोऽपि न केवलमाकृत्या सद्यः प्राणपातनक्षमया कामावस्थयापि कामलेमनुचकार। त[1] ..... गाश्वेतापि परा[2] ...-. ज्यमा[3] ...... रतमपारयन्ती तिरयितुं हृदय[4] .... भीमागविलासप्रत्युद्गतं तत्र जालमिव चलं चाङ्ग[5] .... मन्दं मदलेखया सह जगाम। गत्वा चकि[6] .... कृयस्सन्दिश्य गुल्मान्तरितायामेव तस्यां दुर्व्यवसायिने हृदया[7] .... नितम्बा तु नाङ्गभङ्गं लेभे। दुर्निमित्तनिवर्तिलेक्षणा पुरस्ता[8] .... कैतं दृष्ट्वा तथातिथिता[9] .... हं कादम्बर्या सकलमवकस्या[10] ..... रमुग्धमृगीकुलमिव त्रासोभ्रान्तदृष्टि तमेव गिरितटवनमभ्यधावदाक्रोशन्त रुदित विश्रमेवैनां चैत्ररथी सशपथैः साञ्जलिभिरनुनयवचनसहस्रैरात्मत्यागहेतुं शशाङ्क शंसयितुमेवं चाब्रवीत् ॥

॥ हरिः ॥

इत्याचार्यदण्डिना कृता अवन्तिसुन्दरी समाप्ता ।

॥ श्रीराम श्रीराम राम जय श्रीराम राम जय श्रीराम राम जय ॥

1, 2, 3, 4. The four lacunæ cover about 32 letters.
5. " 52 "
6. " " "
7. L. about 48 letters.
8. " 6 "
9. " 8 "
10. " 2 "

शुद्धिपत्रम्

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९	१२	आर्यदेश	आर्यदेश
१०	६	प्रभव	प्रभवं
१३	१८	विष्ठा	विष्टो
१७	५	शर्मप्रभृति	शर्मविमतप्रभृति
३८	१२	तनीयास	तनीयसि
३९	१५	उपचिन्वत	उपाचिन्वत
४२	२	पलितरशिरत्या।	पलितराशिरत्या
४६	३	सुखोयमानव	सुखायमानेव
५६	८	भतवः	भवतः
५९	१९	विज्ञापयश्चकार	विज्ञापयाञ्चकार
६०	१८	रञ्चित	रञ्जित
६१	५	शब्दय	शब्दाय
७१	९	पाटत	पाटित
७१	१६	सैन्यन्नाहः	सैन्यसन्नाहः
,,	१७	प्रयाणा	प्रयाण
७४	१९	रात्रविधूर्दर्वा	रात्रिवधूर्दूर्वा
७९	२२	हस्तनामिति	हस्तिनामिति
८३	७	पैयन्त	पर्यन्त
८४	१७	वघा	वधा
९०	६	धूयामानेकश	धूयमानकेश

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९१	१३	राज	राजे
९४	९	वगर्णेन	वर्णेन
९६	८	पातिमि	पातिभि
१००	६	धारा	धरा
,,	८	धन	घन
१०८	४	पाका	पाक
११३	७	सङ्काति	सङ्क्रान्ति
११९	२१	यामवन्त्या	यामवत्याः
१२१	१०	निझरिणी	निर्झरिणी
१२४	१३	व्जयनीज	व्यजनीय
१२६	१५	चापै	शापै
१२८	२०	कातर इव	कातरे इव
१३०	७	हो) देस्वय	हा) देवस्य
१३४	९	धैर्य	धैर्यं
१४१	८	सूत्रेलखया	सूत्रलेखया
,,	९	तेलोदरण	तलोदरेण
१४४	९	हतां	हतं
१४७	२०	सम्भटे	सम्भेट
१५५	२	म	मे
१५७	९	व्याम्रा	व्याघ्रा
१५८	३	जनन	जनने
१६०	२४	क्षामक्षमाया	क्षामक्षामाया
१६२	१९	हिरणमयाति	हिरणमयानि
१६४	५	हार्यमस्त्विवसु	हार्यमस्त्वित्यसु

पार्श्वम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१७०	१२	निर्मील्य	निमीश्य
१७१	६	पौद्धत	पोद्धत
१७५	५	काल	काम
२००	३	क्षम	क्षमा
२०३	११	तदनुमगामिन	तदनुगामिन
२०८	९	मन्त्र	मन्त्रि
,,	६	कुञ्चरः	कुञ्जरः
२१३	४	क्रोञ्चो	क्रौञ्चो
२१४	१७	भगवतो	भगवता
२३०	७	परिष्वङ्गेभय	परिष्वङ्गभय
२३१	१८	प्रतिहायः	प्रतिहाय